|| श्रीमध्वेशोविजयते ||

श्रीमत्तात्पर्य

चंद्रिकाप्रकाशप्रसरः

श्रीमदित्याद्यनेकबिरुदांकितश्रीमच्चन्द्रिकाचार्यवर्याधिष्टितं, दिव्यविद्यासिंहा सनमधिरूढैरनवरततपःप्रवचनपूजावैराग्यौदार्यादिपयोनिधिभिः, श्रीमद्विद्यावारिधितीर्थश्रीमत्पूज्यपादैराज्ञप्तेन, विद्वत्कुल तिलकमहीधरकुलोत्पन्न वासुदेवाचार्यात्मजेन, गौडगेरिवेंकटरमणाचार्येण, विरचितःअर्वा चीनोत्तानटक्रामसुब्बशास्त्रिविरचि तस्य, मध्वचन्द्रिकाखण्डनाप देशस्य, निबंधाभासस्य, खण्डनरूपः ।

कल्याणपुरीस्थ
"बेंगळूर प्रेस्" इति विश्रुतयन्त्रालये मुद्रितोयं ग्रंथः
शकाब्दाः १८४३

|| संग्रहस्तु ||

तात्पर्यचन्द्रिकाप्रोक्तमदूष्यंदोषसंचयं ।
अद्वैतमतसंश्लिष्टमल्पज्ञेनोद्धधीर्पुणा ॥
चन्द्रिकाखण्डनाभासोरामसुब्बाभिधायुजा ।
योनिबंधोदोषजालजलधिर्निर्मितोऽधुना ॥
तस्यप्रत्यक्षरंसम्यक्खण्डनात्मारिभीषणः ।
तात्पर्यचन्द्रिकाव्याख्याप्रकाशप्रसराभिधः ॥
निबंधोनिर्मितःप्राचामुपजीव्यसरस्वतीं ।
तात्पर्यचन्द्रिकाव्याख्याप्राकाशोक्तेनवर्त्मना ॥
महीधरकुलोत्पन्नवासुदेवार्यसूनुना ।
रमणाख्यांवेंकटाद्यांदधानेनाल्पवेदिना ॥
दोषजालमुपेक्ष्यात्रगुणांशेनैवतोषिणां ।
सतांसदामुदेभूयाज्जीयाच्चाचन्द्रतारकं ॥.

चंद्रिकाप्रकाशप्रसरः

श्रीगुरुभ्योनमः ॥ ॐ ॥ वंदेवंदारुमंदारमानंदादिगुणार्णवं । इंदिरा मंदिरोरस्कमदोषं शेषशायिनं ॥ कायाधवमहायासनिरासायकृतोदयः । मायामानुषहर्यक्षःपायादस्मानपायतः ॥ गुरून्प्रणम्यशिरसातत्कारुण्यबला श्रयात् । चन्द्रिकाखंडनाभासतमःस्तोमदिवाकरः ॥ तात्पर्यचन्द्रिकासम्य क्प्रकाशप्रसराभिधः । निबंधःक्रियतेप्राचामुपजीव्यसरस्वतीं । यद्यप्यर्वाची नेनोत्तानदृशाद्यप्रकाशितस्यप्राचीनाध्यात्मविद्दर्शनाचार्यैराकरेषुव्यक्तांनिरस्तप्रा यस्यप्रायेणचिरंतनाद्वैतवाद्युत्प्रेक्षितस्यास्यचन्द्रिकाखंडनापदेशस्यदूषणाभास स्येदानींतनंखंडनं मृतमारणमेव । तथापिविक्षिप्तसंग्रहादिनाप्राचीनाचार्य वचनविवरणाद्यर्थोयमारंभ इति ॥ क्वचन्द्रिकातिगंभीराक्वाहमज्ञजनाग्रणीः । चन्द्रिकाकृत्कृपादृष्टिशक्त्यायत्नस्तथापिनः ॥ तथाहि ॥ यत्तावदुत्कमर्वाची नेन । यत्तु शुद्धोनभातीतिकोर्थः । किमात्मस्वरूपे किंचिद्भाति-किंचिन्नभाती तिवा । आत्मस्वरूपमेवनभातीतिवा । यद्वाअनात्मापिभातीतिवा ॥ आद्ये अभासमानोंशः शरीरादिभ्योभेदोवा । ब्रह्मात्माभेदेवा । द्वितीयमात्राभावोवा । सचात्मभिन्नःसत्यश्चेदपसिद्धांतः । मिथ्याचेन्नतत्वावेदकशास्त्रवेद्यः । आत्ममात्रत्वेतु द्वितयिपक्षांतर्भावइत्यारभ्यानात्मारोपायोगाच्चेत्यंतं चन्द्रिकाग्रं थमनूद्य तन्न । शुद्धइत्यस्याविद्यातत्प्रयुक्तान्यतरभिन्नचिद्रूपइत्यर्थकत्वेन त स्याहंप्रत्ययेभानाभावेनत्वदुक्ताविकल्पदूषणानां शुद्धशब्दार्थाबोधविलसितत्वा दिति ॥ तन्नशोभनं ॥ अंतःकरणावछिन्नचैतन्यस्याहमालंबनत्वेन तत्रांतःक

रणरूपविशेषणस्यमोक्षानन्वयेपि चैतन्यांशस्यमोक्षान्वयसंभवादहंमुक्तः स्यामितीछासंभव इति वदतात्वयैवविशिष्टविषयकस्याहंप्रत्ययस्यविशेष्यभूतशुद्धचैतन्यविषयताया:स्वीकृतत्वात्॥ विशेष्याविषयकविशिष्टविषयकप्रत्ययाभावेन तद्विषयतायाअवर्जनीयत्वाच्च ॥ "विशिष्टनिष्टंज्ञानंशुद्धचिन्निष्टमपिभवति । विशिष्टचितिशुद्धचितोनुगमात् । "तमेवभांतमितिश्रुते"रितिविवरणवचनानुरोधेनतुल्यन्यायतयाशुद्धविषयकत्वस्यांगीकर्तव्यत्वाच्च । अन्यथाविशिष्टविचारस्यत्वदभिमतविशेष्यज्ञानोपायत्वानुपपत्तिः । नहिसर्वथातदविषयकोविचारस्तद्ग्रहोपायोदृष्टइष्टोवेति । किंच "ब्रह्मण्यवस्थितामायासाविद्याजीवसंस्थिता । मायाबिंबोवशीकृत्यतांस्यात्सर्वज्ञईश्वर" इत्यादिभवद्भाष्यकारादिवचनेनसगुणब्रह्मणः मायाप्रयुक्तत्वेपिस्वाश्रयव्यामोहकावरणशक्तिमदविद्याप्रयुक्तत्वाभावाच्छुद्धत्वापातः अविद्याशब्देनाज्ञानमात्रोक्तावपि किंचिदुपकाराभावेतदधीनतायाएवमृषात्वादित्युक्तरीत्याअनादिभावरूपेजीवे अविद्यायाउपादानतयानिमित्ततयावोपकारकत्वाभावेन जीवस्याप्यविद्याप्रयुक्तत्वस्यदुर्वचत्वेनासंभवात्तत्रातिप्रसंगश्च । अविद्यानाशनाश्यत्वेनाविद्याप्रयुक्तत्वंत्वन्योन्याश्रयान्नांगीकर्तुमुचितं । कथंचिदप्यविद्योपकार्यत्वाभावेनाविद्याप्रयुक्तत्वाभावान्नतन्नाशनाश्यत्वमनादिभावस्येतिवादिनंप्रति अविद्यानाशनाश्यत्वेनाविद्याप्रयुक्तत्वसाधनेअन्योन्याश्रयस्यदुर्वारत्वात् । किंच "राद्धांतस्त्वित्यत्र वेदांतवाक्यैरद्वितीयआत्मोपक्रमादिभिस्तात्पर्यतःप्रतिपाद्यते । तेन वेदांतवेद्यः शुद्धोऽहंप्रत्ययेनभाती "तित्वयैवोक्तं । तत्राद्वितीयइत्यत्र नतत्पुरुषः परस्याभिमतः । किंतुबहुव्रीहिः ततश्चाद्वितीयपदेनैवाद्वितीयाभावविशिष्टोवा-तदुपलक्षितोवा तदुपहितोवा-शुद्धशब्दार्थःसंपन्नः । तत्रचशुद्धोनभातीत्युक्तेविशेष्यभूतआत्मांशोभाति-परंतु विशेषणोपलक्षणोपाध्यन्यतमःद्वितीयाभावोनभातीत्यभि

प्रायोवा-आत्मांशोपिनभातीत्यभिप्रावोवेतिविकल्पस्य-अद्वितीयशब्देन द्वितीय सामान्याभावोविवक्षितोवा -कर्तृत्वादिरूपतद्विशेषाभावोवेत्याभिप्रायेणाभासमानोंशःकर्तृत्वाद्यभावोवेत्यादिविकल्पस्यच सूपपन्नत्वात्तत्रोक्तविकल्पास्तद्दूषणानिचवज्रकल्पान्येव । किंच "शुद्धेति देहाद्युपाधिकमपिदुःखमपाकरोती" तिभामत्युक्तेर्देहाद्युपाधिककर्तृत्वभोक्तृत्वाद्यभावाश्रयचैतन्यस्यैव शुद्धशब्दार्थत्वंस्पष्टमवगन्यते । एवंरामानंदटीकायामपि "शुद्धमविद्यादोषशून्य" मितिव्याख्यातं । तद्विपरीत आत्मा वेदांतवेद्यइत्यत्रापिकर्तृत्वाद्यभावाश्रयएवात्माशुद्धइतिसिध्यति । यतोकर्तृत्वादिविशिष्टविपरीतः कर्तृत्वाद्यभावाश्रय एव नतुकेवलआत्मा । विपरीतत्वस्यतद्धर्मविरुद्धधर्माश्रयत्वरूपत्वात् । किंच अस्तुवा अन्यत्रयथाकथंचित्व्यवस्था ॥ तथापि ॥ त्वयैयाविद्यातत्प्रयुक्तान्यतरत्वाभाव तादृशान्यतरप्रतियोगिक भेदादिमानेव शुद्धशब्दार्थोभिहितः । तथाच शुद्धशब्दार्थस्य व्यंशताया अवर्जनीयतयाप्राप्तत्वेन शद्धोनभातीत्युक्ते शुद्धशब्दार्थे किंचित्चैतन्यरूपविशेष्यांशोभाति-किंचित् - विशेषणांशोनभातीतिवा उत विशेष्यांशोपिनभातीत्यादिविकल्पास्तद्दूषणानिचामंदबोधविलसितान्येवेति । अत्रच विशेषणादीनांवैलक्षण्यंतुलधुचंद्रिकायामुक्तं । "येन हिस्वोपरागाद्विशेष्येव्यावृत्तिबुद्धिर्जन्यते तद्विशेषणं । व्यावृत्तिबुद्धिकाले विशेष्योपरंजकमित्यर्थः ॥ यथागोत्वादि ॥ येनचस्वोपरागमुदासीनंकुर्वता विशेष्यगतव्यावर्तकधर्मांतरोपस्थापनेनव्यावृत्तिबुद्धिर्जन्यते ॥ तदुपलक्षणं ॥ यथाकाकादि ॥ यत्तु विशेष्ये नोपरंजकं नवाधर्मांतरोपस्थापकं अथचव्यावर्तकं । तदुपाधिसंज्ञितं । यथापंकजपदप्रयोगेपद्मत्वं । अत्रहि पद्मत्वं पंकजनिकर्तरि नधर्मांतरमुपस्थापयति । नवास्वोपरक्तां बुद्धिंजनयति । समुदाये शक्त्यंतरानभ्युपगमात् । अथचकुमुदादिभ्योव्यावर्तकमित्युपाधिरेव । इद

मुदाहरणं मीमांसकानां । तार्किकाणांत्वाकाशपदप्रयोगेशब्दाश्रयत्वमि"ति । अंगीकृत्येदमुक्तं । वस्तुतस्तु । नोक्तंतद्वैलक्षण्यंयुक्तं । घटप्रागभावः घटध्वंसइत्यादौ घटादेराविशेषणत्वापत्तेः । नचतदिष्टं । भासमानत्वात् । कदाचिद्विशेष्यसंबद्धस्यैवोपलक्षणत्वात् । उपाधेरभासमानत्वेपिविशेष्यगतत्वात् । अद्वैतमतेचतयोस्तटस्थत्वांगीकारादिति । किंचाविद्याप्रयुक्तत्वस्यतदुपादेयत्वरूपत्वासंभवेनप्रयोजकतानिरूपकत्वरूपतया अज्ञानस्यनिमित्तत्वेनापि प्रयोजकत्वोपपत्यासत्यत्वेप्युक्तप्रक्तत्वसंभवादनादिदृश्यवज्जगतःसत्यत्वेपि स्वसमानविषयकाज्ञानतत्प्रयुक्तत्वान्यतरसंबंधावछिन्नात्मसाक्षात्कारनिष्टकारणताकनाशप्रतियोगित्वोपपत्या अनादिभावसंग्रहायोक्तपरिष्कारेद्वितीयमिथ्यात्वालाभात् अद्वैतहानिश्च ॥ नचघटप्रागभावस्यदंडप्रागभावाधीनत्ववत्अविद्यानाशाधीननाशप्रतियोगित्वरूपमधीनत्वमनादिभावेप्यक्षतमितिवाच्यं । ज्ञानेनाविद्यादीनांसर्वेषांयुगपदेवापगमस्यत्वत्परमासिद्धांतत्वेनक्रमिकनाशानंगीकारात् । अन्यथाचरमवृत्तिप्रागभावस्याविद्यांप्रतिप्रयोजकत्वापत्या अविद्यायानिरपेक्षानादित्वहानिप्रसंगात् । तादृशप्रागभावस्यानादेरनाविद्यकत्वप्रात्प्याचितइवपारमार्थिकत्वापत्तेश्चेति । ततश्चाविद्याविलासः सर्वज्ञकल्पानां पदवाक्यप्रमाणविदां ग्रंथकृतांवा-स्वपरमतमविजानतोऽर्वाचीनस्याशुद्धभाषिणोवेति भवानेव निराग्रहो विचारयत्विति । तस्मादुक्तंदूषणं सुस्थमितिसिद्धं ॥ विषयः ॥ १ ॥

यदपि ॥ यत्तु स्वरूपज्ञानस्याज्ञानाविरोधित्वेसाक्षिभास्यसुखादावज्ञानप्रसंगः । अयंघटइतिवृत्तिज्ञानस्य घटावछिन्नचैतन्यविषयकतयातेनब्रह्माज्ञाननिवृत्यापातइति ॥ तन्न ॥ यस्यघटादेर्नजानामीत्यनुभवस्तद्विषयकमज्ञानं । सुखादेर्हिनजानामीत्यनुभवाभावात् । तत्राज्ञानप्रसक्त्यभावात् । घटाकारवृत्या

विशिष्टचैतन्यविषयीकरणेपिशुद्धस्याविषयीकरणात् । शुद्धाज्ञाननिवृत्त्य भावादिति ॥ तन्मंदं ॥ सिद्धिकारमते "अज्ञानंद्विविधं। अभानापादकमभावा पादकंचेति । तत्राभानापादकमपरोक्षधीमात्रनाश्यं अंतःकरणावच्छिन्नचैतन्य रूपप्रमातृनिष्ठं । असत्वापादकंतु परोक्षापरोक्षधीमात्रनाश्यं विषयावच्छिन्न चैतन्यनिष्ठ" मित्यंगकिारेण सुखादावभानापादकाज्ञानाभावेप्यसत्वापादकाज्ञान प्रसक्त्यातदनिवृत्त्यापादनस्ययुक्तत्वात् । किंच सुखाद्यवच्छिन्नं चैतन्यमज्ञाना वृतमेवनभवतीतिवदन्प्रष्टव्यः । किमनावृतचैतन्यप्रदेशावच्छिन्नतयैवसुखादिक मुत्पद्यते । उत सुखाद्युत्पत्त्यनंतरमेवतदवच्छिन्नं चैतन्यमनावृतं भवतीति ॥ नाद्यः ॥ अनियतप्रदेशानामंतःकरणसंबंधिनामनंतसुखादीनां नियतैकचैतन्य प्रदेशसंबंधितयोत्पत्त्यनुपपत्तेरनंतप्रदेशानामनावृतत्वेवक्तव्येतत्प्रदेशसंबंधितयो त्पन्नानांघटादीनामपिज्ञातैकसत्वप्रसगांत् ॥ न द्वितीयः ॥ तद्विषयकवृत्ते रेवतदज्ञाननिवर्तकतयातदज्ञाननिवृत्त्यर्थं सुखादिविषयकवृत्तेरंगीकार्यत्वे घटा दिवत्सुखादेरपि ज्ञातैकसत्वानुपपत्तेः । तस्मात्सुखादिकंज्ञातैकसत्-घटादिकं तुनतथेति व्यवस्थासिध्यर्थं घटादेश्चित्कर्मत्वाभावः । सुखादेरेवचित्कर्मत्वं । चितोप्यज्ञाननिवर्तकत्वमकामेनाप्यभ्युपेयमिति । किंच साक्षात्कारविष यत्वंभानमित्यंगीकारेणभवन्मतेसाक्षात्कारविषयस्यैवभातीतिव्यवहारविषयत्व प्राप्त्यासुखादीनांवृत्तिविषयत्वाभावपक्षेभातिसुखमितिव्यवहारानुपपत्तिः । सुखावच्छिन्नचिदावरकाज्ञानादेरभावेनसुखमस्तिभातीत्यादिव्यवहारानुपपत्ति श्च । असत्वापादकाज्ञानाभावोपहिताचिदस्तित्वं-अभानापादकाज्ञानाभावोप हिताचिद्भानमित्यंगीकारात् । त्वन्मते अज्ञानावृतचितएवतदभावोपहितत्वां गीकारात् । इदंचलघुचन्द्रिकादौव्यक्तं । किंच भावत्वादिविशिष्टाज्ञान स्यैव विषयाभिव्यक्तत्वादिविशिष्टसुखादेरप्यज्ञानविषयत्वस्यब्रह्मानंदादिभिर

भ्युपगतत्वात् । अज्ञानानिवर्तकज्ञानविषयस्यज्ञातैकसत्वायोगात् । आत्म स्वरूपज्ञानेप्यज्ञानाप्रसक्तिप्रसंगाच्च नतत्राज्ञानाप्रसक्तिर्युक्ता । किंचाज्ञाना विरोधिनःशुद्धत्वादेवव्यवहाराद्यनुकूलशक्ति - विषयविषयिभावादिधर्मवि धुरस्यच ज्ञानत्वेघटादेरपितथात्वप्रसंगेनसाक्षिणोऽज्ञानानिरोधित्वेन ज्ञानत्वस्यै वदौर्घल्येतद्वेद्येसुखादौज्ञातैकसत्वानुपपत्तौतत्राज्ञानस्यप्रसक्ततयातदनिवृत्त्यापा दनंयुक्तमेव। स्वयंप्रकाशमानेप्यात्मनिअज्ञानमंगीकुर्वतस्तादृशसाक्षिवेद्येसुखा दावज्ञानाप्रसक्तिवचनस्यानुपपन्नत्वात् । सतिविषयेनजानामीतिव्यवहारस्या प्यापादनविषयत्वसंभवाच्चेति। अंगीकृत्यचेदमुक्तं। वस्तुतस्तु। अज्ञानप्रसंगइ तिचन्द्रिकोक्त्यासुखादावज्ञानमापाद्यतइतिस्पष्टमेवावगम्यते । अपादनंचानि ष्टस्यैवेतिसुखादावज्ञानाप्रसक्तिरापादनस्य भूषणमेव । ततश्च यदिस्वरूपचै तन्यमज्ञानाविरोधिस्यात्तर्हि सुखादिकंसाक्षिचैतन्यभास्यमज्ञानानिवर्तकज्ञाना विषयःस्यात् । ततश्चाज्ञानविषयःस्यादित्यापादनंह्यत्रविवक्षितं । यत्राज्ञानानि वर्तकज्ञानविषयत्वाभावःतत्राज्ञानविषयत्वं, यथांधकारस्थघटादिरितिव्याप्तिसंभ वात् । इत्थंचयथाश्रुतचन्द्रिकावाक्यार्थानवभासनिमित्तोयंदूषणाभासइतिसि द्धं । किंच "किंचिदुपहितचिदाश्रितमपिज्ञानं शुद्धचिन्निष्टं भवत्येव । उपहि तचितिशुद्धचितोऽनुगमात् । "तमेवभांतमि"तिश्रुतेरितिविवरणानुसारेणतुल्य न्यायतयाविशिष्टविषयकवृत्तेरधिकंत्वितिन्यायेनविशेष्यविषयकत्वस्याकामेना प्यंगीकरणीयत्वेनतयाशुद्धाज्ञाननिवृत्यापादनमप्युपपन्नतममेव । अन्यथाघटा देरपि स्वरूपेणादृश्यत्वापत्यामिथ्यात्वासिद्धिप्रसंगात् । नचघटावछिन्नचैत न्यविषयावृत्तिरज्ञानविषयचिदविषयासतीतदज्ञानाविरोधिनीतिवाच्यं । दंडी चैत्रइतिवृत्याचैत्राज्ञानानिवृत्यापातात् । श्रवणादिजनितसंस्कारसहितांतःकर वृत्तिनाश्यत्वेच मिथ्यारूप्यादौतददर्शनात्सत्येदेवतानिदिध्यासनसाध्यतत्सा

क्षात्कारनिवर्त्ये दुरितादौ तद्दर्शनादज्ञानस्यसत्यतापाताच्च । श्रवणादिसचिवं स्वरूपमात्रविषयकमपिज्ञानमज्ञानंनिवर्तयतीत्याशांतुभ्रमकालीनापरोक्षज्ञानानधिकविषयकस्यकारणांतरजन्यस्यापिविषयकृतवैलक्षण्याभावेपिकारणांतरजन्यत्वमात्रेणाज्ञाननिवर्तकत्वेऽतिप्रसंगात् । अनधिकविषयकत्वे श्रवणादिवैयर्थ्याच्चेत्यादिनोत्तरत्रापाकरिष्यामः । किंच चरमवृत्तेरपिवृत्त्युपहितचिद्विषयकत्वाभ्युपगमेनतयापिशुद्धाज्ञाननिवृत्तिर्न स्यादिति । तस्मादुक्तंदूषणंसुस्थमिति सिद्धं ॥ २ ॥

यदपि ॥ यत्तु कर्तृत्वादिविशिष्टस्यातत्वावेदकेनप्रत्यक्षेणमिथ्याभेदे गृहीतेपितात्विकाभेदमानांतराविरोधेन तत्वं पदमुख्यार्थत्वायतत्त्वमसि वाक्यावैयर्थ्यावचविशिष्टस्यैव निर्दोषयाश्रुत्यातात्विकाभेदबोधनसंभवेन विषयसिध्यर्थमध्यासोनवक्तव्यः । नचविरुद्धधर्मस्यसदासत्वेभेदस्तात्विकएवस्यादिति वाच्यं । अस्याप्यनुमास्यश्रुतिविरुद्धत्वेनातात्विकाविषयकत्वात् । नापि प्रयोजनार्थमध्यासोक्तिः । सेत्वज्ञानाकार्यस्यापिपापस्य सेतुज्ञानान्निवृत्तेरिति तन्न ॥ "एकमेवाद्वितीयंतद्धास्याविजिज्ञौ" इत्युपक्रमोपसंहाराभ्यां अद्वितीय ब्रह्मनिर्विशेषविषयाभ्यांतन्मध्यपतितस्यनिर्विशेषविषयत्वागमेन तद्घटकतत्त्वमसिवाक्यादेरपिजीवत्वब्रह्मत्वोपलक्षितचिन्मात्रेतात्पर्यावगमात् । विशिष्टयोरभेदेतत्त्वमसिवाक्यतात्पर्यस्यैवाभावात् । सेतुज्ञानस्यपापनाशंप्रतिहेतुत्वेपि उपादानेनसहकार्यनिवृत्तिरूपबाधंप्रत्यप्रयोजकत्वात् । बाधितस्य त्वध्यासावर्णनं । नतुनाशप्रतियोगिन इति विवरणाचार्याभिप्रायादिति ॥ तदप्यसारं ॥ तथाहि ॥ सर्वज्ञत्वाल्पज्ञत्वविशिष्टयोः परोक्षत्वापरोक्षत्वविशिष्टयोः मायाविद्यावछिन्नयोर्वावास्तवाभेदस्यतत्त्वमसीतिश्रुत्याबोधनेकिंबाधकं अत्रोक्तं वेदांतसारे ॥ "प्रत्यक्षादिप्रमाणविरोधोबाधकइति ॥ तन्न ॥ घटा

दिसत्वग्राहकस्याहंकर्तेत्यादिप्रत्यक्षस्यचन्द्रपादेशिकत्वादिप्रत्यक्षस्यचेवविशि ष्टयोर्भेदग्राहकप्रत्यक्षस्याप्यप्रामाण्यशंकाकलंकितस्यातत्वावेदकस्यनिर्दोषश्रुति सिद्धार्थबाधकत्वायोगात् । नाप्यनुमानंबाधकं । नराशिरःकपालशुचि त्वानुमानस्येवश्रौतार्थापरिपंथित्वात् । कामगामित्वाच्च । तदुक्तं । तर्काप्रति ष्ठानादित्यत्रवाचस्पतिमिश्रेण । "यत्नेनानुमितोप्यर्थःकुशलैरनुमातृभिः । अभियुक्ततरैरन्यैरन्यथैवोपपाद्यत" इति । उक्तंच । वेदांतपरिभाषायां ॥ "ननुनाहमीश्वरइत्यादिप्रत्यक्षेणकिंचिज्ज्ञत्वसर्वज्ञत्वधर्माश्रयत्वादिलिंगैर्जीवपरभे दस्यावगतत्वेनतत्त्वमस्यादिवाक्यमुपचरितार्थमितिचेन्न । भेदप्रत्यक्षस्य संभावितकरणदोषस्यासंभावितकरणदोषजन्यज्ञानेनबाध्यमानत्वात् । अत एवानुमानमपि नप्रमाणं । आगमबाधान्मेरुपाषाणमयत्वानुमानवदिति" । नापिशब्दः । अनुपलंभात् । समत्वाच्च । ननुविशिष्टयोरैक्यबोधने चैतन्य मात्रेतात्पर्यानुपपत्तिर्बाधिकेतिचेन्न । "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदा यतनाः सत्प्रतिष्ठाइत्यादि वाक्यानां महातात्पर्येण चैतन्यमात्र बोधकत्वेपि अ वांतरतात्पर्येणप्रजाधारकत्वादिविशिष्टसदर्थबोधकत्ववत्-अर्थवादवाक्यानां दे वताविग्रहसिद्धयेत्वन्मतेवायुक्षेपिष्ठत्वादिपरत्वस्याप्यंगिकारवत् विशिष्टयोरैक्य बोधनेपिचैतन्यमात्रेतात्पर्याविरोधात् । अभिमतंचतात्पर्यद्वयंत्वत्सिद्धांते । "अवांतरतात्पर्यमादायचेत्तदाब्रह्मपरत्वस्यैवाभात्महातात्पर्यमादायचे दिष्टापत्ते रित्यलक्षणवाक्याखंडार्थत्वविचारेअद्वैतासिद्धावुक्तत्वात् । चैतन्यमात्रेतात्प र्याभावस्यापिवक्ष्यमाणत्वाच्च । किंच कथंसर्वज्ञत्वाल्पज्ञत्वयोर्विरोधः । एकस्मिन्चैतन्येसमावेशांगीकारात् । भिन्नधर्मिनिष्टत्वेचधर्मपरित्यागेपि धर्मि णोरैक्यंनस्यात् । नहिगोत्वाश्वत्वयोःपरित्यागेनगवाश्वयोरभेदःसंभवति । अत्र केचित् । तत्त्वमसीत्यादौविशिष्टवाचकानां पदानामेकदेशपरत्वेपिनलक्षणा ।

शक्त्युपस्थितविशिष्टयोरन्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेवान्वय बोधाविरोधात्। यथा घटोऽनित्यइत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपि घटव्यक्त्यासहानित्यत्वान्वयः । एवं तत्त्वमसीत्यादिवाक्येपि नलक्षणा। शक्त्यास्वातंत्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्। अन्यथा गेहे घटः घटेरूपमित्यादावपि घटादिपदानांलक्षणया विशेष्यमात्रपरत्वंस्यादि त्याहुः ॥ आपदेवस्तु ॥ स्वरूपमात्रविवक्षयाप्रयुक्तत्वात् तत्त्वमसिवाक्यंतावद खंडार्थं । अखंडार्थंच संसर्गागोचरप्रमितिजनकं । शक्तिजन्योपस्थितिविशेष्य योश्च भासमानोअभेदःसंसर्गविधयैवभायात्। एवंचाखंडार्थत्वव्याघातः। तस्मा दखंडार्थत्वसिध्यर्थं शक्तिजन्योपस्थितिंत्यक्त्वा शुद्धचैतन्योपस्थित्यर्थं लक्षणा आवश्यकीतिपूर्वमतं दूषितवान्। उभावप्यंतःकलहंकुर्वाणौ स्थूलदृश्यानाविति वयं मन्यामहे । तथाहि प्रथममतंतावदयुक्तं । घटोनित्यइत्यत्र घटत्वस्यश क्त्युपस्थितस्य घटेप्रकारतयाभानवत् तत्त्वमसीत्यादौसर्वज्ञत्वादीनां शक्त्युपस्थि तानांविशेष्येप्रकारतयाभानस्यावर्जनीयतयाखंडार्थत्वभंगात् । अन्यथाघटो श्वइत्यत्रापिप्रमुष्टघटाश्वत्वकःशक्त्युपस्थितविशेष्यान्वयबोधःस्यात्। शुद्धस्या पिशक्त्यधीनबोधविषयत्वेतस्यावाच्यत्वसमर्थनासंगतेः । जातिशक्तिवादिनस्त ववटस्यवाच्यैकदेशत्वकथनस्यव्याहतत्वाच्च। "सोयंपदार्थाविवभागलक्षणाप्यु च्येततत्त्वंपदयोरदोषत"इत्यादिरामगीतायाअपस्मृतित्वापाताच्च॥द्वितीयमप्ययु क्तं ॥ तत्त्वंपदयोर्भागत्यागेन चैतन्येलक्षणांगीकारेपि लक्षणोपस्थितयोर भेदःसंसर्गविधयैव भायात् । तथाचाखंडार्थत्वहानिरित्यस्यतुल्यत्वात्। नच तत्त्वमसीत्यत्र पदद्वये नलक्षणा। किंतु वाक्यस्यैव चैतन्येलक्षणेतिनोक्तदोषइति वाच्यं ॥ सिद्धांतविरोधात् ॥ "श्रोतुर्देहेंद्रियातीतंवस्त्वत्रत्वंपदेरितं । एकताग्रा ह्यतेसीतितदैक्यमनुभूयतामि"त्युक्त्या पदद्वये लक्षणावगतेश्च। अथनवयंप्रत्य

क्षादिविरोधेनवा, वाच्यार्थानुपपत्यावा, सोयमितिवाक्यनिदर्शनेनवा तत्त्वमसी त्यादिपदानांलक्षणांस्वीकुर्मः । किंत्वद्वितीयेवस्तुनि तात्पर्यस्यपर्यवसिततया तदुपपादनार्थं । तत्त्वमसीतिवाक्यस्याद्वितीयचैतन्येतात्पर्यंच तात्पर्यनिर्णाय कैरुपक्रमादिषड्विधलिंगैरवगम्यते ॥ तथाहि ॥ "सदेवसोम्येदमग्रआसीदे कमेवाद्वितीयमि" त्युपक्रमः, "तत्त्वमसी"त्युपसंहारः,यद्यपि 'तद्धास्यविजिज्ञा' वितिवाक्यमेवांतिमं । तथापितस्यपूर्वप्रकृतप्रापकतत्पदघटितस्यस्वातंत्र्येणा र्थविशेषासमर्पकत्वात् - तत्त्वमसीत्यस्यैवोपसंहारता-तस्यैवनवकृत्वोऽभ्यासश्च । अप्राप्तत्वादपूर्वता । "आचार्यवानि"तिफलं । "उततमादेशामि"त्यर्थवादः-"यथा सोम्ये"त्युपपत्तिः-एतैश्च चैतन्यमात्रे तात्पर्यं सिध्यतीतिनकोपिदोषइति ॥ अत्रो च्यते ॥ त्वन्मतेउपक्रमोपसंहारैकरूप्यमेवतात्पर्यनिर्णायकं । नतूपक्रमउपसंहा रश्चेतिद्वौ । अन्यथाषाड्विध्यभंगापत्तेः । त्वदीयग्रंथविरोधाच्च । एवंच तत्त्वम सीत्युपसंहारवाक्येचैतन्यपरत्वसंदेहे उपक्रमस्यतदैकरूप्यासिध्या कथंतेनोक्त तात्पर्यनिर्णयः । एवमुक्ताभ्यासोप्यन्योन्याश्रयान्नतन्निर्णायकः । एवमपूर्वत्वम पि - तद्वाक्यस्यत्वंपदार्थस्य तत्पदार्थब्रह्मसाहचर्याद्यर्थकत्वेपि सावकाशमितिचै तन्यमात्रपरत्वंविनाप्युपपन्नामितिनतन्निर्णायकं । अन्यथासिद्धत्वादुक्तफलम पि नतन्निश्चायकं । "संपत्स्यत" इत्यस्यजीवोब्रह्मैवभवतीत्यर्थस्यासंगतत्वात् । प्राप्तिरूपसंपत्तेर्भेदएवोपपत्तेः । देवदत्तःग्रामंप्राप्तइत्यादौतथादर्शनात् । "उतत मादेशमि" त्यर्थवादोपिनोक्तार्थसाधकः । प्रशंसापरत्वेन स्वार्थपरत्वाभावात् ॥ उक्तंच ॥ त्वदीयछांदोग्यभाष्ये । "अत्रैवपितापुत्राख्यायिका विद्यायाःसारिष्टत्व प्रतिपादनार्था । सारिष्टत्वंसारतमत्वमिति" । अन्यथातस्मादुहैवंविद्यद्यपिचंडाला येत्यादिवैश्वानरविद्याशेषार्थवादस्यापिचंडालोच्छिष्टदानविधायकत्वंस्यात् ।तच्च निषिद्धं । तदुक्तं । तद्भाष्ये । "विद्यामेवस्तौतीति" । उक्तंच । पारिप्लवार्थाइत्य

धिकरणे आख्यायिकायाःस्तुत्यर्थत्वं । "यथासोम्ये" त्यादिकमर्थवादएव । "श्वेतकेतुर्हारुणेयआस" त्यारभ्य "तथासोम्येतिहोवाचे" त्यंताख्यायिकांतर्गत त्वात् । वस्तुतस्तु । उक्तोपक्रमादीनांसर्वेषामपि यथाअभेदप्रतिकूलत्वं भेदा नुकूलत्वंचतत्प्रकारो न्यायामृते व्यक्तः । अत्रापितत्रोक्तमेव किंचिद्वक्ष्यते ॥ तथाहि ॥ छांदोग्येषष्ठेऽध्यायेषोडशखंडाः । तत्रसप्तखंडी - एकं त्रिवृत्प्रकरणं । "अन्नमयंहिसोम्यमनः - आपोमयःप्राणः - तेजोमयीवागिति" "तद्धास्यविजि ज्ञौतद्धास्यविजिज्ञाविति" द्विरुक्तिश्रवणात् । "उद्दालकोहारुणिःश्वेतकेतुंपुत्र मुवाचस्वप्नांतंमेसोम्ये" त्याख्यायिकांतरारंभेण नवखंडीप्रकरणांतरं । "सआ त्मातत्त्वमसिश्वेतकेतो" तद्धास्यविजिज्ञौतद्धास्यविजिज्ञावित्यंतेद्विरुक्तिश्रवणा त् । तथाचप्रकरणादेरुपक्रमत्वेन "स्वप्नांतम" इत्यादेरेवोपक्रमत्वं । नतुसदेवे त्यादेः । अन्यथा "ओमित्युद्गीथमुपासीते" त्यस्यैवोपक्रमत्वं - "आचार्यकुला द्वेदमधीत्ये" त्यादेरुपसंहारत्वं - तदैकरूप्येणाखिलछांदोग्योपनिषदउद्गीथाद्युपा सनापरत्वं - गार्हस्थ्यधर्मपरत्वंवास्यात् । इत्थंच सदेवेत्यादेरुपक्रमत्ववचनंपर स्य तदुपनिषदज्ञाननिबंधनमेव । यदुच्यते तत्त्वमसीतिवाक्यस्यचैतन्यमात्रपर त्वसाधकतयोपन्यस्तस्यसदेवेत्याद्युपक्रमवाक्यस्यतत्त्वमसीत्युपसंहारैकरूप्याया द्वितीयचैतन्यमात्रपरत्वं । तत्किं? शक्त्यालक्षणयावा? नाद्यः । अनंगीका रात् । निर्धर्मकेशक्त्यसंभावाच्च । नद्वितीयः । लक्षणाग्राहकाभावात् । नहितत्रापि तद्ग्राहकमुपक्रमांतरमस्ति ॥ किंच ॥ सदेवेत्यस्यचैतन्यमात्रपर त्वे सत्पदस्यसत्ताप्रवृत्तिनिमित्तकस्यशून्यरूपचैतन्ये लक्षणा - सोम्येत्यनेन द्वितीयप्रापकेण विरोधात्तदर्थस्याविवक्षा । आसीदितिसत्ताश्रयत्वभूतत्वैक त्वबोधकधातुलङोःस्वार्थत्यागः, इदंपदस्याप्येतद्देशकालविशिष्टार्थकस्यभूतस त्तासंबंधबोधकासीदित्यनेनान्वयेसोयमित्यत्रेवविरोधेनभागत्याग, लक्षणादिदो

षाःस्युः । अस्मन्मतेतु । "सत्त्वंस्वातंत्र्यमुद्दिष्ट" मित्यादिवचनात्सच्छब्दः स्वतंत्रपरः । तथाच—कार्यवर्गस्याग्रेस्वतंत्रंवस्त्वेवासीदितिहरेःस्वातंत्र्य जगत्कारणत्वादिपरत्वेन नकस्यापिलक्षणा, स्वार्थत्यागःव्याघातोवा । प्रतिज्ञातं कारणत्वंविशदीकर्तुंसृष्ट्यादिप्रतिपादनंचसंगच्छते । प्रकृत्यादेस्त्वेवकारेण मिषत्वादिनैवनिषेधः । "नान्यत्किंचनमिषदासीदिति" श्रुतेः । आसीत् - मिषदित्यनयोरासीदित्येवार्थइतिब्रह्मानंदव्याख्यानंप्रसिद्धार्थत्यागादश्रद्धेयमेव । अनचेष्टायां, मिषस्पर्धायां, शत्रंतं, उन्मिषत् , स्वतंत्रमितितदर्थः । यत्तु, सदेवेत्यस्यसद्व्यतिरेकेणेदंनासीदित्यर्थः । तथाच सर्वस्यमिथ्यात्वमत्रोच्यतइति ब्रह्मानंदप्रभृतिभिरुक्तं । तदसारं । शंखःपांडुरएवेत्यादिवत्सदेवेत्यनेन सर्वस्यसद्रूपतालभेन मिथ्यात्वप्रतिकूलत्वात् । एकाद्वितीयादिपदानामपि त्वन्मतेमिथ्यात्वपरतयापौनरुक्त्यापाताच्च। अग्रकालस्यसद्व्यतिरेकेणाभावस्यच सत्यत्वमिथ्यात्वाभ्यां व्याघाताच्च । तयोरपि निषेधबोधने नाहंवक्तेतिवाक्येन स्वस्यापिनिषेधबोधनेन स्वव्याघातोनस्यात् । इदमभिन्नंयदग्रेआसीत्तत्सदेकमेवाद्वितीयमिति ब्रह्मानंदव्याख्यानंतु सत्यानृतयोरभेदायोगात् । उद्देश्यतावच्छेदकविशेषणस्यस्वान्वितान्वयिनि समानकालीनत्वसंबंधेनान्वयस्य त्वदभ्युपगमाच्चायुक्तं ॥ वस्तुतस्तु ॥ एवमपिचैतन्यमात्रस्य नतेनलाभः । किंतु सदद्वितयित्वसाहितसत्ताश्रयस्यैवेति नैतदुपक्रमानुरोधेन चैतन्यमात्रेतत्त्वंपदानांलक्षणासिध्यति । सत्यत्वबोधकसत्पदस्यचैतन्यमात्रेलक्षणायांच नकिंचिन्मानमिति । एवमेकमेवाद्वितीयमितिवाक्यस्य साद्वितीयचैतन्यपरत्वएवस्वारस्यं ॥ तथाहि ॥ एकेमुख्यान्यकेवलाइत्यमरोक्तेः- "एकोगोत्र" इतिसूत्रेएकशब्दोयमन्यप्रधानसंख्यासहायसमानप्रथमवाचीति" कैयटोक्तेश्च । प्रकृतेसद्वस्तु, मुख्यं, जीवादिभ्योन्यत् , जगत्सर्जनादावसहायं, एकत्वसंख्यारूपगुणयुक्तं, प्रथमं, सर्वरूपेपुसमानमित्येक

शब्दस्यपडर्थाःसंपद्यंते । यत्तु, सदेवेत्यादिनामूलकारणत्वबोधनेनैवप्राधान्यस्य, प्राथम्यस्य, जीवाद्यन्यत्वस्यच लाभात्तद्बोधनार्थंनैकपदापेक्षेतिब्रह्मानंदोक्तं। तदशोभनं । प्राधान्यस्य सर्वाश्रयत्वादिरूपस्यापिसंभवात् । प्राथम्यस्य देवताद्युत्तमवस्तुपरिगणने प्रथमप्राप्तत्वरूपत्वाच्च । अर्थात्प्राप्तस्य जीवाद्यन्यत्वस्यदार्ढ्यार्थं सत्पदेन कथनसंभवाच्चेति । अन्यथाभवदीयव्याख्याने सदेवेत्यनेनसद्व्यतिरेकेणासत्वोक्त्याऽद्वितीयत्वादिलाभादेकमेवेत्यादेर्वैयर्थ्यमापद्येत । यदप्येकशब्देनैकत्वसंख्याकथनंव्यर्थं, तद्बोधने प्रयोजनाभावात् । एकवचनेनैवतल्लाभाच्चेति ॥ तन्न ॥ कुसमयप्राप्तनिर्गुणत्वशंकापनोदनाय तस्यावश्यकत्वात् । द्वौब्राह्मणावित्यादाविव द्विर्बद्धंसुबद्धंभवतीतिन्यायेनप्रातिपदिकेनापि तत्कथनसंभवात् । "पत्नींसन्नह्ये"तिमंत्रस्थैकवचनस्याद्विबहुपत्नीकप्रयोगेआविवक्षावदत्राप्यविवक्षा माभूदितितत्सार्थक्यात् । लीलया दंडावष्टंभेनगच्छतोपिस्वयंगंतुंसमर्थस्यासहायत्वव्यपदेशवत्, प्रकृत्यादिकंविनापिसर्जनसमर्थस्यलीलयाअविद्याद्यवलंबनेप्यसहायत्वशक्तेरनपायात् । विशेषबलेनानेकभगवद्रूपाणांगुणक्रियादितःसाम्यसंभवाच्च । नात्रापिब्रह्मानंदोक्तदूषणाभासप्रसक्तिरिति । एवशब्दस्त्ववधारणार्थः।अद्वितीयशब्दोप्यसहायत्ववाची । "असिद्वितीयोऽसिसहाय"इतिगम्यतइतिमहाभाष्योक्तेः। द्वितीयशब्दस्यसहायार्थत्वात् ॥उक्तंच॥त्वदीयछांदोग्यभाष्ये । "सतःसहकारिकारणंद्वितीयंवस्त्वंतरंप्राप्तंनिषिध्यतेअद्वितीयमि" तीति।यद्वा-प्रकृतसजातीयद्वितीये व्युत्पन्नोयंद्वितीयशब्दः अस्यगोर्द्वितीयोन्वेष्टव्यइत्युक्ते गौरेवद्वितीयोन्विष्यते नाश्वःपुरुषोवेति गुहाधिकरणेपरभाष्योक्तेश्च॥मंत्रेषु॥"एकएवाद्वितीयोसावश्वमेधःक्रतुष्वपी"त्यादिप्रयोगात्।अस्येतिपदांतरासन्निधानेपि गोर्द्वितीयइत्यादौसदृशद्वितीयबोधनस्य सर्वसंमतत्वाददैतसिद्धावप्यत्रत्यद्वितीयशब्दस्य सदृशद्वितीयपरत्वस्योक्तत्वाच्चप्रकृतेप्यत्रब्रह्मानंदोक्तंदू

षणमाकिंचित्करमेव। किंचात्राद्वितीयशब्दस्यद्वितीयसमान्यपरत्वे एकैवशब्दयोर्वै यर्थ्यं।द्वितीयाभावेनैवसद्वितीयत्वाद्व्याघातश्च। तस्मात् द्वितीयविशेषनिषेधपरत्व मेवेष्टव्यं । किंचसिद्धांते नकस्यापिपदस्यलक्षणा,परमतेतु, "वृक्षादेः स्वगतोभेदः पत्रमूलफलादितः।वृक्षांतरात्सजातीयोविजातीयःशिलादित "इतिव्याख्यानेनसर्व त्र लक्षणा । साप्यप्रामाणिकी । एक, एव, अद्वितीयादिपदानांस्वगतभेदशून्य त्व, सजातीयभेदशून्यत्व, विजातीयभेदशून्यत्वाद्यर्थेषुशक्तेरभावात् । अन्व यानुपपत्याद्यभावेन लक्षणायोगाच्च । लक्षणाग्राहकतात्पर्यलिंगाभावाच्चेति । किंच, एक, एव, अद्वितीयादिपदानां प्रत्येकमुक्तात्रिविधभेदानिषेधार्थकत्वस्यक ल्पयितुंशक्यत्वात्पदांतरवैयर्थ्यं ॥ पौनरुक्त्यंच ॥ सजातीयविजातीयभेदनि षधे गजःस्वभिन्नगर्दभभेदशून्यइतिवाक्यवदेकमेवेतिवाक्यंव्याहतंस्यात् । सा जात्यवैजात्ययोर्भेदघटितत्वात् । भेदमिथ्यात्वंतुकफोणिगुडायितं । दूषितत्वा त् । एवशब्दस्यान्यतादात्म्यव्यवछेदार्थकत्वस्याप्यप्रामाणिकत्वात् ।प्रकृते सदे वेत्यादावसंभवाच्चेति। तस्मादेकमेवाद्वितीयमित्यादिवाक्यंनत्वदभिमताद्वितीयचै तन्यपरं। किंतु कालादिप्रापकेक्षणनामरूपात्मक प्रपंचप्रापक पूर्वोत्तरसद्वितीयव स्तुपरवाक्यमध्यस्थमुपांशुयाजवाक्यमध्यस्थविष्ण्वादिवाक्यवत् प्रयाजांगमध्य पठिताभिक्रमणवाक्यवच्चपूर्वोत्तर द्वैतवाक्यानुसारेण नेयमितितत्त्वमसीतिवाक्य स्यचैतन्यमात्रपरत्वे नोपक्रमस्यपराक्रमइतिसिद्धं । प्रामाण्यस्यस्वतस्त्वेनाद्वैत स्येव द्वैतवाक्येनैव तस्यसत्यत्वसिद्धेः । यदिचाविरोधायद्वैतवाक यस्यलक्षणादि नाअद्वैतपरत्वं, अतात्विकविषयत्वं, तद्विरोधेनाप्रामाण्यंवाकल्प्यते। तदा विप रीतंकिंनस्यात् । अपछेदन्यायस्यनिरस्तत्वात् । सलिलादेर्मानांतराप्राप्त्याऽनु वादकत्वायोगाच्च । सदेवासीदित्यस्यसद्व्यतिरेकेणनासीदित्यर्थोक्तौसविशेषणे हीतिन्यायेन सदात्मकत्वमेवस्यात् । ततश्चसदभेदेनसत्वमुक्त्वापुनरद्वितीयपदे

नतन्निषेधेव्याघातः ॥ सिद्धांतेतु ॥ एकंस्वगतभेदवर्जितं, इदंतु, वृक्षादेः स्वगतोभेदइतिवदतःपरस्यापिसंमतं । एव भेदाभेदरहितं - "भेदाभेदनिवृत्यर्थमेवशब्दोऽवधारक"इतिस्मृतेः । अद्वितीयं-समाभ्यधिकरहितं।"समेद्वितीयशब्दःस्यादि"तिस्मृतेः । "एकएवाद्वितीयोभगवांस्तत्सदृशःपरोनास्तीति"श्रुतौ,"ज्ञानानंदाद्यभिन्नत्वादेकःसर्वोत्तमत्वतः । अद्वितीयोमहाविष्णुःपूर्णत्वात्पुरुषःस्मृत" इतिस्मृतौच तथाव्याख्यातत्वाच्च। द्वितीयाभावस्यभावाभावाभ्यां व्याघातेनाद्वितीयशब्दस्यतत्परत्वासंभवाच्च ॥ तदुक्तं ॥ "यथाचोलनृपःसम्राडद्वितीयोस्तिभूपतिः । इतितत्तुल्यनृपतिनिवारणपरंवचः । नतुतद्भ्रातृतत्पुत्रकलत्रादिनिवारकम्" । तस्मात् । "एकएवाद्वितीयोसावाकाशेसविते"तिवत् । "एकमेवाद्वितीयंसदग्र"इत्यापियोज्यतामिति । किंच,"अधिकंहिविजातीयंसजातीयंसमंभवेत् ।गुणादिकंतुस्वगतंतद्भेदोऽत्रनिषिध्यते" । परमतेपि, एक, एव, अद्वितीयादिपदानामन्यथाव्याख्यातत्वादुक्तरीत्यमिथ्यात्वपरत्वासंभवाच्च नतस्यस्वयमनवतीर्णस्यान्यस्यचैतन्यमात्रपरत्वकल्पकत्वं । किंच, तत्त्वमसिवाक्यस्य चैतन्यमात्रपरत्वेनैक्यपरत्वाभावेत्विष्टापत्तिः । जीवत्वब्रह्मत्वोपलक्षितचैतन्यैक्यपरत्वेचाविशिष्टार्थत्वेनाखंडार्थत्वहानिः । तादृशचैतन्यानुपरक्तैक्यमात्रपरत्वेत्विष्टसिद्धिः । चैतन्यमात्रस्वरूपेऐक्यस्वरूपमात्रेवाविवादाभावेनवाक्यवैयर्थ्यंच । किंच, सर्वज्ञत्वादेः"सत्यःसोअस्यमहिमा, स्वाभाविकीज्ञानबलक्रियाच, नित्याधर्मास्तदीयास्तुसर्वेऽस्मान्नैवभेदिनः"- इत्यादिप्रमाणप्रमितस्य यावद्धर्मिभाविनःपराभिमतोपलक्षणत्वायोगेनामिथ्याभूतसर्वज्ञत्वाद्युपलक्षितात्मस्वरूपमात्रपरत्वमशक्यशंकंच । स्वप्रकाशत्वेन नित्यसिद्धात्मस्वरूपबोधनार्थमुपलक्षणोक्त्यसंभवात् । तज्ज्ञाप्योपलक्ष्यतावछेदकांतराभावात् । उपलक्षणएवतात्पर्येअप्रामाण्यापाताच्चेति । किंच, वाचस्पतिनापि, "अवस्थितेरितिकाशकृत्स्न"इतिसूत्रेनदीसमुद्रा

भेदस्यनिरस्तत्वात । यथापक्षीचसूत्रंचनानावृक्षरसायथा । "यथानद्यःसमुद्रश्च शुद्धोदलवणेयथा । यथा स्तेनापहार्यौचयथापुंविषयावपि। तथाजीवेश्वरौभिन्नौस र्वदैवविलक्षणाविति" स्मृतेश्च।आद्येखंडे "सयथाशकुनिःसूत्रेणप्रबद्धइत्युक्तयोः शकुनिसूत्रयोः, षष्टेलवणमेतदुदकइत्यादिनोक्तयोःलवणोदकयोः, सप्तमे "पुरु षंसोम्यगंधारेभ्य" इत्यादिनोक्तयोःपुरुषगंधारदेशयोः, नवमे "अपहार्षीत्स्ते यमकार्षीदित्यादिनोक्तयोःस्तेनापहार्ययोश्चनैक्यं । स्तेनापहार्यदृष्टांतेहिस्फु टमैक्यज्ञानिनोऽनर्थकथनं । परकीयब्रह्मत्वाभिमानीहिस्तेनः । नतुविद्य मानब्रह्मत्वाज्ञानी । नचसत्यानृताभिसंधिमात्रमिहविवक्षितं । तथात्वेसत्या नृतवाक्यदृष्टांतेन पूर्तेरपहार्षीत्स्तेयमकार्षीदित्यपहारदृष्टांतायोगात् । इत्थं चनवप्रकरण्याअपिन्यायामृतोक्तरीत्या भेदपरत्वमेव । एवंच, एकमेवाद्वि तीयमितिसमाभ्याधिकराहित्यस्योपक्रमात्, ऐतदात्म्यमिति" प्रत्ययस्वारस्येन तस्यैवोपसंहारात्, 'शब्दोनित्यःकृतकत्वात्घटवदि' त्यादाविवभेदपरशकुनि सूत्रादिदृष्टांतानुरोधेनातत्त्वमसीतिछेदेनातत्त्वमसीतिनवकृत्वोऽभ्यासात्, शा स्त्रविनाशास्त्रैकसमधिगम्येश्वरभेदस्याप्रसक्त्याअपूर्वत्वात्, अथसंपत्स्यतइति फलश्रवणात्,येनाश्रुतमित्यर्थवादात्,शकुनिसूत्रादिदृष्टांतैरुपपादनात्,षड्वि धतात्पर्यलिंगानि भेदपराण्येवेति त्वदभिमतोपक्रमादेस्तत्त्वमसीति वाक्यस्य निर्विशेषचैतन्यमात्रतात्पर्यप्रत्यायकत्वेसामर्थ्याभावाद्भवतस्तद्दुराशाविफलैव । ततश्चसाधकसत्वात्, बाधकाभावाच्च परमते विप्रतिपन्नविशिष्टाभेदबोधनप रत्वमेव तत्त्वमसिवाक्यस्य युक्तमिति विषयासिध्यर्थमध्यासवर्णनंभाष्ये अयुक्तमेवेतिस्थितं । यच्च, सेतुदर्शनस्येत्यादि । तदप्यसंबद्धं ॥ तथाहि ॥ बंधमिथ्यात्वस्यासूत्रितत्वादध्यासभाष्यमुत्सूत्रमिति शंकायामिदमुक्तं । "श्रौ तार्थिकभेदेनाद्विविधोहिसूत्रार्थः । तत्रसाधनचतुष्टयसंपत्यनंतरंब्रह्मज्ञानाय

विचारःकर्तव्यइतिश्रौतोर्थः । अर्थादधिकारिविशेषणमोक्षसाधनंब्रह्मज्ञानमि तिसिध्यति । सन्निधानाच्चवेदांतवाक्यविचार"इतिश्रुत्यर्थाभ्यां साधनचतुष्टय संपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदांतविचारः कर्तव्यइतिसूत्रस्य तात्पर्येण प्रतिपाद्योऽर्थोवगतः । एवंचार्थतः सूत्रितस्य प्रयोजनादेरुपपादकं बंधमिथ्या त्वमिति तदपिसूत्रार्थएव । ब्रह्मज्ञानंह्यनर्थहेतुनिवर्हणमर्थात्सूत्रितं । अनर्थ श्च प्रमातृताप्रमुखं कर्तृत्वं, भोक्तृत्वंच । तद्यदि सत्यंस्यान्नज्ञानेन निवर्त नीयं । ज्ञानस्य स्वसमानविषयकाज्ञानतत्कार्यान्यतरमात्रनिवर्तनस्वाभाव्यात् । तद्यद्यज्ञानकार्यंस्यात्तदाब्रह्मज्ञानमनर्थनिवर्हणमर्थादुच्यमानमुपपद्यतइत्यादिना कर्तृत्वादिरूपबंधस्य ब्रह्मज्ञाननिवर्त्यत्वेन तदज्ञानकल्पितत्वरूपंमिथ्यात्वं प्रदर्शितं भवतीति सूत्राक्षिप्तबंधमिथ्यात्वोपपादकमध्यासभाष्यमिति । तत्रे दमुक्तं ग्रंथकृद्भिः । सतिचैवंसंदर्भेसेतुदर्शनस्योपादानेनसह कार्यनिवृत्तिरूप बाधंप्रत्यप्रयोजकत्वादितिवचनमसंबद्धप्रलापएव । अन्यथा अनादिभावेषु दृश्येषु स्वोपादानाऽज्ञानाभावेनोक्तरूपबाधाऽसंभवात्तेषामबाधितत्वापत्तेः । भवन्मते प्रयोजकनाशस्य प्रयोज्यनाशंप्रति हेतुतयेत्यादिना शुक्त्यादिप्रमायाः स्वसमानविषयकाज्ञाननाशद्वारा तत्कार्यरूप्यादिनाशकत्वांगीकारेणाऽज्ञानना शस्य द्वारत्वाभ्युपगमादुपादानेनसह कार्यनिवृत्तिरित्युक्तेरेवायोगाच्च ॥ किंच ॥ उपादानेनसह कार्यनिवृत्तिरूपबाधंप्रति सेतुदर्शनस्याप्रयोजकत्वादि ति वदतः कोभिप्रायः? यदिसेतुदर्शनेन पापस्यकार्यात्मना नाशेपि नकारणा त्मना नाशइत्यात्यंतिकनिवृत्यभावादाद्यसूत्राभिमते विमतोबंधः, मिथ्या - ब्रह्म ज्ञानकार्यं, ब्रह्मज्ञानजन्यात्यंतिकनाशप्रतियोगित्वात् ; शुक्तिसाक्षात्कारनिवर्त्य रूप्यवदिति प्रयोगे, सेतुदर्शनजन्यनाशप्रतियोगिनि पापादौ नव्यभिचारः संभवतीति । तर्ह्यनाद्यविद्याकामकर्मादिबंधेविवक्षितस्य ज्ञानजन्यध्वंसप्रतियो

ग्यज्ञानोपादानकत्वपर्यवसायिनआत्यंतिकनिवर्त्यत्वरूपहेतोरसिद्धिः । किंच सत्यस्यापि ज्ञाननिवर्त्यत्वमास्त्वितिवादिनंप्रत्युक्तज्ञानजन्यध्वंसप्रतियोगिकारणकत्वरूपात्यंतिकनिवर्त्यत्वस्याऽज्ञानकार्यत्वरूपमिथ्यात्वसाधनात्प्राग सिद्धतयाऽन्योन्याश्रयश्च । अनादिदृश्येषु भागासिद्धिश्च । यद्यत्र ज्ञाननिवर्त्यत्वतन्निवर्त्यकारणकत्वान्यतरस्यहेतुता । तदोक्तपापादौ व्यभिचारएव । यदिच ज्ञाननिवर्त्यत्वंनामतत्साक्षात्कारमात्रनिवर्त्यत्वं - तच्चव्रतकलापविशिष्टसेतुसाक्षात्कारनिवर्त्ये नपापेस्ति । आत्मज्ञानेतु नकिंचित्कृतिसाध्यंविशेषणं । कर्मसमुच्चयस्य निवर्तनीयत्वात् । श्रवणादीनां तत्वसाक्षात्कारएवोपक्षीणतयात्माऽज्ञानकार्यबंधस्यात्मज्ञानमात्रनिवर्त्यत्वमिति विवक्ष्यते । तदापि व्यभिचारोऽसिद्धिश्च । साक्षात्कारमात्रनिवर्त्यत्वंतु नाशंप्रति प्रतियोगिनोपि हेतुतया तत्साक्षात्कारेतरसाक्षात्काराकारणकतत्साक्षात्कारकारणकनाश प्रतियोगित्वरूपमेवैष्टव्यं । ततश्च व्रतकलापस्य साक्षात्काररूपत्वाभावात्पापे व्यभिचारः । श्रवणादेस्तत्वसाक्षात्कारोपक्षीणत्वे व्रतकलापस्यापिसेतुसाक्षात्कारएवोपक्षीणत्वेन तन्मात्रनिवर्त्यत्वस्य पापे अनैकांतिकत्वापातात्, भाषाप्रबंधादिजन्यब्रह्मज्ञानस्य वैराग्यादेर्वैयर्थ्यापातेन मोक्षकारणत्ववारणाय नियमाधीतवेदांतश्रवणादिजन्यादृष्टतज्जन्यशक्तिविशेषविशिष्टात्मज्ञानस्यैव श्रवणविधेर्नियमविधित्ववादिनावश्यवक्तव्यत्वाच्च तन्मात्रनिवर्त्यत्वस्यासिद्धिश्च । किंचात्र निवृत्तिशब्देन नाशविवक्षायामनित्यत्वलाभेपि न मिथ्यात्वलाभः । निषेधविवक्षायामसत्वापातः । तात्विकत्वेन निषेधेतु निर्धर्मकब्रह्मवद्घटादेरपि स्वरूपेण मिथ्यात्वालाभः । अन्योन्याश्रयः । अनवस्थाच । पारमार्थिकत्वस्यापि पारमार्थिकत्वाकारेणैव निषेधेन तत्परंपरायाअविच्छेदात् । एवंचात्मान्यसन्नाशत्वावच्छिन्नंप्रति आत्मसक्षात्कारत्वेन हेतुत्वे लाघवात्, ज्ञाननिवर्त्यत्वेन मिथ्या

त्वाशा निष्फलैव । नचात्मज्ञानस्य प्रयोजकाज्ञाननाशद्वारा प्रयोज्यजगन्ना
शंप्रति प्रयोजकत्वादज्ञानस्य प्रयोजकत्वप्राप्त्या जगतस्तदुपादानकत्वरूपं
मिथ्यात्वं सिध्यति । तथाच समानविषयकाज्ञानतत्प्रयुक्तान्यतरत्वसंबंधावच्छि
न्न - प्रमानिष्टकारणताक - नाशप्रतियोगित्वरूपंज्ञाननिवर्त्यत्वं मिथ्यात्वव्या
प्यं । पापादिनिष्टकार्यतातु नतादृशी । पापादेः सेत्वाद्यज्ञानाकार्यत्वात् ।
ततश्च सेतुदर्शननिवर्त्यपापे प्रियदर्शनजन्यनाशप्रतियोगिनि तद्विरहाधीन
दुःखादौच नव्यभिचारः । अज्ञाननाशस्य द्वारत्वंतु प्रयोजकनाशरूपत्वेनैवे
ति जगत्प्रत्यज्ञानस्योपादानत्वरूपप्रयोजकत्वप्राप्त्या जगतअज्ञानोपादानकत्व
रूपमिथ्यात्वसिद्धिरितिवाच्यं । मिथ्यानिष्टप्रातियोगितासंबंधेन नाशत्वाव
च्छिन्नंप्रति । स्वसमानाविषयकाज्ञानतत्प्रयुक्तान्यतरत्वसंबंधेन प्रमात्वेनैक
कारणताकल्पनस्यायुक्तत्वात् । अनिर्वचनीयत्वस्य निराकृतत्वेन मिथ्या
त्वस्यासत्वरूपतया तस्यनाशाभावेन मिथ्यानिष्टप्रतियोगिताघटितकार्यकारण
भावस्यैवायोगात् । अज्ञाननाशस्याप्युक्तप्रमानिवर्त्यत्वेन स्वनाशस्यासहका
रितया तत्रैव व्यभिचाराच्च । किंच, यत्रविपरीतप्रमयारज्वारोपितभुजंगनाशः
तत्प्रयुक्तसत्यभयकंपादिनाशश्चजायते; तत्रोक्तकार्यतावच्छेदकसंबंधेन नाशरूप
कार्यस्य सामग्रीव्यभिचारः । नचकारणतावच्छेदकघटकं प्रयुक्तत्वमुपादेयत्वं,
तच्चनभयादाविति नसामग्र्यधिकरणता भयादेरितिवाच्यं । तथात्वे अनादि
दृश्यानिवृत्तिप्रसंगात् । नच साक्षात्स्वप्रयुक्तत्वं संबंधघटकं तच्चास्त्यनादि
दृश्येषु, नतुभयादाविितिवाच्यं । घटादिप्रपंचस्याऽकाशादिद्वारैवाऽज्ञानोपादा
नकत्वेन साक्षान्मूलाज्ञानकार्यत्वाभावात् । अनादिदृश्यस्यापि जीवेश्वर
विभागादेर्धर्मिप्रतियोगिपरतंत्रतया जीवेश्वरद्वारैवाऽज्ञानप्रयुक्तत्वाच्च । किंच,
नीलपृष्टत्वप्रमायाः स्वसमानविषयकं यन्नीलपृष्टत्वाद्यज्ञानं तत्प्रयुक्तताघटिता

न्यतरत्वसंबंधेन रजतेसत्वात् तदज्ञाननाशस्याप्युक्तसंबंधेन सत्वाच्च, शुक्तित्व व्यंजकनीलपृष्टत्वादिप्रमोत्तरं शुक्तित्वसाक्षात्कारोत्पत्तिसमकालएव तदारोपितरजतनिवृत्यापातश्च । अस्तुवोक्तकार्यकारणभावः । तथापि "विद्वान्नाम रूपाद्विमुक्त" इत्यादिश्रुतयोभवदभिमतमेवज्ञाननिवर्त्यत्वमवबोधयंति, न पापादिसाधारणमिति कथंनिरणायि भवता? लोकसिद्धाज्ञान नाशद्वारककारणतानुवादित्वे वैयर्थ्यप्रसंगेन श्रुतीनामपूर्वार्थतालाभाय सेतुंदृष्ट्वेत्यादिवाक्यवद्विलक्षणकारणताबोधनस्य युक्तत्वात् । नचश्रुतीनांलोकसिद्धकारणतानुवादित्वमेव ज्ञानमोक्षयोः कार्यकारणभावबोधकश्रुतीनां वक्तव्यं । ज्ञानस्याविधेयत्वेन श्रुतीनामप्रमाण्यापातादितिवाच्यं । सेतुदर्शनस्यापि विधेयत्वाभावेनोक्तदोषापत्तेः । नचकेवलस्य तस्य पापनिवर्तकत्वासंभवात् दूरगमनादिव्रतविशेषविशिष्टस्य सेतुदर्शनस्य पापनिवर्तकत्वेन तस्यविशिष्टस्य विधेयत्वसंभवात्तद्विधिर्युक्तइतिवाच्यं । दुर्विज्ञेयातिसूक्ष्मपुरुषार्थसाधनात्मज्ञानस्यापि विधेयत्वस्याऽकरे व्यवस्थापितत्वात् । नच प्रमात्वेन निश्चितात्मज्ञानस्यैवाऽज्ञाननिवर्तकत्वात् प्रमात्वनिश्चयार्थं श्रवणादयउपयुज्यंते; असंभावना विपरीतभावना - निरसनद्वारेतितत्राऽदृष्टविशेषजनने मानाभावेन तादृशादृष्टविशेषस्योक्तप्रमानिष्ट-कारणतावच्छेदकत्वाभावात् तद्विशिष्टतयापि नज्ञानस्य विधेयत्वसंभवइति वाच्यं । तथासति प्रामाण्यनिश्चये नियमेनान्यापेक्षणे तस्य स्वतस्त्वानुपपत्तेः । नच भाषाप्रबंधजन्यज्ञानान्मोक्षस्येष्टत्वात् तद्व्यावृत्यर्थं नियमाधीतवेदांतश्रवणोत्पाद्यादृष्टस्य न कारणतावच्छेदकत्वानुसरणमिति वाच्यं । तर्हि गुरूपसत्ति, वैराग्य, शांत्यादेर्निरर्थकत्वापातात् । नहि गांधर्वशास्त्राभ्यासप्राप्त - षड्जादिस्वरतत्वसाक्षात्कारतुल्ये भवदभिमतात्मसाक्षात्कारे वैराग्यादेरुपयोगोस्ति । नचांतःकरणशुध्यर्थं तदितिवाच्यं । तस्याप्यन

पेक्षणात् । नहिसोयं देवदत्तइत्यादिवाक्यजन्यस्वरूपमात्रप्रमोत्पत्तावंतःकरणशुध्यादिकमपेक्षितं । कथंचिदंतःकरणशुद्धेरपेक्षितत्वेपि श्रवणादिसाध्याऽदृष्टविशेषाधीन - शुद्धिमदंतःकरणोपादानक - साक्षात्कारस्य मोक्षहेतुत्वाभ्युपगमेन तादृशादृष्टविशेषसाध्य - विजातीयशक्तेरेववा कारणतावच्छेदकत्वोक्तौ दोषाभावात् । अन्यथा भाषाप्रबंधादिना ब्रह्मज्ञाने पाक्षिकतया प्राप्तेतद्व्यवच्छेदेन वेदांतवाक्यविचारे नियमविधिरूपाणि जिज्ञासाविधिवाक्यानीत्यादि सिद्धांतलेशादिग्रंथासंगतिप्रसंगात् । किंच शुक्तिप्रमासाधारणरूपेण मोक्षकारणे ब्रह्मज्ञाने भ्रमत्वशंकापनोदनाय श्रवणादय इत्यप्ययुक्तं । भ्रमत्वस्य भवन्मते ब्रह्मज्ञानान्यज्ञानबाधितविषयकत्वरूपत्वे रूप्यंबाधितमितिज्ञानस्यापि भ्रमत्वापत्या बाधिताबाधितयोस्तादात्म्यस्य संसर्गतयावगाहित्वं भ्रमत्वमिति वक्तव्यतया तादृशभ्रमत्वस्य संसर्गाऽनवगाहिस्वरूपमात्रविषयक - निर्विकल्पकात्मसाक्षात्कारे शंकितुमप्यसंभावितत्वात् । तथाच श्रुत्यभिप्रेतो मोक्षहेतुब्रह्मसाक्षात्कारः पापनाशहेतुसेतुसाक्षात्कारइव वैराग्याद्यनेकसाधनसाध्याऽदृष्टपूर्वकत्वरूपविशेषणविशिष्टएववा, तत्साध्यशक्तिविशेषविशिष्टएववा, विवक्षितोवक्तव्यइति, तादृशविशिष्टसाक्षात्कारः सेतुसाक्षात्कारइव विधेयएव । तस्यच शुक्तिप्रमादिविलक्षणरूपेणैव बंधनिवर्तकत्वस्य श्रुत्यभिप्रेतत्वात्तन्निवर्त्यस्य बंधस्य सत्यत्वएव तादृशज्ञाननिवर्त्यत्वस्योपपत्या सूत्राक्षिप्तप्रयोजनार्थमध्यासवर्णनं भाष्ये अयुक्तमेवेतिस्थितं । यद्यपि ज्ञाननिवर्त्यत्वमित्यत्र वार्तिकानुसारेण निवृत्तिस्त्रैकालिकनिषेधइति विवरणव्याख्यावसरे ब्रह्मानंदेनोक्तं । तथापि तस्यकल्पांतरत्वेनोपन्यस्ततया असत्वापत्यादिरूपोक्तदूषणगणग्रस्ततयाच न तदपि मिथ्यात्वसंपादनसमर्थमितिदिक् । तस्मादुक्तं दूषणंसुस्थमितिसिद्धं ॥ ३ ॥

यदपि ।। यत्तु माध्वाइत्यारभ्यपूर्वपक्षस्तु, विषयत्वेनाभिमतंब्रह्म नजीव चैतन्याद्भिन्नं । नापिसविशेषं । वेदांतैश्चोपक्रमादिभिरखंडप्रत्यगात्मस्वरूपमात्र - प्रत्यायनात् । तस्यचाहमिति - भासमानत्वात् । राद्धांतस्तु । ब्रह्म शब्दोक्तगुणपूर्ति - तदभावाभ्यां जीवब्रह्मणोर्भिन्नत्वावगमेन ब्रह्मण्यहंप्रत्यय विषयत्वाभावेन विषयत्वं - संभवतीत्याहुः ।। तन्न ।। मध्वमते पूर्वपक्षो नोपपन्नः । तत्रहि वेदांतानां जीवब्रह्मैक्यपरत्वं मिथ्यावाद्युक्तरीत्या निश्चित्य शास्त्रानारंभ उपपादितः । "तत्राद्वैतस्य सिद्धत्वे न वेदांतस्य गोचरः । सिद्धोपि यदि वेदांतगोचरस्तर्हि गोचरः ।। विचारस्य कथंनस्यादद्वैतेनच सिद्धता । नितांतंतु विचारस्य गोचरः स्याद्यथातथं ।। अद्वैतवाक्यनिचयः कर्मशेषो भवेत्तदा । निष्प्रत्यूहै र्भेदवाक्यै स्तदा भेदः सुनिष्टितः" ।। सिद्धांतोऽप्यनुपपन्नः । सर्वेषां वेदांतवाक्यानां निर्विशेषचैतन्यरूपे ब्रह्मणि तात्पर्यमाश्रित्यकृतस्य पूर्वपक्षस्य निरासाय तद्विजिज्ञासस्वेति विचारविधि वाक्यगोब्रह्मशब्दः मध्वमते स्थापितः । नचैको ब्रह्मशब्दः सर्वानपि वेदांतानुपक्रमादिन्यायै र्निर्णीताद्वैततात्पर्याच्चावयितुं शक्तः । विप्रतिषेधे भूयसां स्यात्स्वधर्मत्वमिति प्रसंगलक्षणन्यायात् । अद्वैते उपक्रमाद्यभावएव सिद्धांतहेतुर्वाच्यः । तमनुक्त्वाब्रह्मशब्दस्यहेतुत्वकथनमयुक्तमिति । तदप्यज्ञानमूलं । तथाहि । चंद्रिकायां "वेदांतैश्चोपक्रमादिभिरद्वैतिरीत्याऽखंड प्रत्यगात्ममात्रप्रत्यायनात् । तस्यचाहमिति स्वप्रकाशतया भासमानत्वादि" त्युक्तं । तत्प्रकाशेपि । अद्वैतिरीत्येति प्रतिपादनाक्लेशायोक्तं । तत्प्रकारश्च । "कथं भूयसां वाक्यानांनिर्विशेषैकात्मबोधकत्वं संगच्छतइति शंकायां युक्त्य सहमप्यद्वैतिभिः सिद्धांतितत्वादस्माभिः पूर्वपक्षितं । नहि परेषां सिद्धांतोऽस्मत्पूर्वपक्षत्वमपि नार्हतीति । ननूपक्रमादिभि र्वेदांतानामखंडप्रत्यगात्म

मात्रपरत्वसमर्थनपरस्य कस्याचिच्छास्त्रस्यानंगीकारे तत्सिद्धिरेव नस्यात् । तदंगीकारेतु तादृशं शास्त्रमंगीकृत्य विषयाभावेन पुनस्तस्यानारंभणीयत्वेन पूर्वपक्षो व्याहतइतिचेन्नैवं । तादृशशास्त्रानंगीकारेपि वेदांताना मुपक्रमादि भि र्वस्तुत आपाततो जातांजीवचैतन्यमात्रपरत्वप्रतीतिमुपेत्य पूर्वपक्षसंभवे न व्याघाताऽप्रसक्तेः । यत्तु, अहमितिभासमानेपि प्रत्यगात्मनि वेदांतवेद्यं शुद्धं नभातीति ॥ यच्च ॥ स्वप्रकाशस्याप्यविद्यावशान्नभानमितिच मूर्खप्रल पनं ॥ तन्न ॥ शुद्धो नभातीति कोर्थइत्यादिना निरासात् । एतेनाक्षस्य प्रबलतत्वात्तद्बाधितावेदांतानाखंडचैतन्यं वेदयितुमलमिति निरस्तं । अद्वैति रीत्येत्युक्तत्वात् । तन्मते तस्य दुर्बलत्वात् । यद्यप्यहंधीविरुद्धं शुद्धं प्रत्यगात्मानं बोधयेयुर्वेदांता स्तर्हिबाधितार्था नविचार्या इत्यपि पूर्वपक्षयितुं शक्यं । तथाप्यद्वैतिरीत्या प्रवृत्तन्यायविवरणानुसारि टीकानुरोधेनैवमुक्त मित्युक्तं ॥ एवं ॥ सिद्धचैतन्यमात्रबोधने श्रुतेरनुवादकत्वं वायुक्षेपिष्टादि वाक्यवत्, विद्वद्वाक्यवच्च न्यायप्राप्तत्वात्सह्यमिति" चंद्रिकात्वितथंव्याख्याता तत्प्रकाशे । नन्वेवं वेदांतानां शुद्धचैतन्यमात्रपरत्वे प्रागुक्तरीत्या ज्ञातज्ञाप कत्वेनाप्रामाण्यं स्यात् । नचतद्युक्तं । अपौरुषेयत्वेनाऽदोषत्वात् । अत स्तदतिरिक्तब्रह्मपरत्वमकामेनापि वक्तव्यमिति तद्विषयकत्वेन विचारआरंभणीय इत्याशंक्य वैदिकदृष्टांतेन तदुपपादयति । सिद्धेति । तत्र यथा देवताभावा दिन्यायप्राप्तमनुवादकत्वं तथा वेदांतानामन्यस्य सत्यस्याभावादित्यादि न्यायप्राप्तमनुवादकत्वं सह्यमित्यर्थः ॥ यत्तु ॥ वायुक्षेपिष्टादिवाक्यस्यविध्यपे क्षितप्राशस्त्यसमर्पणेन फलवत्वात् - विद्वद्वाक्यस्य दर्श, पूर्णमास, पदप्रसि द्धार्थपरत्वसंपादनेन फलवत्वात्, नवैयर्थ्यं । वेदांतानां शुद्धचैतन्यमात्रबो धनेनानुवादकत्वे न किंचित्फलमिति वैषम्यकथनं ॥ तन्न ॥ वेदांताध्ययन

स्याऽदृष्टार्थत्वेनाऽर्थप्रतिपादनेन फलाभावकथनस्यानुचितत्वात् । दृष्टेसत्यदृष्टायोगा द्वायुक्षेपिष्टादिवाक्ये प्राशस्त्यादिकं फलमुक्तमिति । एतेन प्रमाणशिखामणीनां वेदांतानां सिद्धबोधकत्वं सह्यंचेत्तदा पौरुषेयस्यास्य सुतरां तत्सह्यमिति निर्विषयत्वेनाऽनारंभाणीयत्वमयुक्तमिति मूर्खप्रलापोपि निरस्तः । न्यायनिबंधनात्मकत्वादस्य शास्त्रस्य संधिग्धएव न्यायप्रवृत्तेरसंदिग्धे तत्फलाभावान्नेदमारंभणीयमित्युक्तौ दोषाभावात् ।"आत्माब्रह्मेत्यधीतःस्फुरतिसतुसदे" त्यादिवदता त्वयाप्यक्षागमयोरेकविषयकत्वमुपेत्यैव विचारशास्त्रस्य निर्विषयत्वेनानारंभस्य पूर्वपक्षितत्वेन व्याघातात् । अपौरुषेयइव पौरुषेये जपादिना फलाभावाच्चेति ॥ एवं ॥ यथावा परमते शास्त्रयोनिसूत्रे कारणवाक्यमनुमानप्राप्तकारणानुवादीति पूर्वःपक्षः, तथेहापि स्वतःसिद्धप्रत्यगात्मानुवादका वेदांता न विचार्या इति पूर्वःपक्षः । यद्वा प्रमाणभूत - वेदांतवाक्यगतिर्नपूर्वपक्षिणा वाच्या । किंतु, "प्रमेयस्य ब्रह्मणोऽद्वैतिरीत्या स्वप्रकाशप्रत्यगात्माभेदान्नविचार्यतेति प्रमेयाश्रयणेनैव पूर्वपक्ष" इत्युक्तं चंद्रिकायां तत्प्रकाशे च, "यत्तु वेदांतानां ज्ञातज्ञापकत्वेपि प्रामाण्यमंगीकृत्य तेन विचारशास्त्रस्याप्रामाण्यवादः गुरुनतिविषयस्य शिष्यनत्यविषयत्व वादमनुकरोतीति कस्यचित्प्रलपनं । तत्तुच्छं । अनुक्तोपालंभात् । नहिवेदांतानां चैतन्यबोधकत्वेप्यनधिगतार्थत्वेन प्रमाण्यमुपेत्य विचारशास्त्रस्याऽधिगतार्थत्वेनाऽप्रामाण्यमुक्तं । किंतु, वेदांतानां तद्विचारशास्त्रस्यच शुद्धबोधकत्वे निश्चितार्थतया प्रेक्षावदनुपादेयत्वमेव । वस्तुतस्तु । वेदांतानामगत्या चैतन्यबोधकत्वेन याथार्थ्यरूपप्रामाण्यसंभवेपि स्वार्थस्य निश्चिततया तत्रसंदेहविपर्यययोरभावेन तन्निरासक विचारशास्त्रस्यानपेक्षणाद्विचारशास्त्रमिदं नकर्तव्यमिति युक्तः पंथा इत्युक्तं ॥ एवं ॥ अन्येतु ; आत्मनः स्वतः सिद्धत्वेपि प्रमाणतः

सिद्धयभावात् - तत्सिद्धयविषयत्वाद्वा तत्प्रत्यायकानां वेदांतानां नानुवादकते त्याहुः । तदपिन । "ततएवात्मनोविषयत्वस्यापि संभवेन निर्विषयत्वपूर्वपक्षा योगादिति" चंद्रिका । तत्प्रकाशोपि । ""ननुयद्यद्वैतिरीत्या पूर्वपक्षस्तर्हिनानु वादकत्वं वेदांतानां । पूर्वं शुद्धगोचरांतःकरणवृत्तेरभावात् । स्वप्रकाशत्वेपि स्वरूपज्ञानविषयत्वस्य कर्तृकर्मत्वविरोधेनाऽनंगीकारात् । ज्ञातज्ञापकत्वाभा वात् । अन्यथा भामतीमते सिद्धांतानुन्मेषः स्यात् । तथाचाननुवादकत्वं वेदांतानामभ्युपेत्यैव पूर्वपक्षोवाच्य" इत्युत्तानदृशां चोद्यमुट्टंक्य बाधको क्त्या निरस्यति । अन्येत्विति । ननुतन्मते अवेद्यत्वं स्वप्रकाशत्वमित्यंगी कारात् श्रुतितन्मीमांसयोर्निर्विषयत्वं युज्यते । तथाच चैतन्यादन्यस्यासत्य त्वाच्चैतन्यस्य सत्यस्याऽवेद्यत्वान्निर्विषयत्वेन वेदांतानामविचार्यतया नेदं शास्त्रमारंभणीयमित्येव पूर्वपक्षः साधीयानितिचेन्न । टीकायामात्मनः स्वप्रका शत्वेनासंदिग्धत्वोपपादनविरोधात् । अवेद्यत्वे चैतन्यमवेद्यमित्यादि व्यवहा रस्य स्वक्रियाविरोधेनायोगाच्च । कथंतर्ह्यनुवादकत्वमितिचेत् ? अयमाशयः । अनुवादकत्वेहि ज्ञातमात्रज्ञापकत्वं तंत्रं । नतु सजातीयप्रमाणेन । तथाच स्वरूपज्ञानेन सिद्धशुद्धपरत्वेऽनुवादकत्वं स्यादेव । अन्यथा वायुक्षेपिष्ठादि वाक्यस्यानुवादकत्वं नस्यात् । परमते शास्त्रयोन्यधिकरण पूर्वपक्षायोगापा ताच्च । यदपितत्सिद्धयविषयत्वादिति । तदपिन । मामहंजानामीत्यनुभव विरोधात् । अन्यथास्वरूपज्ञानस्य मुक्तौ निर्विषयत्वेन ज्ञानत्वमेव दुर्घटं स्यात् । ननुतर्हिनेयमद्वैतिरीतिः । तन्मते स्वरूपचितः स्वविषयत्वानंगीका रादितिचेदत्राहुः । न सर्वांशे अद्वैतिरीतिः । किंतु वेदांतानां चिन्मात्रपरत्व एव । स्वप्रकाशसिद्धत्वो क्तिस्तु सिद्धांतदिशावा, न्यायप्राप्ततयावा, वास्त वाभिप्रायेणवा, युक्ता । यद्वा परैरपि व्यवहारनिर्वाहकत्वं शुद्धचितोंगीकृतं ।

4

तद्व्यवहारहेतुत्वमेव तद्विषयत्वमिति विवक्षयावा-चित्सुखेन तत्स्वभावस्यापि स्फुरणस्य तद्विषयत्वादित्युक्तत्वात् तद्रीत्यावा पूर्वःपक्षः । यथोक्तं । ग्रंथकृता भावप्रकाशिकायां । "स्वजन्यव्यवहारविषयत्व योग्यत्व लक्षणास्वतः सिद्धिः परैरपीष्यतइति" । तथाचैवंनिष्कर्षः । वेदांतानामखंडप्रत्यगात्मपरत्वमद्वैति रीत्या । प्रत्यगात्मनश्च स्वप्रकाशसिद्धत्वं सिद्धांत्यभिप्रायेणेति निर्विषयत्वहेतु र्युक्तएवेति" । तथाच मुक्तौ सर्वसाम्यमतस्यासंभवदुक्तिकत्वव्यक्तीकरणाय सर्वसाम्यं सिद्धवत्कृत्य सर्वोत्तमत्वबोधक श्रुतिवलेनैव पूर्वपक्षनिरासकमू लानुसारेण रामानुजमतानुसारि पूर्वपक्षइवाद्वैतवादिभिर्निर्विशेषाद्वितीयचैतन्य वाचित्वेपि शास्त्रारंभस्य स्वमते उपपादनपूर्वकमंगीकृतत्वेपि तदुक्तेर्बाधक कबलितत्वेनाऽकिंचित्करत्वाऽसंभवदुक्तिकत्वाद्यभिप्रायेणाऽद्वैतमतानुसारेण पू र्वपक्षः प्रदर्शितइति नकोपि क्षुद्रोपद्रवः । ततश्चाद्वैतस्य सिद्धत्वासिद्धत्वा दिना दूषणाभिधानमसंवद्धमेव । मतांतरे सिद्धत्वेनांगीकृतमनेकदोषदुष्टम प्यद्वैतमवलंब्य कृतस्यपूर्वपक्षस्य तस्योपपत्यादिविरुद्धत्वेनाप्रामाणिकतया नि रवकाशबहुमानसिद्धं जीवेश्वरभेदमाश्रित्यप्रवृत्तस्य सिद्धांतस्य च निराबाध त्वात् । निरसनीयःपक्षोहि पूर्वःपक्षः । किंचभेदस्य प्रतिष्ठितत्वे अद्वैतवाक्य स्य सादृश्यादिगौणार्थपरतया ब्रह्मशेषत्वसंभवे कर्मशेषत्वोक्तिरयुक्तैव । अन्यथा त्वन्मतेपि, तत्रसांख्याः प्रधानंत्रिगुणमचेतनं स्वतंत्रं जगत्कारणमि ति मन्यमाना आहुरित्यादिनेक्षत्यधिकरणभाष्ये सदेवेत्यादिकारणवाक्यस्य सांख्यमतासिद्धप्रधानपरत्वमवलंब्य पूर्वपक्षसिद्धांतयोरप्युक्तविकल्पादि तुल्य योगक्षेमापन्नाविकल्पादिना दूषणसंभवेन स्वव्याहतिर्दुर्वारास्यादिति । एवं सिद्धांतोपि निर्दोषः । तत्प्रकारश्च सिद्धांतसंक्षेपस्त्विति चंद्रिकाव्याख्यावसरे तत्प्रकाशे व्यक्तः । व्यक्तिश्चेत्थं । "अयमर्थः । ब्रह्मशब्दो गुणपूर्तिनिमित्तकः

सन् तद्योग्यमपूर्ववस्तुबोधयत् जीवापूर्णत्वानुभवसाहित्येन जीवाद्भिन्नमेव बोधयति यदा तदानीमेवापूर्णत्वेन जीवंगृण्हन्ननुभवो ब्रह्मपदोक्ताद्गुणपूर्णाद्वस्तुनो भिन्नमेव गृण्हाति । एवंच श्रुतिसाक्षिभ्यांभेदेसिद्धे तदुपजीविनो जीवेशौ भिन्नौ विरुद्धधर्माधिकरणत्वादित्याद्यनुमानस्यापि संभवात्; प्रत्यक्षानुमान, शब्द, रूपप्रमाणत्रितयेन भेदावगतेः जीवस्य स्वप्रकाशत्वेन सिद्धत्वोपि तद्भिन्नस्य ब्रह्मणस्तदभावेनाऽगुणत्वाष्टगुणत्वादिना वादिविप्रतिपत्या संदिग्धत्वाज्जिज्ञास्यमेव ब्रह्मेति" । अत्र यत्केनचित्प्रलपितं । सर्वेषां वेदांतवाक्यानां निर्विशेषचैतन्यरूपे ब्रह्मणि तात्पर्यमाश्रित्य कृतस्य पूर्वपक्षस्य निरासाय सर्व वेदांतप्रतिभटत्वेन प्रयुक्तोयं ब्रह्मशब्दो गुणपूर्तिनिमित्तकः सन्नापि सर्वानापि वेदांतानुपक्रमादि दृढन्यायनिर्णीतादद्वैततात्पर्यात्प्रच्यावयितुं कथंशक्नुयात्? प्रत्युत स्वयमेव तद्गुणभूतत्वात् तदनुगुणमेवाद्वैतवाद्याभिमतं त्रिविधपरिछेदराहित्यरूपमर्थमवलंबते । अतएव "न स्थानतोपी"ति सूत्रे सुधायां सकलश्रुतिस्मृतीतिहासपुराणानां परमेश्वरस्याशेषदोषदूरत्वे तात्पर्यात् कार्यकारणवद्धौ ताविति वाक्यं भगवतो दोषित्वे मानं नेत्युक्तमिति ॥ तन्न ॥ सकलवेदस्य विचारविधायक वाक्यानुगुण्येनैवार्थस्य वाच्यतया सर्वस्य तदधीनत्वेन राजाध्ययनविधिवत्तस्य प्राधान्येन तद्गततया विध्युद्देशगततयाच श्रुतिरूपत्वाच्च ब्रह्मपदस्य बलवत्वात् । श्रुतेश्चाद्वैतवाक्येभ्य स्तदनुगुणोपक्रमादिलिंगेभ्यश्च प्राबल्यस्य श्रुति, लिंग, वाक्य, प्रकरण, स्थान, समाख्यानां, समवाये "परदौर्बल्यमर्थविप्रकर्षादिति" पूर्वतंत्रे - "शब्दादेव प्रमिति" इति ब्रह्मसूत्रेच वक्ष्यमाणदिशा सिद्धत्वात् । एकस्यापि ब्रह्मशब्दस्य धर्मिसमर्पकतयोपजीव्यत्वाच्च । उक्तंच । "द्विविधं बलवत्वंच बहुत्वाच्च स्वभावतः । तयोः स्वभावो बलवानुपजीव्यादिकश्चस" इति । वस्त्वपरिछे

दोब्रह्मशब्दार्थ इत्यस्याग्रेनिरसिष्यमाणत्वेन निरवकाशत्वाच्च । अद्वैतवाक्यानां तदनुगुणोपक्रमादीनांच सावकाशत्वं चान्यत्र न्यायामृतादौ स्पष्टं । किंच विचारविधायकनानावाक्येषु ॐ, ब्रह्म, नारायणात्मादियौगिकशब्दानां सहस्रशःसत्वेन ब्रह्मशब्दस्य तादृशानेकश्रुतिसध्रीचीनत्वाच्च । एकैकस्यापि शब्दस्य "नारायणंमहाज्ञेयं" "नारायणोसौपरमोविचिंत्य" इत्यादिविचारविधायकनानावाक्येषु बहुशः श्रवणेन प्रत्येकं बाहुल्याच्च । नह्येकस्मिन्सूत्रे एकमेवोदाहरणं । विश्वतोमुखत्वभंगप्रभंगात् । वक्ष्यतिच, युक्त्यंतरसूचकत्वादिति । किंच गुणपूर्त्यर्थकेन ब्रह्मशब्देन विषयसिद्धिं वदता सूत्रकृता श्रुत्यनुभवानुमानानां भेदप्रमापकत्वस्य प्रागुक्तदिशोक्तत्वाच्च । प्रत्यक्षानुभवस्यच नवचनसहस्रमपि बाधकमित्यन्यत्रविस्तरः । विस्तरस्तु गुरुपादकृतकंटकोद्धारे कृत इति । एवंच, जीवाभेदपूर्वपक्षे सोत्रब्रह्मपदव्यावर्त्ये प्रदर्शिते जीवव्यावर्तकधर्मसमर्पक ब्रह्मशब्दस्यैवोक्तपूर्वपक्षप्रतिक्षेपदक्षस्य हेतूकर्तव्यत्वमेवोचितं । अद्वैतोपक्रमाद्यभिमतानां सावकाशत्वस्य न्यायामृतादौ स्पष्टत्वादेव निरवकाशोपक्रमाद्यभावःसिद्धइति साक्षादुक्तशंकानिरसनासमर्थत्वात्तस्य हेतुतयानुक्तिरेव युक्तेति । ततश्च । अनात्मनोऽसत्यत्वात् परात्मनश्चेष्टादिलिंगसाध्यत्वेन शास्त्राव्युत्पाद्यत्वात् । परमात्मनश्च, स्वात्मान्यस्य मानाभावेनाभावात् । वेदांतानां पौरुषेयत्वापौरुषेयत्वाभ्यामाप्तोक्तत्वगुणाभावेनप्रामाण्यायोगात् स्वतःप्रामाण्येपि कार्यपरत्वेन सिद्धरूपब्रह्माबोधकत्वात्, सिद्धार्थबोधकत्वेप्यद्वैतिरीत्याऽखंडस्वात्ममात्रपरत्वात्, स्वात्मनश्चाहंधीसिद्धतया असंदिग्धत्वेन विषयत्वायोगात्, देहादिभिन्नत्वाणुत्वादेरप्यनात्मत्वेनासत्यतया विषयत्वासंभवात्; सत्यपिज्ञाने अपवर्गस्यान्यस्यवा फलस्यानुपलंभेन तस्य तत्फलत्वायोगात् । विषयप्रयोजनयोरभावे अधिकारिसंबंधयोः सुतरामभावा

त्, न जिज्ञासाकर्तव्या । ततश्चनशास्त्रमारंभणीयमिति ब्रह्मशब्दव्यावर्त्यस्य पूर्वपक्षस्य, अनात्मपरात्मस्वात्मनासविषयत्वेपि जिज्ञास्ये श्रुतेन यौगिकेन ब्रह्मशब्देनावयवशक्त्या, "अथकस्मादुच्यतेब्रह्मेति, बृहंतोऽस्मिन्गुणा" इति श्रुत्याच देशकालगुणापरिछेदवद्वस्तुवाचिना जीवान्याविष्ण्वाख्यवस्तुसिद्ध्या तस्यच सगुणनिर्गुणाल्पगुणत्वादिना वादिविप्रतिपत्तेः संदिग्धतया विषयत्व संभवात्, तज्ज्ञानोत्थतत्प्रसादजन्य मुक्त्याख्यफलसत्वात्, तदिछोरधिकारिणः संभवेन संबंधस्यापि संभवात्, वेदप्रामाण्यादेश्च मूलग्रंथेषु समर्थनात्, कर्तव्या ब्रह्मजिज्ञासा शास्त्रंचेदमारंभणीयमिति सौत्रब्रह्मशब्दाधीनासिद्धांतस्य च तत्ववाद्यभिमतस्य निर्दोषत्वान्नतत्रोक्तकुकल्पनायुक्ता । तस्मादत्रपरोक्तो दूषणाभासो नोपपत्तिमानित्यसाधुरेवेति सिद्धं ॥ ४ ॥

यदपि ॥ अस्यसूत्रस्यसमन्वयाद्यशेषविचारहेतुत्वात्, शास्त्रप्रथमाध्यायप्रथमपादसंगतयइतिकल्पतरावुक्तं । यत्तु, द्वितीयाध्यायव्यावृत्तस्य प्रथमाध्यायादिना संगतिविशेषस्यानुक्तत्वात्कल्पतरूक्तमयुक्तमिति ॥ तन्न ॥ प्रथमाध्यायवत् द्वितीयाध्यादिसंगतत्वादस्याधिकरणस्य द्वितीयाध्याये संघटनापत्तिरिति भवदभिप्रायो वक्तव्यः ॥ सचासंगतः ॥ साधारणत्वेपि प्रथमातिक्रमे कारणाभावात् प्रथमाध्यायएव संगत्याएतदधिकरणसंघटनस्ययुक्तत्वादिति । तदप्यसारं । भावानवबोधात् । तथाहि । समन्वयाद्यशेषविचारपरत्वस्य शास्त्रसंगतिप्रयोजकत्ववत्, अध्यायचतुष्टयसंगतिप्रयोजकत्वात्, विशेषाकारेण शास्त्रसंगत्यतिरिक्ताद्याध्यायपादसंगतिविशेषस्यानुक्तत्वाच्चाविशेषेण शास्त्राध्यायपादसंगतयइति वक्तव्ये विशिष्याध्यायपादयोः प्रथमपदग्रहणे कारणाभावेन तत्रप्रथमेतिविशेषणसमर्थनाय द्वितीयाध्यायादिव्यावृत्त संगतिविशेषस्यावश्यवक्तव्यस्यानुक्तेस्तथोक्तिरनुचितेति विवक्षायामुक्तप्रलाप

स्यासंबद्धत्वादिति ॥ किंच ॥ अध्यायचतुष्टयसाधारणसंगतिमुक्त्वा प्रथमा ध्यायएवेत्यवधारणानुपपत्तिः । तस्मादुक्तं दूषणं सुस्थमितिसिद्धं ॥ ५ ॥

यदपि ॥ विवरणे श्रोतव्यादिवाक्यानां स्वार्थे समन्वयस्य तत्सम न्वयद्वारेण विचार्यमाणवेदांतवाक्यानां ब्रह्मणि समन्वयनिमित्तत्वादाद्यसूत्रं समन्वयेनसंगतमित्युक्तं ॥ यत्तु ॥ तत्तद्वाक्यस्य स्वार्थे समन्वयमात्रेण सम न्वयाध्याय संगतौ द्वितीयाध्यायगताधिकरणानामपि समन्वयसंगतिप्रसंगः । विचारकर्तव्यतामुखेन समन्वयंप्रतीवाविरोधंप्रत्यप्यस्याधिकरणस्य निमित्त त्वात् । द्वितीयाध्यायादिव्यावृत्तस्य प्रथमाध्यायेनसंगतिविशेषस्यासिद्धिः । पादसंगत्यनुक्तिश्चेति ॥ तन्न ॥ द्वितीयाध्यायादेर्ब्रह्मणि वेदांतसमन्वयहेतु भूतसमन्वयपरत्वाभावेन तदीयाधिकरणानां समन्वयाध्यायसंगतत्वाभावात् । जिज्ञासाधिकरणस्य येन समन्वयेन द्वारभूतेनाविरोधहेतुत्वं तेनैव संगतत्वे नाविरोधाध्यायसंगतत्वाभावात् । उपोद्घातरूपस्यास्याधिकरणस्य स्पष्टब्रह्म लिंगवाक्यविचाररूपत्वस्यातिस्फुटत्वात्, प्रथमपादसंगत्यनुक्तिरित्यलमिति । तदप्ययुक्तं । अन्यथानुवादात्; अपार्थकथनाच्च । तथाहि । "श्रोतव्यादि वाक्यानां स्वार्थेसमन्वयस्य तद्द्वारेण विचार्यमाणवेदांतवाक्यानामपि ब्रह्मणि समन्वयस्यच निमित्तत्वादिति" चंद्रिकावाक्यानि । तदर्थस्तु । आद्यसूत्रस्य ब्रह्मविचारविधायकवाक्यार्थनिर्णयकतया विचाररूपत्वात् तस्य विचारविधा यकश्रोतव्यादिवाक्यस्य ब्रह्मज्ञानाय वेदांतविचारकर्तव्यतारूपार्थप्रतिपा दकत्वात्मकसमन्वयहेतुत्वेन तस्यसमन्वयाध्यायसंगतौ द्वितीयाध्यायादिगत स्मृत्याद्यधिकरणानामपि पाशुपतादिस्मृतिविरुद्धानां यतोवेत्यादि वेदांत वाक्यानां विष्ण्वादिकर्तृतारूपस्वार्थपरत्वाभावशंकापनोदनद्वारा तत्तद्वाक्य स्य तत्तदर्थरूपस्वार्थप्रतिपादकत्वात्मकसमन्वयहेतुत्वप्राप्त्या तेषामपि समन्व

याध्यायसंगतत्वं युक्तमेवेति। सतिचैवं समन्वयाध्यायसंगतत्वाभावादित्युक्तिः कथमुपपत्तिमतीस्यादिति। किंच ब्रह्माणि वेदांतसमन्वयहेतुभूतसमन्वयपरत्वा भावेनेत्यादिकथनमत्यंतासंबद्धं। "स्वार्थे समन्वयस्य; ब्रह्मणिसमन्वयस्य चेति" चंद्रिकायां चशब्दस्य सत्वेनोक्तसमन्वयद्वयस्य मिथोहेतुहेतुमद्भावस्या लब्धत्वात्, पृथक्पृथक्तत्तत्समन्वयनिमित्तत्वस्यैवलाभाच्च॥ किंच॥ द्वारभूतेन समन्वयेनेत्युक्तिरप्ययुक्ता। "सकलशास्त्रसमन्वयेन जन्मादिकार णत्वे, सकलगुणपूर्णत्वेच, परस्यब्रह्मणोऽभिहितएवहि तत्रविरोधः स्फुरति। नान्यथा, निराश्रयत्वात्। विरोधस्फूर्ताविव तदभावसाधनस्यावसरो नेत रथा। अतआद्याध्यायार्थस्य कारणत्वं, द्वितीयाध्यायार्थस्य कार्यत्वं, निश्ची यते। ततश्चाद्याधिकरणस्य समन्वयद्वारेणाविरोधहेतुत्वं। तथाश्रुतिसमन्वये नोपपादितोऽप्यर्थो नतावच्छ्रोतृणां दृढनिरूढोभवति; यावदत्र प्रतीतविरो धाभावो नसाध्यते, विरोधेन श्रुतीनामेवाप्रामाण्यशंकनात्। तथाचानुपपादित कल्पएवापद्यते। विरोधाभावसाधनेतु भवत्येव दृढनिरूढः। यथोक्तं। "विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय" इति। अतो विपरीतकार्यका रणभावलक्षणा तयोःसंगति" रिति सुधोक्तदिशा अविरोधद्वारा समन्वयसंगतत्व स्यापि संभवेन, तेनैवसंगतत्वेनेत्यवधारणायोगात्। किंचाद्यसूत्रस्य विचारक र्तव्यता द्वारैवोक्तसमन्वयंप्रति हेतुत्वात्। समन्वयनिमित्तत्वादिति विवरण वाक्ये साक्षान्निमित्तत्वविवक्षायां समन्वयाध्यायसंगतिरपि नस्यात्। निमि त्तत्वमात्रविवक्षायांतु द्वितीयाध्यायादिसंगतिरवर्जनीया। यदप्युपोद्घातरूप स्येति। तदप्ययुक्तं। "यद्यप्येतदधिकरणाभावे शास्त्रस्यैव तदेकदेशयोरध्याय पादयोरप्यारंभासंभवः।तथापि सिद्धेशास्त्रारंभे पुनरध्यायाद्यारंभपूर्वपक्षस्यानेना समाधानात्, शास्त्रेणेव नताभ्यामौपोद्घातिकीसंगति" रिति पूर्वमेवचंद्रिका

यामुपोद्घातत्वस्य दूषितत्वात् । ननु विचारकर्तव्यता समर्थनेन शास्त्रारंभ सिद्धावपि समन्वयाध्यायोऽनारंभणीयइति शंकायाः जीवभेदकगुणपूर्तिवाचि ब्रह्मशब्देन समाधानमस्ति।अन्यथा गुणपूर्त्यर्थकसमन्वयानारंभः स्यात् ।तथाच कथमध्यायासंगतिरितिचेन्न । तथासत्युक्तरीत्या अविरोधाध्यायारंभप्रयोजकत्व स्यापि सत्वेन ततोव्यावृत्तस्याद्याध्यायेन संगत्यंतरस्याभावात् । पादचतुष्टय द्वारैवाध्यायचतुष्टयात्मकशास्त्रारंभप्रयोजकत्वाच्च । ततश्चाध्यायपादौ प्रत्युपो द्घातरूपत्वमेवासिद्धं । अस्तुवातत्, तथापि । स्पष्टब्रह्मलिंगवाक्यविचार रूपत्वस्येवाऽस्पष्टब्रह्मलिंगवाक्यविचाररूपत्वस्यापि सत्वेन तस्य स्पष्टत्वात्पा दसंगत्यनुक्तिरयुक्तैव । उपोद्घातत्वमात्रेण स्पष्टब्रह्मलिंगवाक्यविचाररूपत्व स्यातिस्पुटत्वोक्त्ययोगात् । कथंचित्तस्य तत्प्रयोजकत्वे अस्पष्टब्रह्मलिंगवाक्य विचाररूपत्वस्यातिस्तुटत्वंप्रत्यपि प्रयोजकत्वेन प्रथमपदग्रहणस्याऽनुचितत्वा दित्यलंदुर्बलविशसनेनेति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ ६ ॥

यदपि ॥ अत्रायमथशब्द आनंतर्यार्थः परिगृह्यते । नाधिकारार्थः । ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति भाष्यं ॥ यत्तु ॥ जिज्ञासाया आरभ्यत्वा संभवेपि विवरणोक्तरीत्या जिज्ञासापदलक्ष्यार्थविचारस्यारभ्यत्वसंभवइति ॥ तन्न ॥ लक्ष्यार्थस्यारभ्यत्वेपि शक्यार्थमादायैवाचार्यैरनारभ्यत्वोक्तेरिति । तदसाधीयः । अस्य भाष्यस्यभामती, विवरण, मतद्वयसाधारण्येन भामती मते जिज्ञासाशब्दस्य विचारलक्षकताया दूषितत्वेन तन्मतरीत्योक्तभाष्यस्या बाधितार्थत्वेपि विवरणमते विचारलक्षकत्वेन स्वार्थपरत्वाभावाद्विवरणाभिप्रेत जिज्ञासापदार्थस्यारभ्यत्वसंभवेन तन्मते शक्यार्थविवक्षायाएवाभावादुक्तभाष्य स्य योजयितुमशक्यत्वेन तद्रीत्या बाधितार्थत्वापत्योभयसाधारण्याभावप्राप्त्या विवरणमतस्योद्भाव्यत्वादिकं स्यादित्यत्रग्रंथकृतां तात्पर्यात् । अतएवोक्तं ।

विवरणोक्तरीत्येति । तस्मादुक्तं दूषणं सुस्थमितिसिद्धं ॥ ७ ॥

यदपि ॥ "मंगलस्यच वाक्यार्थे समन्वयाभावादिति" भाष्यस्य "पदार्थ एवहि वाक्यार्थे समन्वीयते । सचवाच्यो लक्ष्योवा । नचेह मंगलमथशब्द वाच्यं लक्ष्यंवेति" भामती । यत्तु । पदार्थत्वस्य वाक्यार्थान्वयंप्रति हेतुत्वे अन्योन्याश्रयइति ॥ तन्न ॥ वाक्यार्थानन्वितस्यापि घटइत्येकपदमात्रप्रयोज्य स्मृतिविषयस्य घटरूपार्थस्य पदार्थत्वसंप्रतिपत्या अन्योन्याश्रयाभावादिति । तच्चंद्रिकावाक्यार्थाऽज्ञानमूलं।अन्यथानुवादात् "अपदार्थत्वहेतौ समन्वयाभावे, पदार्थएवहि वाक्यार्थे समन्वीयते; सचवाच्यो, लक्ष्योवा ! नचेह मंगल मथशब्दवाच्यं लक्ष्यं वेत्युक्तस्यापदार्थत्वस्य हेतुत्वे अन्योन्याश्रयापातादिति हि चंद्रिकावाक्यानि । तदर्थश्च । भाष्येहि मंगलस्यापदार्थत्वं साध्यं कृत्वा वाक्यार्थेसमन्वयाभावोहेतूकृतः । भामत्यांतु । समन्वयाभावंसाध्यंकृत्वा अपदार्थत्वं हेतूकृतं । तथाच। हेतुसिद्धौ साध्यसिद्धिः ; साध्यसिद्धौच हेतु सिद्धिरित्यन्योन्याश्रयइति । नचमंगलस्य वाक्यार्थे समन्वयाभावप्रयोजकम पदार्थत्वं पदाप्रतिपाद्यत्वं तत्प्रयोज्यमपदार्थत्वंतु पदतात्पर्यगोचरत्वाभावइति" नान्योन्याश्रयइति वाच्यं । मंचाःक्रोशंतीत्यादौ पदप्रतिपाद्यस्यापि मंचादे र्वाक्यार्थे समन्वयाभावेन पदतात्पर्यगोचरत्वाभावस्य तत्प्रयोज्यस्यैव प्रयो जकत्वप्राप्त्याऽन्योन्याश्रयस्य दुर्वारत्वात् । सतिचैवं वाक्यार्थानन्वितस्या पीत्यादिप्रलापः कथं स्वस्थात्मनोयुक्तः स्यादित्यास्तां विस्तरः ॥ ८ ॥

यदपि ॥ "मंगलस्यचे"त्युक्तभाष्यस्य "मंगलस्य जिज्ञासाकर्तृत्वे प्रमा णाभावात् नकर्तृत्वेन जिज्ञासायामन्वयः - नापिसामानाधिकरण्येन जिज्ञासा मंगलमित्यस्यार्थवादत्वप्रसंगादिति" विवरणं । यत्तु ; भवत्पक्षे "ईक्षतेर्नाशब्द मिति" वत्मंगलत्वाज्जिज्ञासाकर्तव्येति हेतुत्वेनान्वयोपपत्तिरिति ॥ तन्न ॥

जिज्ञासाया मंगलकरत्वेपि मंगलत्वाभावेन तत्र तस्य हेतुत्वेनान्वयासंभवा दिति ॥ तदसाधु ॥ जिज्ञासाकर्तव्यत्वे हेतुत्वेन मंगलस्यान्वयसंभवादथशब्दा र्थत्वं मंगलस्य स्यादेवेति समन्वयाभावादिति भाष्योक्तो हेतुरसिद्धइति चंद्रिकाशयः । तत्र "कल्याणं मंगलं शुभमिति" कोशरीत्या मंगलशब्दस्य श्रेयःसाधनरूपशुभार्थकत्वात् । शास्त्रेपि पुरुषार्थसाधनव्यापारस्यैव मंगलत्वो क्तेः, "मंगलानांचमंगलमि"ति भगवतः परममंगलत्वाभिधानाच्च जिज्ञासाया उक्तरूपमंगलत्वस्य निराबाधतया तत्रमंगलत्वानुपपत्यभावात् । अतएव तत्र तत्र मुख्येष्टे तत्साधने च मंगलशब्दव्यवहारइति । तस्मादुक्तं दूषणंसुस्थ मिति सिद्धं ॥ ९ ॥

यदपि ॥ "प्रकृतापेक्षायाश्च फलतआनंतर्याव्यतिरेकादिति" "भाष्यस्या नंतर्यार्थत्वइव पूर्वप्रकृतार्थत्वेपि जिज्ञासाहेतुभूतस्य प्रकृतस्य लाभात्- फलाभेदाद्यर्थ आनंतर्यार्थत्वाग्रहोऽस्याकमिति" भामती ॥ यत्तु ॥ पूर्वप्रकृता पेक्षार्थत्वे अथशब्दआनंतर्यार्थः परिगृह्यत इत्यसांगत्यापातः । सूत्रे कल्पांतरानुपन्यासेन जिज्ञासाहेतुभूतस्य प्रकृतस्य लाभोप्यशक्यइति ॥ तन्न ॥ आनंतर्यार्थइतिव्याख्यानपदस्यपूर्वप्रकृतापेक्षार्थइति व्याख्यान पदापेक्षयाऽल्पाक्षरत्वलाघवात्; आनंतर्यार्थःपरिगृह्यतइत्युक्तेःसुसंगतत्वात् । सूत्रे कल्पांतरानुपन्यासेनेत्युक्तिरसंगता, नित्यानित्यवस्तुविवेकादिमुमु क्षुत्वांतस्य "तद्यथेहकर्मचित" इत्यादिवेदसिद्धस्यब्रह्मजिज्ञासापदघटकी भूतपरब्रह्मार्थकब्रह्मशब्देन "वेदस्तत्वं तपोब्रह्मेति" रीत्योपस्थापितवे दस्यापि परामर्शिना सौत्रातःशब्देन "तद्यथेत्यादि" विवेकादि बोधक वेदेन पूर्वमुपस्थापितत्वात्, अथशब्दस्य पूर्वप्रकृतापेक्षार्थत्वोपपत्तेः, भामती, कल्पतरूक्तातःशब्दार्थरीत्या सिद्धत्वादिति । तदिदमज्ञानादिमूलं । तथाहि ।

इत्थंहि तद्भाष्यं भामत्यां व्याख्यातं । "अयमथशब्दो विनैवानंतर्यार्थत्वं पूर्वापेक्षार्थो भविष्यति । तद्यथेममेवाथशब्दं प्रकृत्यविमृश्यते । किमयमथ शब्दआनंतर्ये, अथाधिकारइति । अत्रविमर्शकवाक्ये अथशब्दः पूर्वप्रकृत मथशब्दमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षांतरोपन्यासे नचास्यानंतर्यमर्थः । पूर्वप्रकृतस्य प्रथमपक्षोपन्यासेन व्यवायात् । नचप्रकृतानपेक्षा । तदनपेक्षस्य तद्विषयत्वाभावेनासमानविषयतया विकल्पानुपपत्तेः । नहिजातुभवति, किं नित्यआत्मा, अथानित्याबुद्धिरिति । तस्मादानंतर्यंविना पूर्वप्रकृतापेक्षइहाथ शब्दः । कस्मान्नभवतीत्यतआहेति; पूर्वप्रकृतापेक्षार्थोऽथशब्दइति शंकानि रासकमिदं भाष्यमित्यवतार्य, नवयमानंतर्यार्थत्वं व्यसनितया रोचयामहे ; किंतु, ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतासिद्धये । साच, पूर्वप्रकृतापेक्षार्थत्वेप्यथ शब्दस्य सिध्यतीति व्यर्थआनंतर्यार्थत्वावधारणाग्रहोऽस्माकमिति" । कल्प तरौच, "किंपूर्वप्रकृतादथशब्दादानंतर्यमुतनिरंतरादानंतर्यपक्षात्? नाद्यइ त्याह । पूर्वप्रकृतस्येति । द्वितीये, पूर्वप्रकृतमथशब्दमपेक्ष्य किंनिरंतरादानं तर्यार्थत्वपक्षादानंतर्यंब्रूयात् । द्वितीयोऽथशब्दोऽधिकारार्थत्वपक्षस्य, उत, अनपेक्ष्यैव । नाद्यः । अवश्यापेक्षणीयत्वात्पूर्वप्रकृतापेक्षाया अथशब्दस्य तादर्थ्येसत्यर्थांतरकल्पनानवकाशात् । नद्वितीयइत्याह । नचप्रकृतानपेक्षेति । एकधर्म्यपेक्षणेहि तन्निरूपकयोः पक्षयोस्तुल्यार्थत्वेन विकल्पः कल्पतइत्यर्थः । नानेन भाष्येण पूर्वप्रकृतापेक्षाया आनंतर्यरूपत्वमुच्यते ; विकल्पाप्रतिभाना त् । किंतूभयत्रप्रकृतासिद्धिरस्ति प्रयोजनमिति"भामतीव्याख्याता । परिमलेतु, "विकल्पाप्रतिभानादिति । यत्र विकल्पप्रतिभानं, तत्रैव पूर्वविकल्पप्रकृत तद्धर्म्यपेक्षार्थकः ; विकल्पांतरमुखे अथशब्दः प्रसिद्धोनान्यत्रेत्याशय" इति कल्पतरूर्व्याख्यातः । चंद्रिकायांतु, "तर्हि भाष्ये आनंतर्यार्थइत्युक्त्ययुक्तिः

सूत्रेकल्पांतरानुपन्यासेन पूर्वप्रकृतापेक्षार्थत्वमशक्यशंकंच । किंच, किंनित्यः शब्दः अथानित्य ? इत्यादिकल्पांतरोपन्यासेपि सामानाधिकरण्यार्थ मनुषक्तस्यधर्मिणोऽनित्यइत्यत्रापेक्षायामपि न सा अथशब्दार्थः । अन्यथा, उतानित्यइत्यादावुतादेरपि पूर्वप्रकृतापेक्षार्थत्वं स्यात्"इत्युक्तं। व्याख्यातंच तद्वाक्यं प्रकाशे । "तर्हि,आनंतर्यार्थत्वाग्रहाभावे ; पूर्वप्रकृतापेक्षोवा आनंतर्यार्थोवेत्येवोक्तिः स्यादिति भावः । नन्वतएव,भामत्यां-परमार्थतस्तु कल्पांतरोपन्यासे पूर्वप्रकृतापेक्षा, नचेह कल्पांतरोपन्यास इति पारिशेष्यादानंतर्यार्थ"इत्युक्तमित्यत आह । सूत्रइति । किंनित्यः शब्दः ? अथानित्य ? इत्यादावनित्यइत्यादेरिवाथातोब्रह्मजिज्ञासेतिसूत्रे उत्तरत्र कल्पांतरानुपन्यासात् । अतो ब्रह्मजिज्ञासेत्यादिशब्दैः कल्पांतराप्रतीतेः । कल्पांतराभावे च तत्संबंधिन्याः प्रकृतापेक्षाया एवाभावात् । अनेनैतच्छंकानिरासाय प्रवृत्तो भाष्यकारस्तद्व्याख्यानार्थं प्रवृत्तो भवांश्चत्यंतानभिज्ञ इत्युक्तं भवति । किंचाथशब्दस्य पूर्वप्रकृतापेक्षार्थत्वस्य कुत्राप्यभावात्प्रकृते तच्छंकात्यंतानुचितेत्याह । किंचेति । सा पूर्वप्रकृतापेक्षा, किंतुपूर्वप्रकृतादर्थांतरत्वमितिभावः । कुतइत्यतआह । अन्यथेति । आदिशब्दादाहोस्विदित्यादिग्रह" इति । तथाचोक्तरीत्या भामत्यामेव कल्पांतरोपन्यासाभावेन पूर्वप्रकृतापेक्षार्थत्वासंभवादानंतर्यार्थत्वाग्रइतिसोपपत्तिकमुक्तेप्यतःशब्देन प्रकृतविवेकादेः पूर्वप्रकृतपदार्थत्वं - अल्पाक्षरत्वेनानंतर्यार्थइत्युक्तिरितिच वदन्नुत्तानदृगयमर्वाचीनः कथंस्वपरमताभिज्ञः स्यादित्यलं । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ १० ॥

यदपि ॥ उक्तभाष्यस्य "प्रकृतादर्थांतरत्वंहि यतःकुतश्चित्प्रकृताच्चेद्यर्थं पुष्कलकारणाच्चेदानंतर्याभिधानं विना करणत्वासिद्धेरानंतर्याभिधानेच

प्रकृतादर्थांतरत्वस्यांतर्णांततया सिद्धिरिति" विवरणं । यत्तु । आनंतर्यानभिधानेपिवैयर्थ्यपरिहारार्थमेव प्रकृतस्य हेतुत्वसिद्धिः । अन्यथा आनंतर्यार्थत्वेपि तत्प्रतियोगिनो हेतुत्वासिद्धिरिति ॥ तन्न ॥ परमानंदो मोक्षः ज्ञानंतु संपादनीयमित्यत्र ज्ञानात्पूर्वं प्रकृतस्य ज्ञानजन्यफलत्वसंप्रतिपत्तेर्वैयर्थ्यपारिहारार्थं प्रकृतस्य हेतुत्वसिद्धिरिति भवद्वचनस्य तत्रव्यभिचारात् । आनंतर्याभिधानेतु ; आनंतर्यप्रतियोगिनः प्रकृतस्य फलत्वासंभवेन हेतुत्वं सिध्यतीति विवरणाभिप्रायादिति । तदप्यज्ञाननिबंधनं । तथाहि । चंद्रिकाप्रकाशे । "प्रकृतादर्थादर्थांतरत्वंहि यस्मात्कस्माच्चित्प्रकृतानुपयुक्तादर्थांतरपरत्वंवा ? उतविचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणरूपात्प्रकृताद्वेति ? विकल्प्याद्ये, व्यर्थमित्युत्तरं । तस्यावचनेपि सिद्धत्वात् । द्वितीयेत्वाह । आनंतर्याभिधानमिति । पूर्वप्रकृतस्य कारणत्वं ह्यानंतर्यस्याथशब्दार्थत्वे सत्येवलभ्यते । आनंतर्यस्य कारणानंतर्ये मुख्यत्वेनानंतर्यप्रतियोगिनः कारणत्वलाभादिति भावः । ननु प्रकृतादर्थादर्थांतरत्वस्यापि वक्तव्यत्वादथशब्दस्यावृत्तिः स्यादित्यत आह । आनंतर्याभिधानेचेति । एतदनंतरमिदमित्युक्त्यैवार्थांतरत्वस्य लाभात्पूर्वापरभावस्य भेदप्रयुक्तत्वादित्यर्थ "इति विवरणाभिप्रायमुक्त्वा चंद्रिकापीत्थंव्याख्याता "आनंतर्यार्थत्वे अथशब्दस्योक्ते यथानंतर्यप्रतियोगिनः प्रकृतस्यकारणत्वलाभस्तथाप्रकृतादर्थादर्थांतरपरत्वेपि, यतःकुतश्चित्प्रकृतादनुपयुक्तादर्थादर्थांतरपरत्वे प्रकृतानुपयोगेन वैयर्थ्यादेव विचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणादेवार्थांतरत्वस्य प्राप्त्या प्रकृतस्य हेतुत्वं लभ्यतइति तदर्थं नानंतर्यार्थत्वाग्रहः कार्यइत्याह । आनंतर्यानभिधानेपीति । अयंचनिर्वाहस्तवापि तुल्यइत्याह । अन्यथेति । एवमवचन इत्यर्थः । आनंतर्यमपिद्वेधा । यस्मात्कस्माच्चिद्वा ? विचारकर्तव्यतोपयुक्तकारणकलापाद्वा ? तत्राद्यस्यवैय

र्थ्यमेवोत्तरं । सर्वस्यापि लोकस्य किंचित्करणानंतरमेवकस्य चित्करणस्य स्वभावसिद्धत्वात् । अतो वैयर्थ्यपरिहारार्थमेव द्वितीयमेष्टव्यमित्याशय" इति । तथाचैतच्छंकायास्तत्रैव समुन्मूलितत्वादिदं मृतमारणमेवेति । किंच, भवद्व चनस्य तत्रव्यभिचारादित्युक्तिरेवासंगता । व्यभिचारस्य वचनदोषत्वाभावात् । वस्तुतस्तु । परमानंदो मोक्षइतित्वदुदाहृतस्थलेपि यतःपरमानंदो मोक्षस्तस्मा त्तदर्थं ज्ञानं संपादनीयामितिवाक्यार्थो वक्तव्यः । अन्यथा पूर्वोत्तरवाक्ययो रसांगत्यापत्तेः । तथाच मोक्षहेतुभूत ज्ञानस्य संपादनीयत्वं प्रति मोक्षस्य परमानंदरूपत्वं हेतुरेव । ततश्च प्रकृतस्य हेतुत्वसिद्धिस्तत्रापि निराबाधैव । तस्मान्मोक्षस्य परमानंदरूपत्वज्ञानाभावे तत्प्रयोजनकज्ञानसंपादने प्रवृत्त्ययो गेन तत्राप्युक्तरीत्या हेतुहेतुमद्भावेनान्योन्यान्वयस्यावश्यं वक्तव्यत्वादुक्तं दूषणं सुस्थमितिसिद्धं ॥ ११ ॥

यदपि ॥ यत्तु, अध्याहृतकर्तव्यपदस्य भाष्यस्थस्य भामतीमते आक्षिप्तविचारान्वयवदानंतर्यार्थकश्रुताथशब्दस्याप्याक्षिप्तविचारान्वयःस्यादिति ॥ तन्न ॥ श्रूयमाणस्य श्रूयमाणजिज्ञासान्वये संभवति तत्परित्यज्याक्षिप्तेनान्व यापादनस्यायुक्तत्वात् । कर्तव्यत्वस्य जिज्ञासायामन्वेतुमयोग्यत्वेनाक्षिप्तवि चारान्वयः स्वीकृतोभामत्यामिति । तदप्यज्ञानमूलं । तथाहि । चंद्रिकायां । "तस्मात्परोक्षज्ञाने कामनांनिषेधतः परस्यमत"इतिपूर्ववाक्ये विवरणमते मुमुक्ष्वादिरूपाधिकार्यादेरसंभवान्नाधिकारादिसूचनायानंतर्यार्थत्व मथशब्दस्ये त्यारंभरूपाधिकारार्थत्वमेव विवरणमते युक्तमित्युक्तं । इदानींतु । भामती मतेप्यारंभरूपाधिकारार्थत्वं युक्तमितिवक्तुं भामतीरीत्या जिज्ञासाशब्दस्ये च्छावाचकत्वेपि "आर्थिकार्थेन विचारेणाध्याहृतकर्तव्यपदस्येव श्रुतस्याधि कारार्थाथशब्दस्याप्यन्वयोस्तु । नचार्थिकार्थेनाध्याहृतस्यैवाऽन्वयइत्यत्र

नियामकमस्ति । "सोयँचरुंनिर्वपेद्ब्रह्मवर्चसकाम" इत्यादौद्रव्यदेवतासंबंधाक्षि प्तेन यागेन श्रूयमाणविधिप्रत्ययान्वयदर्शनादि" त्युक्तं । इत्थंचाध्याहृत कर्तव्यपदस्येव श्रुतस्याप्यारंभरूपाधिकारार्थस्याथशब्दस्यापि ज्ञानेच्छा रूपजिज्ञासायामन्वेतुमयोग्यत्वेनाक्षिप्तविचारान्वयःस्यादित्यापादनस्ययुक्ततम त्वान्नतत्रोक्तोदूषणाभासःसंभवतीति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ १२ ॥

यदपि ॥ यत्तु, नित्यानित्यवस्तुविवेकः । किं ब्रह्मनित्यमन्यदनित्य मिति विवेकः ? किंवा नित्यत्वतदाश्रययोरनित्यत्वदाश्रययोश्च धर्मधर्मि णोः परंस्परं विवेकः ? उतानित्यस्यकिंचिदधिष्टानमस्तीतिविवेकः ? नाद्यः । शास्त्रारंभवैयर्थ्यात् । नद्वितीयः । तन्मात्रेणानात्मप्रहाणेनात्मविचारे प्रवृत्य योगात् । वैराग्यायोगाच्च । नापितृतीयः । ब्रह्मत्वाकारेणाज्ञानेपि ब्रह्मणोऽ धिष्टानस्य शास्त्रवेद्यस्य वस्तुतो ज्ञातत्वेन शास्त्रवैयर्थ्यादिति ॥ तन्न ॥ प्रथ मविकल्पस्य भामतीकल्पतर्वोरनुक्तत्वात् । अनात्मनां प्रायेणानित्यत्वविका रित्वादि दोषदर्शनेन तत्प्रहाणेनात्मविचारप्रवृत्तेरुचितत्वात् । वैषयिके वैरा ग्यस्य संभवेन द्वितीयकल्पस्य दोषविकलत्वात् । जीवत्वोपलक्षितज्ञा नेश्वरत्वोपलक्षितज्ञानोत्तरकालीनजीवत्वेश्वरत्वोभयोपलक्षिताखंडचैतन्यज्ञानस्य शास्त्रतात्पर्यविषयत्वेन तस्य जीवेश्वरस्वरूपविचारमंतरेणालब्धसत्ताकतया संसाराधिष्टानं किंचिदस्तीति यज्जीवेश्वरविचारमंतरेणाप्युत्पद्यमानं ज्ञानं तद्वि लक्षणतयाच तृतीयपक्षे दोषाभावादिति । तदप्यसारं । भामत्यां" । नित्यः प्रत्यगात्मा, अनित्या देहेंद्रियविषयादयः,तद्विषयश्चेद्विवेको निश्चय "इत्यादिना ग्रंथेन प्रथमविकल्पस्योक्तत्वात् । "यद्यन्यदनित्यं ब्रह्मैकमेवसत्यमितिनिश्चिनु यात्तदाह्यन्यपरित्यागेन ब्रह्मविचारे प्रवृत्तिर्युज्यते । यदातु नित्यत्वानित्यत्वरू

पं धर्मद्वयमस्ति तदाश्रयौच द्वाविति निश्चयमात्रं तदा कथमात्मविचारे प्रवृत्तिः । किंतु, किंवा नित्यत्वाद्यधिष्टानमिति संदिहानो नक्कापि प्रवर्तेतेति" चंद्रिकाप्रकाशे सम्यगुपपादितत्वेन तन्मात्रेण प्रवृत्तेरुचितत्वाभिधानस्याज्ञप्रलापत्वात् । कल्पतरावपि । "निश्चयएवविवेकः, नचशास्त्रानारंभः, इदंनित्यमिदमनित्यमित्यनिश्चयात् । आत्मानात्मासमुदाये नित्यत्वमनित्यत्वंच स्तो धर्मौ तयोश्च धर्मिभ्यां भवितव्यमित्येतावन्मात्रं निश्चित"मित्युक्तं एतेनैव भामत्युक्तमैहिकामुष्मिक भोगविरागहेतुत्वमपास्तं । तत्रविरागस्य तदनित्यताज्ञानसाध्यत्वात् । एवंतृतीयपक्षे शास्त्रवैयर्थ्यं दुर्वारमेव । यतोविचारशास्त्रमप्यसत्यसंसाराधिष्टानस्य ब्रह्मणोनब्रह्मत्वप्रकारकज्ञानजनकं । अखंडार्थत्वहानेः । किंतुस्वरूपमात्रविषयकनिर्विकल्पकज्ञानजनकं । तस्याखंडार्थत्वात् । तच्च स्वरूपमात्रज्ञानं शास्त्रात्प्रागेवास्ति तस्मान्नशास्त्रं सफलमिति । यदपि शास्त्रसाध्यं ज्ञानं विलक्षणमिति तदप्ययुक्तं । 'संसाराधिष्टानभूतब्रह्मप्रातिपदिकार्थरूपस्याखंडचैतन्यस्वरूपस्य स्वप्रकाशतया सिद्धस्य नास्ति नप्रकाशतइत्यादि व्यवहारविषयत्वायोग्यस्य निर्विशेषस्य शास्त्रवेद्यत्वे शास्त्रस्य सिद्धार्थत्वेनानुपादेयत्वप्रसंगात् । तदुक्तं "सिद्धंतु निवर्तकत्वादिति" । एवमन्यत्रापि "निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितइति" । आत्मस्वरूपस्य शास्त्रात्प्राक् सिद्धत्वेपिवृत्तिविषयत्वरूपज्ञातत्वस्यासिद्धत्वात्तदुपरक्तस्यात्मनो न प्राक् सिद्धिरिति सिद्धिकारेणाभ्युपगतत्वाच्च । ततश्चयत्किंचिदित्याकारकस्य निर्विकल्पकस्य चैतन्यस्वरूपमात्रविषयकस्य शास्त्रसाध्यतया त्वदंगीकृतस्य शास्त्रात्प्रागेव सिद्धत्वात्तद्वैयर्थ्यं दुर्वारं । सोयमित्यादि वाक्यस्येव तत्त्वमस्यादिवाक्यस्यापि निर्विकल्पकात्मस्वरूपमात्रविषयकज्ञानजनकत्वांगीकारेण तस्य ज्ञानस्य विनापि शास्त्रेण स्वप्रकाशतया सिद्धत्वेन तत्रविचार शा

स्वस्यानपेक्षणात् । नहिसवितृस्वरूपप्रकाशनाय प्रदीपापेक्षा । विशेष्याविषयकविशिष्टविषयक ज्ञानाप्रसिद्ध्या विशिष्टज्ञानेनापि तादृशशुद्धात्मनस्सिद्धिसंभवाच्च । सिद्धिकारमतादौ आत्मनस्सिद्धत्वादेव शास्त्रस्य भेदभ्रमादिनिवर्तकत्वाभ्युपगमाच्च । जीवत्वादेर्नित्यतया यावद्धर्मिभावित्वेन उपलक्षणत्वासंभवात् । तेनोपलक्ष्यतावच्छेदकांतराभावाच्च । सिद्धस्वरूपे उपलक्षणोक्त्ययोगाच्च । उपलक्षितस्वरूपमात्रतात्पर्ये वैयर्थ्यस्य उपलक्षणतात्पर्ये चाप्रामाण्यस्य चापाताच्च नतृतीयपक्षोपि युक्तइति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ १३ ॥

यदपि ॥ यत्तु "ध्वंसाप्रतियोगित्व तत्प्रतियोगित्वविवेको नित्यानित्यविवेक"इति विवरणोक्तमयुक्तं । प्रतिपन्नोपाधावत्यंताभावप्रतियोगित्वरूपबाध्यत्ववतः प्रपंचस्यशुक्तिरूप्यवदुत्तरावस्थारूप ध्वंसप्रतियोगित्वाभावादिति ॥ तन्न ॥ पारमार्थिकत्वाकारेणात्यंताभावप्रतियोगित्वस्य स्वरूपेण ध्वंसप्रतियोगित्वाविरोधित्वात् । पारमर्थिकत्वंतु ज्ञानानिवर्त्यत्वं नतूक्तात्यंताभावाप्रतियोगित्वमिति नान्योन्याश्रयः । नचब्रह्मण्यति प्रसंगः । निराकारे उक्ताभावप्रतियोगित्वस्याप्यभावात् । मूलाज्ञानाकार्यशुक्तिरूप्यादेरुत्तरावस्थाभावेन स्वरूपेण ध्वंसप्रतियोगित्वाभावेपि मूलाज्ञानकार्ये प्रपंचेतदस्ति । अतो घटादावनित्यत्वव्यवहारः । नतु शुक्तिरूप्यादौ । नच "एषोश्वत्थस्सनातन" इत्यादिना प्रपंचस्यापि मुक्तिदशाभावित्वावगमान्मोक्षेप्यतात्विकानुवृत्तिः । सनातनपदस्यापेक्षिकनित्यत्वपरत्वेन मोक्षदशाभावित्वावगमकत्वाभावात् । अन्यथा "अतोन्यदार्तमि"तिश्रुतिविरोधापत्तेरिति । तदपि न समंजसं । तथाहि ज्ञानानिवर्त्यत्वस्य पारमार्थिकत्वरूपत्वे पंचमप्रकाराविद्यानिवृत्तेरपि निवृत्त्यंगीकारे निवृत्तिपरंपरयाऽनवस्थापातात्प्रतियोग्युन्मज्जानप्रसंगाच्च निवृ

त्तेर्निवृत्तिर्नाभ्युपगता तथाचाविद्यानिवृत्तेर्ज्ञानानिवर्त्यत्वेनांगीकृतायाः अतीतघटादेः कार्याकारस्य तत्वज्ञानसंस्कारनिवर्त्यत्वेनांगीकृतस्य जीवन्मुक्तानुवृत्ताविद्यासंस्कारादेश्च ज्ञानानिवर्त्यत्वेनरूपेणात्यंताभावप्रतियोगित्वे स्वरूपेणनिषेधप्रतियोगित्वप्राप्त्यात्यंतासत्वापातः पंचमप्रकाराभ्युपगमानुपपत्तिश्च । किंचब्रह्मणीव घटादेरपि पारमार्थिकत्वरूपधर्माभावेपि तात्विकस्वरूपत्वाबाधेन पारमार्थिकत्वापत्या पारमार्थिकत्वाकारेण निषेधविवक्षाया एवायोगात् नेहनानेतिश्रुत्यनुरोधाच्चस्वरूपेणैवनिषेधः । ततश्चशशविषाणादिवत्स्वरूपेण त्रैकालिकनिषेधप्रतियोगिनः प्रपंचस्य उत्तरावधिरूपध्वंसो नसंभवति । किंतुबाध्यत्वेनांगीकृतस्यतस्य ज्ञानजन्यध्वंसाप्रतियोगित्वमेवेतिवदंतंप्रतिज्ञानानिवर्त्यत्वेन रूपेण निषेधोक्तौ घटादेर्घटत्वादिनेव स्वरूपेणैव निषेधप्राप्त्या तस्य ध्वंसप्रतियोगित्वेनाविरोधोक्तिरेवासंगता । ज्ञानानिवर्त्यत्वरूप पारमार्थिकत्वाकारेण निषेधस्य व्यधिकरणधर्मावछिन्नप्रतियोगिताकाभावरूपतया तस्य च प्रतियोगितासमानाधिकरणव्यधिकरणधर्मप्रतियोगिकाभावरूपत्वस्य घटवत्यपि पटत्वेन घटोनास्तीत्यादौ दर्शनात् ज्ञानानिवर्त्यत्वेननिषेधप्रतियोगित्वस्य ज्ञाननिवर्त्यत्वपर्यवसायित्वप्राप्त्या बाध्यस्य ध्वंसोनसंभवतीत्यत्र ज्ञाननिवर्त्यत्वात्स्वरूपेण ध्वंसस्याविरोधइत्युक्तिरप्यनुचितैव ध्वंसप्रतियोगित्वासंभवशंकाया अपरिहारात् । ततश्च पारमार्थिकत्वं बाध्यत्वाभावः इत्येववक्तव्यत्वादन्योन्याश्रयो दुरुद्धरः । किंच "तत्वमस्यादिवाक्यार्थसम्यग्धीजन्ममात्रतः । अविद्यासहकार्येण नासीदस्तिभविष्यतीति" वार्तिकानुसारेणाद्वैतचंद्रिकायां "अधिष्टानयाथात्म्यज्ञानेनाविद्यायां विलीनायां स्वतएवे"त्यादि विवरणवाक्यस्य "विलीनायां अत्यंताभावप्रतियोगित्वेन गृहीतायां स्वतएवाज्ञाननाशद्वारमनपेक्ष्यैव निवर्तते । अत्यं

ताभावप्रतियोगित्वेन गृहीतो भवती ति व्याख्यातत्वेन ज्ञानानिवर्त्यत्वस्यात्यं ताभावाप्रतियोगित्वरूपत्वापत्यान्योन्याश्रयएव । यद्यपि विवरणे प्रतिपन्नोपाधावत्यंताभावप्रतियोगित्वरूपबाध्यत्वापेक्षया ज्ञाननिवर्त्यत्वरूपं बाध्यत्वंविलक्षणमित्यभिप्रेतं । तथापि तस्य स्वात्यंताभावाधिकरणएवप्रतीयमानत्वादिरूपत्वेनोक्तदोषानिस्तारएव । किंच ब्रह्मणि निर्धर्मकत्वेनात्यंताभावप्रतियोगित्वस्याप्यनंगीकारे सदसत्वानाधिकरणत्वरूपानिर्वाच्यलक्षणे सत्वानधिकरणत्वनिवेशवैयर्थ्यं । अभावद्वैतंतु न्यायामृतेऽशित्वादिहेतुभंगे निरस्तं । निर्धर्मकत्वरूपहेतोः उक्तप्रतियोगित्वाभावरूपसाध्यस्य च भावाभावाभ्यां व्याहतिः । ब्रह्मणि प्रतियोगित्वानंगीकारे चिद्भिन्नत्वस्य मिथ्यात्वपक्षतावच्छेदककोटौ निवेशासंभवश्च । पारमार्थिकत्वेन निषेधप्रतियोगित्वाभावस्य पारमार्थिकत्वं विनाअयोगेन निर्धर्मकत्वहानिः । ब्रह्मणइव घटादेरपि पारमार्थिकत्वशून्यत्वेपि परमार्थसद्रूपत्वापातश्च । नचनिर्धर्मकत्वाद्ब्रह्मण्यतिव्याप्तिरिति वदतस्तवापि कथं नव्याहतिरिति वाच्यं । अहृदयवाचामहृदयेनैवोत्तरमिति न्यायेन परिरीत्यैवतथाव्यवहारात् । नचपररीत्यनुसरणे परोक्तरीत्या नातिव्याप्तिरिति वाच्यं । अतिव्याप्त्युपयुक्तन्यायमात्रं परोक्तमादत्यान्यन्निराकृत्यातिव्याप्तेरभिधानात् । अन्यथा तवपररीतिमनुरुध्यवैतंडिकतयातत्खंडनाद्यभावापत्तेः । मदीयं निर्धर्मकत्ववचनंधर्मसामान्यमिथ्यात्वद्वारा स्वरूपमात्रबोधपर्यवसायीतिचेत् मदीयमतिव्याप्तिवचनमपि ब्रह्मणोप्यनिर्वचनीयतापादनद्वारा सर्वशून्यतापर्यवसायीति तुल्यमितिदिक् । मूलाज्ञानाकार्येत्याद्युक्तिस्तु अनुक्तोपालंभनत्वादुपेक्ष्या चंद्रिकायां शुक्तिरूप्यादेरुत्तरावस्थेत्यादेरनुक्तत्वात् । वस्तुतस्तु पारमार्थिकत्वाकारेणेतिनिवेशस्य मिथ्यात्वनिरुक्तिभंगे बहुधादूषितत्वात् रूप्यंनास्ति नेहनानास्तीत्यादौ पारमार्थिकत्वेनेति पदाभावेन स्वरू

पेण निषेधस्य सिद्धत्वाच्च । शशविषाणादेरिव प्रपंचस्याप्यसत्त्वापत्या रूप्य स्येवप्रपंचस्याप्युत्तरावस्था अनुपपन्नैव । अन्यथा शशशृंगादेरपि किंचित्स्व रूपसिद्ध्यापातः । किंचमूलाज्ञानकार्यत्वे भ्रांतेर्दीर्घत्वापत्या तन्मात्रेण विषय स्योत्तरावस्थानयुक्ता तस्याः कदाचिद्विषयसत्तासापेक्षत्वात् अज्ञानकार्यत्वे भ्रमविषयत्वे ज्ञानबाध्यत्वेच समानेसति भ्रमस्य दीर्घत्वाल्पकालत्वादिमात्रेण कस्यचिद्विषयस्योत्तरावस्थाकस्यचिन्नेतिव्यवस्थायाः नियामकाभावेनायुक्त त्वात् । अन्यथादीर्घभ्रांतिसिद्धस्याप्रातीतिकत्वेन ज्ञाननिवर्त्यत्वादिकमपि नस्यादिति । एवं "भूयश्चांतेविश्वमायानिवृत्तिरिति" निवृत्तिवाक्यस्य "नेहना ने"त्यत्यंताभाववाक्यस्यच सत्वादेव उभयविधप्रमाणानुसारेण स्वरूपेण निवृ त्तिः तात्विकत्वेन निषेधश्चयद्यंगीक्रियते तर्हि "गौरनाद्यंतवती एषोश्वत्थस्स नातनः" इतिश्रुत्यनुसारेण मुक्तौगोपदवाच्याविधायाः अश्वत्थपदोक्तसंसार स्यच निवृत्तिरनुवृत्तिश्चेत्यप्यंगीकार्यं श्रुत्योरविशेषात् । नचविरोधः । निवृत्ते स्तात्विकत्वेनानुवृत्तेरतात्विकत्वेनाविरोधात् । वंधदशायामतात्विकानुवृत्तौ सत्यामपि न तात्विकनिवृत्तिः मुक्तौतु तात्विकीनिवृत्तिरिति मुक्तेर्बंधाद्वैषम्य" मित्युक्तं चंद्रिकायां तत्रयदि सनातनपदस्यान्यार्थत्वं तर्हिनेहनानेत्यादिवाक्य स्यापिभगवति स्वीयगुणकर्मादिधर्मभेदनिषेधादिरूपान्यार्थत्वं दुर्वारमिति नप रस्येष्टसिद्धिः । अतोन्यदार्तमितिश्रुतेस्तु "अत्रांतर्यामिणः प्रकृतत्वादेतच्छब्द स्यप्रकृतपरत्वादन्यशब्दस्यच एतद्ब्राह्मणादन्यमानयसमानमितरच्छेनेनेत्यादा विवप्रकृतसमानजातीयान्यपरत्वात् ब्रह्मणोन्यज्जीवजातमार्तंदुःखीति "न्यायामृ तेजीवेश्वरभेदपरतया सोपपत्तिकं व्याख्यातत्वान्नतद्विरोधप्रसक्तिरपीति । तस्मादुक्तंदूषणंसुस्थमिति सिद्धं ॥ १४ ॥

यच्चोक्तं "यत्तु" नित्यानित्यवस्तुविवेकस्यभ्रमत्वे ब्रह्मविचारोऽनित्य

फलकस्स्यात् । प्रमात्वेविवेकशब्दितज्ञानविषयस्य भेदस्य सत्यत्वंस्यादिति । तन्न "ब्रह्मज्ञानबाध्यार्थविषयकत्वरूपभ्रमत्वस्य व्यवहारदशाबाध्यविषयकत्व रूपप्रमात्वाविरुद्धत्वेन ब्रह्मविचारस्य नित्यफलकत्वोपपत्तेरिति । तदत्यंतासं बद्धं । भ्रमत्वप्रमात्वोभयांगीकारे भ्रमत्वप्रयुक्तानित्यफलकत्वस्यप्रमात्वप्रयुक्त भेदसत्यत्वस्यापि सिद्धद्यापत्त्यापिण्याकयाचनार्थगतस्य पिशाचस्य खारीतैल दानप्रतिज्ञावदधिकापातात् । किंचब्रह्मज्ञानबाध्यार्थविषयकत्वस्य भ्रमत्वरूप त्वे अनीदृशशुक्तिरूप्यज्ञानस्य भ्रमत्वानुपपत्तिः । प्रत्युत जगज्ज्ञानस्यैव भ्रम त्वप्राप्त्या अपसिद्धांतश्च । नचव्यवहारदशाबाध्यार्थविषयकत्वस्यापरप्रामाण्य रूपतया तादृशप्रमाविषयस्य व्यावहारिकत्वसिद्धावपि नपारमार्थिकत्वमिति वाच्यं । तुछब्रह्मज्ञानयोरपीदृशतयाऽपरप्रामाण्यापातेन तद्विषययोस्तुछब्रह्म णोरपि व्यावहारिकत्वापातात् । बाध्यार्थविषयकत्वस्यापि प्रामाण्यशरीरघट कत्वविवक्षायामपीदंरूप्यमिति ज्ञानस्येदंपदार्थविषयकतया उक्तप्रामाण्याप तेन तद्विषयस्यरूप्यादेरपि व्यावहारिकत्वापातः । असंजातबाधभ्रमविषयस्य व्यावहारिकत्वापत्तिश्च । वस्तुतस्तु बाध्यार्थविषयकस्याविद्यमानविषयकत्वेन सदर्थविषयकत्वरूपंप्रमात्वं व्याहतमेव । तदुक्तं "अतत्वावेदकंमानमिति व्याहतंवचइति" । ततश्च व्यवहारदशाबाध्यबाध्यार्थविषयकज्ञानस्य रज्जुसर्पादिज्ञा नापेक्षयाचिरानुवृत्तदीर्घभ्रांतिरूपस्य ततोप्यधिकभ्रमत्वस्योचितत्वेन सर्वथाऽ बाध्यार्थविषयकत्वस्यैव प्रमात्वरूपताया अवश्यवक्तव्यत्वाद्भेदसत्यत्वमवर्ज नीयमेवेति । किंच भ्रमत्वप्रमात्वयोरविरोधोक्तिरेवायुक्ता । अविद्यावृत्तिर्भ्रमः अंतःकरणवृत्तिः प्रमेति त्वत्पूर्वाचार्यविभागानुपपत्तेः । सकलस्यापि वेदांतस्य भ्रमप्रमोभयात्मकज्ञानजनकत्वसंभवे तत्वावेदकातत्वावेदकभेदेन द्वैविध्यक थनस्य श्रुतिमातुःकचाकर्षणरूपत्वापाताच्च । तुच्छस्याबाध्यत्वेनैव व्यव

हारदशाबाध्यत्वस्यापि प्राप्त्या तज्ज्ञानस्य प्रमात्वपरिहाराय बाध्यार्थ विषयकत्वस्यापि विवक्षणीयतया व्यवहारदशाबाध्यस्य बाध्यस्यब्रह्मज्ञानबा ध्यत्वनियमेन भ्रमप्रमयोरेकरूपत्वोक्तेः उन्मत्तप्रलापत्वापाताच्च । विचारफलं नित्यमितिज्ञानस्यबाध्यार्थविषयकत्वे विचारस्यानित्यफलकत्वरूपदूषणस्य वज्रलेपायितत्वाच्चेति । किंचभ्रमत्वं न बाध्यार्थविषयकत्वंशुक्तिरूप्यंबाधित मिति ज्ञानस्यापि भ्रमत्वापत्तेः । किंतुबाधिताबाधितयोस्तादात्म्यसंसर्गावगा हित्वमेवेति वक्तव्यं । अतएवइयंशुक्तिरितिज्ञानं प्रमा इदंरूप्यमिति ज्ञानं भ्रमइति त्वत्प्राचामप्यभ्युपगमः । ततश्चभ्रमत्वप्रमात्वयोरविरोधोक्तौ कथमप सिद्धांतोनस्यादितिदिक् । तस्मादुक्तंदूषणंसुस्थमितिसिद्धं ॥ १५ ॥

"यदपि" "यत्तु" "विषयैर्नित्यसुखं ब्रह्मैवाभिव्यज्यते नजन्यं सुखं नाम तदतिरिक्तं । किंचिदस्ती"तिविवरणग्रंथेन वैषयिकसुखस्यब्रह्मरूपत्वोक्त्या तत्रवैराग्यमुत्पादयितुं नशक्यते । किंच तन्मते तत्वतोनित्यसुखब्रह्मभेदहीने विषयसुखे वैराग्यासंभवइति ॥ तन्न ॥ शिखीध्वस्तइत्यादाविव विषयविनाशे न विषयाभिव्यक्तत्वविशिष्टब्रह्मरूपसुखस्य स्वरूपतोऽविनाशिनोपि विशिष्ट रूपेण विनाशसंभवेन तत्रवैराग्योपपत्तेरिति" तदप्यसाधु । आत्मस्वरूपसुख स्य स्वप्रकाशतया नित्यसिद्धस्यानावृततया सदाभिव्यक्तत्वेन विषयाभिव्यक्त त्वस्यैवासंभवात् अभिव्यक्तेरनित्यतयापि उक्तविरागायोगात् । किंचविषयैर्नि त्यसुखस्य समग्रस्याभिव्यक्तिर्वा अंशतोवानाद्यः । संसारदशायां मोक्षसुखा नुभवापातेन मोक्षार्थप्रयत्नवैयर्थ्यप्रसंगात् । नद्वितीयः । अखंडनिरवयवब्रह्म रूपसुखस्यांशाभावात् । नचस्वप्रकाशचैतन्यरूपस्यापिसुखस्याविद्यावरणवशे नाभानसंभवाद्विषयाभिव्यक्तिर्युक्तेतिवाच्यं स्वरूपचितोप्यज्ञानविरोधित्वात् । निर्विशेषस्वेयंप्रकाशमाने आवरणकृत्याभावाच्च । स्वप्रकाशचैतन्यस्याविद्याव

शेनाभानस्य अविद्यावरणस्यच ग्रंथकृद्भिरेव बहुधादूपितत्वाच्च। किंच विशे
ष्यवन्निष्टविशिष्टाभावास्यविशेषणाभावपर्यवसन्नतया अभिव्यक्तेरनित्यत्वेनतत्र
वैराग्यसंभवेपि शिखोपलक्षितस्येवानित्याभिव्यक्त्युपलक्षितस्य विनाशायोगेन
सुखांशेविषयाभिव्यक्त्युपलक्षिते नोक्तरीत्यापिवैराग्ययोगः। अखंडेनिरवयवे
ब्रह्मरूपनित्यसुखेअभिव्यक्तितारतम्यास्यापि वक्तुमशक्यत्वेन नीरपानजात्सु
खात्क्षीरपानजंसुखमधिकमिति वैषयिकसुखेतारतम्यानुभवस्यापलापापत्यानि
त्यसुखेविषयैरभिव्यक्तिकल्पनैवनयुक्तेति। अत्राहकश्चित्। विषयाभिव्यक्तसु
खेनविरागः किंतुभोगेष्वेति॥ तन्न॥ तथाविवक्षायांविशिष्टसुखस्यैववैषयिक
सुखशब्देनविवक्षायांवास्वरूपसुखरूपेमोक्षेरागवतः पुरुषस्यतत्वतस्ततोभेदही-
नेविषयाभिव्यक्तत्वविशिष्टसुखेभोगेवाविरागायोगात्। तत्रमोक्षादाविद्यकभेदस
त्वेपितात्विकभेदस्यमिथ्यात्ववादिनानंगीकारात्। वन्हावयंनवन्हिःकिंतुगुंजा
पुंजइतिभ्रमसिद्धमिथ्याभेदसत्वेपितात्विक भेदाभावेनदाहस्यैवदृष्टयाऽतात्विक
स्यतात्विककार्याविघातकत्वात्। नचतत्रमोक्षात्तात्विकाभेदानंगीकारात्तत्व
तस्तदभेदहीनत्वमात्रेणविरागः। दहनेतुनैवं। तत्रतात्विकान्यभेदस्यस
त्वादिति वाच्यं। उभयाभावस्यव्याहतत्वात्। ननूभयाभावस्यव्याहत्या
भेदाभेदयोरन्यतरेणभाव्यमित्येतत्तात्विकधर्मिविषयं। सुखंत्वतात्विकमितिन
दोषइतिचेन्न। अपारमार्थिकस्यापिनेदं रूप्यमिति शुक्तिसत्तासमानसत्ताक
भेदप्रतियोगित्ववन्मोक्षसत्तासमानसत्ताकमोक्षगततात्विक भेदप्रतियोगित्वस्य
वैषयिकसुखे त्वयासदद्वैतभंगभियांगीकर्तुमशक्यत्वेन तदभेदस्यैवप्राप्त्या तत्र
कथंचिदपि विरागायोगादिति। तस्मादुक्तं दूषणंसुस्थामितिसिद्धं॥ १६॥

यदपि "यत्तु" शांकरभाष्यस्थस्यशमदमादीत्यादिपदस्यतितिक्षामात्रं
नार्थतयागृहीतुंशक्यते। विवेकादेरप्यादिपदेनग्रहणसंभवेनविवेकादिव्या

वृत्ततितिक्षामात्रवृत्तिधर्मविशेषरूपनियामकाभावादिति ॥ तन्न ॥ पदानुपात्त स्यैवादिपदग्राह्यत्वेन विवेकादेस्तत्पदेनैवगृहीतत्वेनतस्यादिपदेनग्रहणापादना सांगत्यादिति "तदप्यज्ञानमूलं । त्वदीयभष्ये "उच्यते नित्यानित्यवस्तुविवेकः इहामुत्रार्थभोगविरागः शमदमादिसंपत् मुमुक्षुत्वंचेती "तिह्युक्तं । अत्रनित्या नित्यविवेकादिकंपदांतरेणोपादायादिशब्दः प्रयुक्तोस्ति । ततश्चादिपदेनैव तितिक्षादेरिव विवेकादेरपिग्रहणसंभवेन विवेकादेः पृथगुपादानस्यायुक्तत्वा त् विवेकादिकं पृथगुपादायभाष्ये शमदमादीत्यादिशब्दोनयुक्तइति चंद्रि काशयमविदुषः उक्तप्रलापस्यासंबद्धत्वात् । एकश्रुत्युपात्तत्वमेवादिपदसंग्रा ह्यतावच्छेदकमित्यादि शंका तत्परिहारश्च "पश्येदित्यात्मज्ञानस्यापि ग्रहणापत्तेः उपरतोविषयालंबुद्धिमानित्यनेन विरागस्य समाहितोयथावस्तुतत्वज्ञानीत्यने ननित्यानित्यवस्तुविवेकस्यचप्राप्त्यातयोःपार्थक्यायोगादि" त्यादिनाचंद्रिकाप्र काशेस्पष्टः । तस्मादुक्तंदूषणं सुस्थमितिसिद्धं ॥ १७ ॥

यदप्यवोचत् "यत्तु" मोक्षस्यनित्यसिद्धात्मरूपत्वेनमोक्षविषयकेच्छारू पमुमुक्षायाअसंभवइति ॥ तन्न ॥ अविद्यानिवृत्त्युपलक्षितात्मस्वरूपमोक्षस्यासि द्धत्वेनतत्रेच्छायास्संभवात् । नचाविद्यानिवृत्तेः पूर्वमात्मनोऽविद्यानिवृत्त्युपलक्षि तत्वंसंभवति । भूतस्योपलक्षणत्वसंप्रतिपत्तिवद्भाविनः उपलक्षणत्वस्यक्वाचि त्कतयासार्वत्रिकत्वासंप्रतिपत्तेरिति" तदप्यसारं । उपलक्षणत्वस्यकदाचिद्वि शेष्यसंबद्धत्वेसतिलिंगविधयाव्यावृत्तिविधेयकानुमिति जनकज्ञानविषयत्वरूपत द्व्यावर्तकत्वात्मकतयालिंगज्ञानस्यकरणतामते अतीतपाकज्ञानेनेवानागतपाक ज्ञानेनाप्ययंपाचकइति व्यवहारस्य अतीतपाकज्ञानेनतद्व्यावर्तितत्वस्येवभावि पाकज्ञानेनापिभविषत्कालीनपाकक्रियाज्ञानाधीनव्यावृत्तिविधेयकानुमिति विष यत्वरूपस्यतद्व्यावर्तितत्वस्यचसंभवेनभाविनः उपलक्षणत्वस्यापिसार्वत्रिकत्वात्।

किंचायंपाचकइति व्यवहारंप्रति पाकक्रियायाः व्यवहितायाः व्यवहाररूप कार्याव्यवहितपूर्वकालेकार्यरूपेणावस्थानायोगेन कारणात्मनावस्थानमंगीकृत्य तद्व्यवहारहेतुत्वस्य निर्वाह्यतया प्रकृतेपि चरमवृत्तेः कारणात्मनावृत्युत्पत्तेः पूर्वं सत्वेन कारणात्मनावृत्तिव्यावर्तितस्यात्मनोयंमुक्त इति व्यवहारविषयत्वसंभवात्सिद्धत्वं दुर्वारमेव । किंचोपलक्षणभूतवृत्तेः निवृत्तेर्वाविचारसाध्यत्वमंगीकृत्यतदुपलक्षितात्मनः विचारसाध्यत्वोक्तिरयुक्ता । विशिष्टविधेः विशेष्यबाधेविशेषणोपसंक्रमणेप्युपलक्षणसंक्रमणस्याप्युक्तत्वात् । वृत्तेर्विशेषणत्वं मोक्षस्यानित्यत्वप्रसंगान्नपरस्येष्टं । इदंतुदूषणं "निवृत्तिरात्मामोहस्य ज्ञातत्वेनोपलक्षितः" इति प्राचीनवचनानुसारेणज्ञातात्मैवाज्ञानहानिः नात्ममात्रमितिपक्षेबोध्यं । किंचपाककृतिकालएवपाचकइति व्यवहारांगीकारेपाकस्यविशेषणत्वप्राप्त्योपलक्षणतया व्यवहारमभिलषतापाकध्वंसकालइव पाककृतिप्रागभावकालेपिभाविपाकज्ञानमादायतद्वेत्तृणामयंपाचक इति व्यवहारस्ययुक्तत्वेन भाविनोप्युपलक्षणत्वं त्वयापि सार्वत्रिकमेवेष्टव्यं किंच "एष्यत्तुनिश्चितंयत्तदतीतत्वेनभण्यत" इति प्रमाणसिद्धत्वाद्भारतादौभाविवधज्ञानेन" भीमसेनाग्निना दग्धास्तवपुत्रानसंशय" इत्यादि व्यवहारदर्शनाल्लोकेपि भाविराज्यज्ञानेनायं राजेति कन्यादान निश्चयोत्तरं अयं जामातेत्यादि व्यवहारस्य दर्शनात् वर्तमानसामीप्येवर्तमानवद्वेत्यनुशासनात्पूर्वापरसाधारणसामीप्येपिवर्तमानव्यपदेशदर्शनाच्च भाविनउपलक्षणत्वं सर्वसंप्रतिपन्नमेव । तस्मादुक्तं दूषणंसुस्थमिति सिद्धं ॥ १८ ॥

"यदपि "यत्तु" अहं मुक्तस्स्यामितीच्छानसंभवति अहमर्थस्यमुक्तावनन्वयात् चिन्मात्रंमुक्तंस्यादिति कस्यापिमुमुक्षानदृष्टेति ॥ तन्न ॥ अद्वैतसिद्धांते प्रमाणबलेनांतःकरणावच्छिन्नस्यापिचैतन्यस्याहमालंबनत्वस्वीकारेणांतःकर

णस्यमुक्तावभावेपिचैतन्यस्यमुक्तावन्वयसंभवेनाहं मुक्तःस्यामिति मुमुक्षोपपत्तेः अन्यथा शरीरविशेषविशिष्टस्याहंस्वर्गीस्यामिति कामनयायागकरणानापत्तेः ब्राह्मणादिशरीररूपविशेषणस्यस्वर्गानन्वयात् विशेषणस्यानन्वयेपिविशेष्यान्वयइति चेत्तुल्यंप्रकृतेपीति । तदप्ययुक्तं । तथाहि अहमर्थोऽनात्मा तस्मिन्प्रकाशमानेप्यप्रकाशमानत्वादित्यनुमानात् "अथाथोऽहंकारादेशः "अथात आत्मादेश "इति श्रुतौ पृथगुपदेशाच्च "महाभूतान्यहंकार इति "स्मृतावहंकारस्यक्षेत्रज्ञात्यार्थक्येन क्षेत्रत्वोक्तेश्चाहमर्थस्यानात्मत्वात् । प्रमाणबलेनांतःकरणावच्छिन्नचैतन्यस्याहमास्पदत्वांगीकारे "अहंसर्वस्यप्रभवः तदात्मानमेवावेदहं ब्रह्मास्मी"त्यादि प्रमाणबलात्स्वप्रपन्नमायानिरसनसमर्थस्यापीश्वरस्य अनवद्यस्यात्मनोप्यहमास्पदत्वांगीकारापाताच्च । यद्यप्यहमनुभवामि इत्यात्मानुबंध्यनुभवस्याहंकर्तेत्यनात्मानुबंधिकर्तृत्वादेश्चाश्रयोहंकारः चिदचित्संवलनात्मकत्वादध्यस्त इति त्वत्प्राचांसिद्धांतात् अंतःकरणविशिष्टएवात्मनिप्रत्यभिज्ञानंब्रूमो न निष्कलंके तस्यमोक्षावस्थायिनश्शास्त्रैकसमधिगम्यत्वादित्युक्तत्वाच्चांतःकरणावच्छिन्नचैतन्यस्याहमालंबनत्वंत्वन्मतसिद्धं । तथाप्यंतःकरणविलयस्यैव मोक्षत्वात् शुद्धात्मामोक्षान्वयीनाहं प्रत्ययेभातीतित्वत्परमसिद्धांताच्चमोक्षान्वयिचैतन्यस्याहमालंबनत्वमशक्याभ्युपगमं । किंचां"तःकरणस्यान्वहंविनाशेन तद्विशिष्टस्यापिविनाशित्वमिति न प्रत्यभिज्ञाविषयत्वमिति शंकोत्तररूपेण संसारावस्थायामंतःकरण विशिष्टरूपानपाया "दित्युत्तराविवरणवाक्येनाहमर्थस्य मोक्षानन्वयावगमात् । "कार्योपाधिरयंजीवः कारणोपाधिरीश्वरः" इति त्वत्प्राचांवचनानुसारेणांतःकरणोपहितस्याहमर्थतयोपहित मिथ्यात्वस्यचत्वत्सिद्धांतत्वाच्चनतस्यमोक्षान्वयः।अंतःकरणोपलक्षितस्यमोक्षान्वयेपितदुपहितस्यमिथ्यात्वेनतदनन्वयात् । अतएवांतःकरणविशिष्टस्यजीवत्वेकृतनाशाकृताभ्यागम

भिया अविद्यांतःकरणादिप्रतिबिंबस्य जीवभावोभ्युपगतोवृत्तिकारादिभिः । किंच "चैतन्यस्यांतःकरणावच्छेदेनेच्छामंगीकृत्यविशेष्यांशस्यमोक्षान्वयोक्ताव पियस्यशुद्धचैतन्यस्यमोक्षान्वयः न तस्येच्छा यस्यचेच्छानतस्यमोक्षान्वयः। मिथ्यात्वव्यतिरेकावच्छेदेनदृश्यत्वेपि न शुद्धेदृश्यत्वं यथातथाशुद्धेनेच्छावत्व मित्येवयुक्तं।उपहितस्यामिथ्यात्वेतु सगुणवाक्यस्यातत्ववेदकत्वेक्त्यसांगत्या पातः। उपाधिभेदेनोपहित भेदाभावेचैकस्यैवचैतन्यस्याविद्यावच्छेदेनसाक्षित्वं, अंतःकरणावच्छेदेनप्रमातृत्वं, वृत्यवच्छेदेनफलत्वं, विषयावच्छेदेनप्रमेयत्वं चस्यादिति सर्वसंकरापातः । किंच पुत्रस्यपितुरुपकारकत्वेनपित्रर्थत्वात्पुत्रगत पूतत्वादीच्छापितुर्यथातथाप्रकृते चिन्मात्रस्याहमर्थोपकारकत्वाभावेनाहमर्थार्थ त्वाभावात् चिन्मात्रगतमुक्तीच्छानाहमर्थेयुक्तेतिपरमते मोक्षेच्छारूपामुमुक्षानो पपन्नेति । किंच दृष्टांतोप्यसंगतः तत्ववादिसिद्धांते आत्मन्येवस्वाभाविक कर्तृत्वभोक्तृत्वप्रमातृत्वादिधर्माणामंगीकारेण देहोपाधिकत्वाभावाद्देहस्यजीवा भिमन्यमानस्यभोगायतनत्वमेव । एवंचानेकेपुमणिष्वनुस्यूतसूत्रस्येवानेकेषु कर्माधीननानाशरीरेष्वनुस्यूतस्यजीवात्मनोदेहभेदेन भेदाभावेन यस्यस्वर्गका मनातस्यैव स्वर्गान्वयांगीकारात् प्रायेणकर्मणां जन्मांतरएवफलदत्वस्य प्रमि तत्वेनभोगायतनशरीरस्यस्वर्गोपिसत्वात् अंतःकरणस्येवदेहस्यजीवोपाधित्वाभा वात् इच्छायाश्चात्मस्वामिकत्वेनस्वर्गेच्छेरेव स्वर्गान्वयस्येवमोक्षेच्छाविशिष्ट स्यमोक्षान्वयाभावात्।आत्मनएवाहमर्थत्वात् अहंगेहीतिवत् अहंदेहीतिप्रतीत्या शरीरविशेषविशिष्टस्यब्राह्मणादि शब्दार्थत्वेप्यहमर्थत्वाभावात् । अहंस्वर्गीस्या मितीच्छयायागकरणस्यस्वर्गान्वयस्यचांतःकरणनाशे तद्विशिष्टाहमर्थनाशव च्छरीरनाशस्वाभाविकेच्छावतोहमर्थस्य नाशाभावेनाहमर्थेसन्मतेनिराबाधतय। तत्प्रतिबंदीग्रहणस्यायुक्तत्वाचेति तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ १२॥

यदपि "यत्तु" भामतीरीत्यासाधनचतुष्टये पूर्वपूर्वस्योत्तरोत्तरंप्रति हेतुत्वेनचरममुमुक्षैवाधिकारिविशेषणं किंवा विवरणैकदेशिरीत्यामुमुक्षावद्विवेकादिरप्यधिकारिविशेषणं आद्येमुमुक्षानंतर्यमेवाथशब्दार्थःस्यात् । न चतुष्टयानंतर्यं । न द्वितीयः । शमाद्यभावेपिमुमुक्षामात्रेण विचारदर्शनादिति ॥ तन्न ॥ भामतीमते मुमुक्षानंतर्यमेवाथशब्दार्थः । विवेकाद्यानंतर्यंतु मुमुक्षाद्वारैवेति सिद्धांतात् । नचयज्ञादेरपि मुमुक्षाद्वारा आनंतर्यप्रतियोगितास्यादितिशंक्यं । "तमेतंवेदानुवचनेनेति" श्रुत्याकर्मणांविविदिषाहेतुत्वावगमेपि"कर्मणाबध्यतेजंतुर्विद्ययाचविमुच्यत" इति भारतवचनेन"सन्यस्यश्रवणंकुर्यादिति" स्मृतिवचनेनब्रह्मविचाररूपवेदश्रवणेयज्ञादिसन्यासस्यहेतुत्वोक्त्याकर्मणः आनंतर्यप्रतियोगित्वासंभवात् । नचयस्ययस्ययद्धेतुत्वं तस्यतस्यतद्गतानंतर्यप्रतियोगित्वं । अध्ययनेनवसतीत्यादौ व्यभिचारात् । किंत्वानंतर्यप्रतियोगित्वयोग्यताकस्यैव । गुरूपगमनमपिनानंतर्य प्रतियोगि । सदानिकटस्थगुरुकपुरुषविशेषेतदसंभवात् । विवरणैकदेशिमतेविवेकवैराग्याद्यभावेपिकेवलमुमुक्षामात्रेणप्रवृत्तविचारस्याशिथिलत्वापत्याविवेकादीनांमध्ये पूर्वपूर्वहेतुसहितेष्वेवोत्तरोत्तरेषुसत्स्वेवा शिथिलविचारप्रवृत्तेरुक्तचतुष्टयानंतरमेवनिष्पत्योक्तचतुष्टयस्यैवानंतर्यप्रतियोगित्वमित्यभिप्रायादिति । तदप्यज्ञाननिबंधनं । विवेकाद्यानंतर्यं मुमुक्षाद्वारैवाथशब्दार्थ इति भामतीसिद्धांताभ्युपगमे, अथशब्देनयथोक्तसाधनसंपत्यानंतर्यमुपदिश्यत इति तदीयभाष्यविरोधापातात् । तत्रसाक्षादेव विवेकाद्यानंतर्यस्याथशब्दार्थत्वकथनात् । मुमुक्षानंतर्योक्तौतद्धेत्वानंतर्यमपिलभ्यत इतिचेत्तर्हि विवेकहेत्वानंतर्यमप्यथशब्दार्थस्स्यात् । इदंचचंद्रिकायामेवस्पष्टं । नचयज्ञादेरित्यप्यसंगतं । मोक्षधर्मवचनेनस्मृतिवचनेनच काम्यकर्मणांबंधकत्वेन हेयत्वेपि निवृत्तकर्मणोंतःकर

णशुद्धिद्वारावैराग्यादि हेतुत्वस्य "कर्मणाज्ञानमातनोति । कर्मणात्वधमःप्रोक्तः प्रसादः श्रवणादिभिः । निष्कामं ज्ञानपूर्वंतुनिवृत्तमिहचोच्यते । निवृत्तंसे वमानस्तुब्रह्माभ्येतिसनातनं । कर्मणाशुद्धसत्वस्यवैराग्यंजायतेहृदि । काम्यानां कर्मणांन्यासंसन्यासंकवयोविदुः" । इत्यादि प्रमाणप्रमितत्वात् । अन्यथा "शमद माद्युपेतस्स्यात्तथापितुतद्विधेस्तदंगतयातेषामवस्यानुष्टेयत्वादिति" ब्रह्मसूत्र विरोधः" । अतीतानागतज्ञानीत्रैलोक्योद्धरणक्षमः । एतादृशोपिनाचारंश्रौतं स्मार्तं परित्यजेदि"त्यादिस्मृतिविरोधः "अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनादिति" सूत्रविरोधश्चस्यात् । यदपिनचयस्ययस्येति ॥ तन्न ॥ अत्रहेतुत्वस्यत दन्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रतियोगित्वज्ञाप्यानन्यथासिद्धनियत पूर्व वृत्तित्वरूपस्य मतांतरेकार्यानुकूलातींद्रियशक्तिविशेषरूपस्यवा विवक्षितत्वेन अध्ययनेनवसतीत्यादौ फलस्यैव हेतुत्वेनाविवक्षिततया तत्रहेतुत्वस्यतत्प्रयोज केच्छाविषयत्वरूपत्वेनोक्तहेतुत्वस्य फलेच्छायांसत्वेपिफलेऽभावेनव्यभिचारा भावात् । उक्तजनकत्वरूपहेतुत्ववतः आनंतर्यप्रतियोगित्वेबाधकाभावात् । वस्तुतस्तु "अध्ययनेनेत्यत्रप्रकृत्यर्थस्याधेयतासंबंधेन न प्रत्ययार्थहेतुत्वे न्वयः किंतुनिरूपितत्वसंबंधेन" ततश्चाध्ययननिरूपितहेतुतावान्वासःइतिबोधो ह्यत्राविवक्षितः । सतिचैवं तत्रव्यभिचारचोदमनुपपन्नमिति । यदपि "विवरणैकदेशिमत इति" तदप्यशुद्धं । चंद्रिकायामेव "ननुसविचारश्शू द्रयागवन्नफलपर्यंतः तत्पर्यंतस्तुशमाद्यभावे नास्तीतिचेन्न तथापि विरागशमद मादि मुमुक्षासुसतीषु विवेकाभावमात्रेण फलपर्यंतविचाराभावादर्शना"दित्या दिनास्याश्शंकायाः परिहृतत्वात् । तथाचनित्यानित्यविवेकस्यनाधिकारि विशेषणत्वंयुक्तमिति चंद्रिकाशयः । शमाद्यभावेपीत्यनेनग्रंथेन मूलेव्यतिरेक व्यभिचारप्रदर्शनंतु "अर्थीसमर्थोविद्वानाधिक्रियत"इति न्यायेन सतिसामर्थ्यादौ

कर्माद्यनुष्ठानमन्यथानेत्यन्वयव्यतिरेकाभ्यामर्थित्वादेरधिकारिविशेषणत्ववत्साधनचतुष्टयस्याप्यधिकारिविशेषणत्वमन्वयव्यतिरेकगम्यमितिपक्ष इति न कोऽपि दोषःइति । तस्मादुक्तं दूषणंसुस्थमिति सिद्धं ॥ २० ॥

यदपि "यत्तु" ब्रह्मपदोपस्थापितवेदसामान्यांतर्गतयोग्य"तद्यथेहकर्मचितोलोकःक्षीयत"इति वाक्यामत इति सर्वनाम्नापरामृश्यते । तथाच कर्मफलानित्यत्वप्रतिपादकवाक्याद्धेतोः वैषयिकसुखे वैराग्योपपत्तिरितिभामत्यसंगता । अतश्शब्दस्यविचारकर्तव्यतारूपसाध्यानन्वयापत्तेः । वैराग्यादिरूपसाधनान्वयापाताच्च । अथशब्दार्थानंतर्यप्रतियोगिनिवैराग्ये अतश्शब्दोक्तहेतुत्वान्वयायोगाच्च । अथशब्दोपस्थापितवैराग्येणेव स्वजनकज्ञानजनकस्यतद्यथेहेतिवाक्यस्योपस्थितौसत्यां ब्रह्मपदेन परंपरयातदुपस्थापनोक्त्ययोगाच्च । वैराग्यहेतुसत्यानृत विवेकेहेतुतयानेहनानेत्यादेरेववक्तव्यत्वेनतद्यथेहेत्याद्युक्त्ययुक्तेश्चेति ॥ तन्न ॥ विचारकर्तव्यत्वस्यमुमुक्षामात्रसिद्धिकत्वेन मुमुक्षोपपादकवैराग्यासिद्धौतदसिध्यापत्यावैराग्यहेतोरेवावश्यवक्तव्यत्वेन तदर्थंतद्यथेहेतिवाक्यस्यातश्शब्देनग्रहणौचित्यात् । अपेक्षितान्वयस्यैवन्याय्यत्वेनानपेक्षितान्वयापादनायोगाच्च । वैराग्ये अतश्शब्दोक्ततद्यथेहेतिवाक्यस्यस्वजन्यप्रतीतिद्वाराजनकत्वरूपहेतुतयान्वयस्येष्टत्वात् । अत इति सर्वनाम्नाब्रह्मशब्दोपस्थापित वेदवाक्यग्रहणे संभवति वैराग्यरूपार्थोपस्थापितवाक्यत्वेन वाक्यग्रहणस्यान्याय्यतयातदापादनायोगाच्च । नेहनानेतिवाक्यस्यप्रपंचमिथ्यात्वावगमद्वारवैराग्यहेतुत्वेऽपि साक्षादेव वैराग्याजनकत्वेनातश्शब्देनतद्यथेहेतिवाक्यस्यैवग्रहणौचित्यादिति । तदप्ययुक्तं । अतोब्रह्मजिज्ञासेत्यत्रातश्शब्दार्थस्यहेतोर्जिज्ञासाकर्तव्यत्वरूपप्रधानसाध्येन स्वासिकाकांक्षायाः सत्वेन तत्रैवान्वयः तस्मादनित्यश्शब्दः अतोधर्मजिज्ञासेत्यादाविवस्पष्टं प्रतीयत इति प्रतीतस्यास्मदुक्तरीत्यायोग्यस्यसाक्षात्प्रधा

नसाध्यान्वयस्यत्यागेन जिज्ञासासाधनीभूतवैराग्यादिरूपाप्रधानसाध्येस्वारसि काकांक्षाभावेनान्वयस्यायुक्तत्वात् । यद्यपि तन्मतेयथाश्रुतेकर्तव्यपदाध्याहाराभावाज्जिज्ञासाकर्तव्येतिनार्थः । तथापि "ज्ञानेच्छाभवितुंयुक्तेति" श्रौतार्थेसति अर्थाद्विचारकर्तव्यत्वं प्राप्तमित्येवमुक्तं । नन्वन्यस्याप्रकृतत्वाद्वैराग्यादेरेव हेतुत्वोक्तौपौनरुक्त्यापाताद्ब्रह्मपदोपस्थापितवेदस्यवैराग्यादौ हेतुत्वमुच्यतइति चेन्न । अन्यस्यमोक्षादेः प्रकृतत्वस्यप्रागेववहुधाप्रतिपादितत्वात् । अथशब्दार्थानंतर्योपसर्जनविरागस्यान्यविशेषणत्वेनोपस्थितस्यातश्शब्दोक्त हेतुरूपान्यविशेषणान्वयस्यायोग्यत्वाच्च । जिज्ञासाकर्तव्यतायामपेक्षित हेतोरवश्योपन्यसनीयस्यसप्रयोजनत्वादेरनुपन्यासे जिज्ञासाकर्तव्यत्वासिद्धेश्च । नच जिज्ञासापदेनैव प्रयोजनादेर्विचारकर्तव्यताहेतोर्लाभ इति वाच्यं । निरासिष्यमाणत्वात् । हेतुपरेणातःपदेनैवफलादेर्हेतोः कथनस्यौचित्वाच्च । निरासप्रकारश्च नहिपूर्वपक्षिणाब्रह्मज्ञाने इच्छामंगीकृत्यतद्विचार आक्षिप्तः किंतु विषयाद्यभावेनेच्छैवनोदेतुंयुक्तेत्याक्षिप्तं । नचतंप्रतीच्छयाविषयादिसाधनं युक्तमित्यादिनाचंद्रिकायांव्यक्तः । किंचाथशब्दोपस्थापित वैराग्येणैव स्वजनकस्यतद्यथेहेतिवाक्यस्यसाक्षादेवोपस्थापनसंभवेब्रह्मपदेनतत्प्रमाणवेदोपस्थापनं तेनच तज्ज्ञानसाधनवैराग्यहेतुवाक्योपस्थापनं तेनच विरागसिद्धिरितिपरंपरयोपस्थापनोक्तिरयुक्ता । ब्रह्मपदेनवेदत्वेनवेदसामान्यबोधोत्तरं विमर्शेनयोग्यतयातद्यथेहेतिवाक्यविशेषलाभः वेदसामान्योपस्थितितद्विमर्शयोग्यत्वाद्युपस्थितिद्वारकः । वैराग्येणतुस्वप्रयोजकतयातद्यथेहेतिवाक्यस्य विशेषरूपेणैव साक्षाद्बोध इति महालाघवस्यसर्वानुभवसिद्धत्वात् । किंच विवरणमते विरागहेतुत्वे नसत्यानृतविवेकएवाभिमतः । भामत्यांनित्यानित्यपदयोः सत्यानृतपरतयाव्याख्यातत्वात् । नित्यःप्रत्यगात्मेत्यादिनाभामत्यांभाष्यस्यतथैवव्याख्यातत्वा

च्च । तथाचनेहनानेत्यादि वाक्यमेवयोग्यं त्वयोदाहर्तव्यं तस्यैवविरागहेतुस त्यानृत विवेकहेतुत्वेनत्वदभिमतत्वात् नतुतद्यथेहेतिवाक्यंतथा "तत्रप्रपंचस्य मिथ्यात्वरूपानृतत्वस्याप्रतिपादनात् । सत्यमिथ्याविवेकस्यैवनित्यानित्यविवेक रूपत्वादिति । तस्मादुक्तं दूषणं सुस्थमितिसिद्धं ॥ २१ ॥

यदप्युक्तं "यत्तु" अथशब्दबलेनैवसाधनकलापस्यब्रह्मजिज्ञासानिरूपित हेतुतासिद्धाव "क्षय्यंहवैचातुर्मास्ययाजिनस्सुकृतमित्या"दिना तस्यापवादशंका यांतन्निराकरणमथशब्दोक्तानंतर्यप्रतियोगिनिहेतुत्वाभिधायिनातःशब्देन क्रिय तइति विवरणोक्तमयुक्तं । अथशब्दलब्धहेतुत्वस्य पुनः अतश्शब्देनग्रहणमा त्रादुक्तापवादनिराकरणासिद्धेरिति ॥ तन्न ॥ एकतंतुबंधनात् द्वितंतुबंधनेदा र्ढ्यदर्शनेनाथशब्दसिद्धहेतुत्वस्यैवातश्शब्देनाप्युक्तौहेतुत्वदार्ढ्य सिद्धेः । विवे कवैराग्यादिगतहेतुत्वस्यदार्ढ्यंच "अक्षय्यंहवै" इत्यादिवाक्यस्यापेक्षिकामृतत्व सूचकयत्कृतकंतदनित्यमिति न्यायोपबृंहिततद्यथेहकर्मचितोलोकःक्षीयत इत्या दिवाक्यजन्यप्रतीत्यधीनवैराग्यादिवृत्तित्वं । तथाचोक्तापवादनिराकरणसाध कत्वमक्षुण्णमतश्शब्दस्येतियुक्तमेवोक्तं विवरणकृद्भिरिति । तन्मोहमूलं । चंद्रिकातत्प्रकाशयोरेवास्यचोद्यस्यसमुन्मूलितत्वात् । तथाहि "चंद्रिकायां अथशब्दोक्तानधिकाभिधायिनापवादशंकानिरासे अथशब्देनैवतन्निरासप्रसंगा त् । हेतुत्वसाधकहेतोः कथनएवापवादशंकानिरासः । नतूक्तस्यैवहेतुत्वस्य पदांतरेणकथनइति दिगित्युक्तं" तत्प्रकाशेपि "अथशब्दार्थानंतर्यप्रतियोगि नोवैराग्यादिसाधनचतुष्टयस्यैवात इति हेतुत्वमुच्यते अथ" साधनकलापानं तरं अतः साधनकलापादिति । नचपुनरुक्तिरितिवाच्यं । अक्षय्यवाक्येनक र्मजन्यसुखस्यानित्यतावगमेन ब्रह्मज्ञानफलं नित्यमन्यदनित्यमिति विवेकस्यत द्धेतुकवैराग्यादेश्चायोगेन विवेकादिसाधनकलापस्यनविचारहेतुत्वमित्यपवाद

शंकानिरासार्थत्वेनापौनरुक्त्यात्। दृश्यंतेहि अपवादानिरासार्था "अपिमृडमृदे" त्यादिविधयइति दूष्यांशस्यार्थः। इति दिगिति। अयंभावः "विचारकर्तव्यत्वरूपप्रधानसाध्ये अपेक्षितसप्रयोजनत्वादि स्वतंत्रहेतुसमर्पणपरत्वसंभवे आनंतर्योपसर्जनस्य हेतुतया प्राप्तस्यैवातश्शब्देन हेतुत्वोक्तेरयुक्तत्वात् अथशब्दोपस्थापितवैराग्यादिनैवस्वजनकस्य कृतकत्वरूपोपपत्युपबृंहितत्वेन प्रबलस्य "तद्यथेहकर्मचितोलोकःक्षीयत" इत्यादि वाक्यस्योपस्थापनेन ततएवापवादशंकानिराससंभवेनोक्तदार्ढ्यस्यापि संभवाच्च। जिज्ञासाकर्तव्यतायामपेक्षितहेतोरवश्योपन्यसनीयस्य सप्रयोजनत्वादेरनुपन्यासे जिज्ञासाकर्तव्यत्वासिद्धेश्चे" त्युक्तं। मतद्वयेपि जिज्ञासापदेनैव प्रयोजनादेः विचारकर्तव्यताहेतोर्लाभइति शंकातु प्रागेव निरस्ता। तथाचेदमर्वाचीनस्य दूषणाभासजल्पनं प्रतारणमूलमज्ञानमूलंवेति। किंच "द्विर्बद्धं सुबद्धं भवतीति" न्यायस्य नायं विषयः। किंतु "एकोब्राह्मण" इत्यादौ ब्राह्मणपदोत्तरप्रत्ययेनैव एकत्वसंख्याबोधनसंभवे एकपदं व्यर्थमितिशंकायां "पत्नींसन्नह्ये" त्यादाविव एकत्वस्याविवक्षितत्वचोद्यपरिहाराय द्विर्बद्धमितिन्यायेन एकशब्देनापि तदुक्तिरित्यन्यएव। किंचैकस्मिन्विषये प्रमाणांतरप्रवृत्तिस्थले प्रमाणसंप्लवेन विषयस्य सिध्यद्दार्ढ्यंचाविशंकप्रवृत्तिहेतुज्ञानविषयत्वाप्रामाण्यशंकाशून्यज्ञान विषयत्वनिश्चितप्रामाण्यक ज्ञानविषयत्वादिरूपं। नतूक्तरूपं। एतस्य हेतुत्वसाधकहेतुकथनंविनैकपदोक्तस्य पदांतरेणोक्तिमात्रेणासिद्धेः। अन्यथा शब्दोनित्यःकृतकत्वादित्युक्तेशब्दनित्यत्ववादिना तस्यकृतकत्वानंगीकारेणासिद्धत्वात्तस्य हेतुत्वं न संभवतीत्याशंकायां त्वदुक्तदार्ढ्यसंपादनाय कृतकत्वसाधकसावयवत्वहेतुमनुपन्यस्यापि कृतकत्वात् कृतकत्वादित्युत्तरंवदन्प्रतिवादीकृतीस्यादित्युक्तप्रलापस्यात्यंतासंबद्धत्वादन्यथाप्युक्तदार्ढ्यस्योपपादितत्वाच्चेति। तस्मादुक्तं दूषणं सुस्थ

मिति सिद्धं ॥ २२ ॥

यदपि, यत्तु ; भामत्यां "निश्चितेजिज्ञासायाअयोगात् संदिग्धतया ब्रह्मैव विषयः । ज्ञानमेवेच्छाविषयत्वेन प्रयोजनमिति जिज्ञासापदस्वार स्येन विषयप्रयोजने सूचिते" इत्युक्तिरसंगता पूर्वपक्षिणाविषयाद्यभावादिच्छा नोदेतु युक्तेत्येवमाक्षेपकरणात् तंप्रतीच्छया विषयसाधनायोगइति" ॥ तन्न ॥ ब्रह्मज्ञानसाध्यो मोक्षइति महद्वचउपश्रुत्य तत्वबुभुत्सुना सांगवेदाध्ययनजन्य जीवब्रह्मैक्यविषयकापातप्रतीतेरहमितिज्ञानस्य ब्रह्मज्ञानत्वनिश्चयात् उक्तज्ञान सत्वेपि मोक्षादर्शनेन जीवब्रह्मैक्यरूपविषयांशे, तज्ज्ञानप्रयोजनरूपमोक्षांशेच संदेहवतापूर्वपक्षिणा ब्रह्मज्ञानेच्छामंगीकृत्य विचारस्याक्षिप्तत्वादिति । तदप्य ज्ञाननिबंधनं । नचसर्वजनीनाहमनुभवसिद्धआत्मासंदिग्धोवा, सप्रयोजनोवा । येन जिज्ञास्यस्सन् विचारंप्रयुंजीतेति त्वदीयपूर्वपक्षोपसंहारे जिज्ञासाक्षेपपूर्वं विचारस्याक्षिप्तत्वात् । ततश्च ज्ञानेच्छया विषयप्रयोजनसाधने ज्ञानेच्छा यां सिद्धायां विषयप्रयोजनसिद्धिः तत्सिद्धौच तत्सिद्धिरित्यन्योन्याश्रयः । किंच, सांगवेदाध्ययनजन्यापातप्रतीतिदशायां द्वैताद्वैतोभयवाक्यदर्शनेनैक्य संशयस्यैव संभवात् तद्दशायामहंप्रत्ययस्य ब्रह्मज्ञानत्वनिश्चयोक्तिरयुक्ता । अतएवतत्वमस्यादिवाक्यादापातप्रतीतेप्यैक्ये विसंवाददर्शनेन संशयाद्यपाक रणं विचारशास्त्रेणेति त्वत्प्राचां प्रवादः । किंच विषयांशे प्रयोजनांशेच संदेहे नाहमितिज्ञानं मोक्षजनकंनवा, ऐक्यंशास्त्रविषयोनवा, इत्येवंरूपेण संदिग्ध स्यैव विचार्यत्वात्प्रकृते संदिग्धे अहमितिज्ञानस्य मोक्षजनकत्वविषये जिज्ञा सासूचनसंभवेपि न ब्रह्मज्ञानेच्छांगीकारसूचनसंभवः ब्रह्मज्ञानत्वनिश्चयादिति त्वदुक्तेः । एवंब्रह्मज्ञाने इच्छामंगीकृत्येत्युक्तिरपि अयुक्तैव । ब्रह्मज्ञानेच्छां विचारंचाक्षिपता पूर्वपक्षिणा इच्छाया अंगीकर्तुमशक्यत्वात् । अन्योन्याश्रया

द्युक्तदूषणगणग्रासाच्चेति" तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ २३ ॥

यदपि, यत्तु; विवरणे "अथशब्देनाधिकारी जिज्ञासापदेनेच्छाविषय त्वेन ब्रह्मज्ञानंप्रयोजनं ब्रह्मज्ञानफलंमोक्षः । ब्रह्मरूपविषयश्चसूचित" इत्यु क्तिरयुक्ता । "त्वन्मते जिज्ञासापदस्य विचारलक्षकत्वेन ज्ञानेच्छापरत्वाभा वात् । लक्षणास्थले विषंभुंक्ष्वेत्यादाविव शक्यार्थस्य त्यक्तव्यत्वादिति" ॥ तन्न ॥ गंगायांघोषइत्यत्र लक्षणास्थलेपि तीरेघोषइति निर्देशसंभवेन गंगापद निर्देशसामर्थ्यात्प्रवाहरूपशक्यार्थप्रतीत्यधीन शैत्यपावनत्वादिसूचनवद्विचार पदस्थाने प्रयुज्यमानं जिज्ञासापदं स्वसामर्थ्यात् जिज्ञासाप्रयोजकसंदेहस्य, प्रयोजनस्यच सूचकंभवतीत्यस्य प्रामाणिकसिद्धत्वादिति । तदप्यज्ञानमूलं । चंद्रिकायां प्रकृतानुगुणस्येच्छार्थकप्रत्ययघटितस्य विषंबुभुक्षते इत्यादेरुदाहृत तया तद्विपरीतोदाहरणेनान्यथानुवादात् "विषं बुभुक्षत इत्यनेन नविषभक्षणा देरिष्टत्वसिद्धिः । प्रतीतस्यापि मुख्यार्थस्य त्यक्तत्वात् अत्रपूर्वपक्षिणा इच्छानंगीकाराच्च । त्वन्मते ज्ञानेच्छासंभवस्योक्तत्वाच्च । मुमुक्षायाः अधिकारिविशेषणत्वनिरासाच्च । विषयसूचनंत्वसंदिग्धादन्यसूचनंविना न शक्यं । अन्यथा शास्त्रारंभसामर्थ्यादेव वा, विचारकर्तव्यत्वोक्तिसामर्थ्यादेव वा, तत्प्रयोजकविषयादिसूचन संभवाज्जिज्ञासापदादिना तत्सूचनोक्त्ययुक्ति" रित्यादिना चंद्रिकायां । "विषं बुभुक्षत इत्येतच्छत्रुगृहभोजनस्यनिषेधक मिति न विषभोजनेच्छापरं । कूलंपिपतिषती त्येतत्कूलपतनमाशंक्यतइत्ये तत्परं । नतुपतनेच्छापरं"आशंकायां सन्वक्तव्य" इति कात्यायनस्मरणात्। तथाच तत्रोभयत्रान्यार्थपरत्वाद्विषभक्षणादेरिष्टत्वं नास्ति । तद्वज्ज्ञानमपि नेष्टमिति न प्रयोजनस्य तेनलाभः । पूर्वपक्षिणेति । तथाचान्योन्याश्रयः । उक्तत्वाचेति । तदीयाथशब्दार्थखंडनप्रस्तावे नतावद्विधौ मुमुक्षुरधिकारीत्या

दिनेति भावः । निरासाच्चेति । मुमुक्षाच नपरमते युक्तेत्यादिना । विषयेति । यदसंदिग्धं जीवादि ततोन्यस्येश्वरादेः सूचनंविना नशक्यं । तच्च ब्रह्मपदे नैव । अयंच दोषो भामतीमतेपि ध्येयः । ननु जिज्ञासापदोपादानसामर्थ्यादेव तत्प्रयोजकविषयादिलाभाद्विषयादिसिद्धिर्भविष्यति । अन्यथा तद्वैयर्थ्यमित्यत आह । अन्यथेति । जिज्ञासापदसामर्थ्यादेव तत्सूचनइत्यर्थः । शास्त्रारंभप्रयोजक विषयादिसूचकमादिसूत्रं हित्वैव जन्मादिसूत्रमारभ्य शास्त्र आरब्धेसति । यद्यत्र विषयादिकं नस्यात्तदा प्रेक्षावान्सूत्रकारो नारभेत आरभतेचातोत्रास्ति विषयादीत्यारंभसामर्थ्यादेववा जिज्ञासायाः विषयाद्यभावे कर्तव्यत्वोक्त्ययोगात्तत्सामर्थ्यादेववेत्यर्थः । उपलक्षणमेतत् । "ईक्षतेर्नाशब्द" मित्यादौ साध्यनिर्देशसामर्थ्यादेव तत्प्रयोजकलाभादीक्षतेरित्यादिहेतूपन्यासो व्यर्थइत्यपिध्येयमि"त्यादिना तत्प्रकाशेप्युक्तशंकापंकस्य संक्षालितत्वात् । किंच निरूढेतरलक्षणास्थले प्रयोजनापेक्षायामपि निरूढलक्षणास्थले मंचाःक्रोशंतीत्यादौ न प्रयोजनापेक्षा । प्रकृतेपि जिज्ञासितं सुसंपन्नमित्यादि प्रयोगाज्जिज्ञासापदलक्षणापि निरूढेति न प्रयोजनचिंतायुक्ता । अस्तु वा, सा; तथापि, न परेणसंतोष्टव्यं; लोके विचारस्येच्छासाध्यत्वसूचनस्य फलत्वसंभवेपि मुख्यार्थानुपपत्तिनिमित्तत्वाल्लक्षणायास्तत्रानुपपत्तिं पश्यतः तद्ग्रहणायोगेन त्यक्तस्य मुख्यार्थस्य लक्षकपदतात्पर्यविषयत्वमंगीकृत्य तेनार्थांतरसूचनकथनस्यानुचितत्वात् । जहल्लक्षणास्थले शक्यार्थस्याविवक्षितत्वाद्विवक्षितार्थस्यैव साधकत्वात् परिमले "गंगापदं वस्तुतः स्वार्थसंबंधिवुभुत्सितनिविडाधाररूपं तीरं लक्षयति । नतुप्रवाहविशेषसंबंधित्वमपि । मुख्यार्थसंबंधित्वस्य लक्षणीयकोट्यप्रवेशात् । अर्थात्तीरविशेषलाभ"इत्युक्तत्वाच्च । किंच गंगायामित्यादि दृष्टांतोप्यसंगतः । नहि तत्रापि प्रयोक्ता लक्षकाद्गंगापदा

देव शक्यार्थं प्रवाहं तत्सन्निधानेन घोषस्य पावनत्वादिकंच प्रतीत्य तत्प्रयोजनसूचनाय लक्षकं पदं प्रयुङ्क्ते । किंतु प्रत्यक्षादि प्रमाणांतरेण प्रवाहं तत्संगततया घोषेपावनत्वादिकंचानुभूय परेषां गंगापदालब्ध शैत्यपावनत्वादि सूचनतात्पर्येण । यद्यपि सिद्धांते जहल्लक्षणास्थलेप्युपसर्जनतया शक्यार्थ विषयकबोधोंगीकृतः । तथाप्यनुपपत्तौ गृहीतायामन्यपदार्थान्वयित्वार्थांतर सूचकत्वादिना स्वातंत्र्येणोपस्थितिर्नांगीकृता । ततश्चपूर्वपक्षिणाइच्छानंगीकारात्त्वन्मतेज्ञानेच्छासंभवादिदोषो दुरुद्धरएवेति । तस्मादुक्तंदूषणं सुस्थमिति सिद्धं ॥ २४ ॥

यच्चोक्तं, यत्तु; अद्वैतमते शास्त्रारंभसामर्थ्यात्कर्तव्यत्वं विचारस्य तेनच विषयादिसूचनं सवत्विति ॥ तन्न ॥ आक्षेप्यस्य कर्तव्यत्वस्य अकरणेप्रत्यवायजनकनित्यकर्मणः कर्तव्यत्वस्येव प्रयोजनाद्यव्याप्यत्वेन तत्सूचकत्वानियमादिति । तदपिमंदं । नित्यकर्मणोपि प्रत्यवायानुत्पादांतःकरणशुद्धीश्वरप्रीत्याद्यनेकफलसंपादकत्वेन कर्तव्यत्वस्य प्रयोजनाद्य व्याप्यत्वकथनस्याज्ञानमूलत्वात् । किंच सतिविषयभूते भूम्यादौ प्रयोजने सस्याधिगमादौ अधिकारिणि कृषीवलादौ कृष्यादिकं कर्तव्यमुपलब्धमिति कर्तव्यतायाः विषयादिमत्तया व्याप्तत्वस्य सर्वमीमांसकसम्मतत्वादव्याप्य त्वोक्तिरयुक्ता । अन्यथा प्रयोजनाद्यभावेन विचाराकर्तव्यत्वपूर्वपक्षानुदयेन विचारशास्त्रवैयर्थ्यापातात् । "प्रयोजनमनुद्दिश्यनमंदोपिप्रवर्तते" इति न्यायेनस्वकीयं, परकीयंवा किंचिदपि प्रयोजनमनुद्दिश्य प्रेक्षावतः प्रवृत्त्ययोगाच्चेति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ २५ ॥

यदपि, यत्तु; अद्वैतमते ब्रह्मपदस्याखंडब्रह्मपरत्वे लक्षणा, मुख्यार्थत्यागश्चस्यादिति ॥ तन्न ॥ ब्रह्मपदशक्यतावच्छेदक जगत्का

रणत्वादिरूपविशेषणांशस्य त्यागेप्यखंडस्य विशेष्यस्य ब्रह्मपदेन शक्त्यैव ग्रहणसंभवात् । पदनिरूपित वृत्तिविशेष्यस्यापि शक्यत्वात् । अन्यथा गौरनित्येत्यादौ गोपदस्य व्यक्तौ लक्षणापत्तिः । तत्रगोत्वस्यानित्यत्वान्वयाभावेन विशेषणतया विवक्षाभावादिति । तदप्यशुद्धं । चंद्रिकायां लक्षणायाः कंठतोनुक्तत्वेन त्यागश्चेति चशब्दस्यायुक्तत्वात् । चंद्रिकाया मखंडशब्देन यत्पदस्य यः प्रवृत्तिनिमित्तधर्मः स्वसमानसत्ताक तद्धर्मसंसर्गवतएव तत्पदवाच्यतया ब्रह्मणश्चाखंडतयातादृशत्वाभावेन ब्रह्मपदवाच्यत्वासंभवइति चंद्रिकाभिप्रायावगमाच्च । गौरनित्येत्यत्र गोव्यक्त्यासहानित्यत्वान्वयेपि गोत्वस्य शक्त्युपस्थितस्य गविप्रकारतया भानवद्ब्रह्मपदेन शक्त्युपस्थितस्य गुणपूर्णत्वादेः शक्त्युपस्थितविशेष्ये प्रकारतया भानस्यावर्जनीयत्वे नाखंडार्थत्वभंगप्रसंगात् । अन्यथाघटोऽश्वइत्यादावपि प्रमुष्टघटाश्वत्वकशक्त्युपस्थित विशेष्यकान्वयबोधस्यात् । शुद्धस्यापि शक्त्यधीनबोधविषयत्वे तस्यावाच्यत्वसमर्थनासंगतेश्च । जातिशक्तिवादिनस्तव गवादेर्वाच्यैकदेशत्वकथनस्य स्वोक्तिविरुद्धत्वाच्च । आपदेवेनापि वेदांतसारव्याख्यायां "शक्तिजन्योपस्थितिविशेष्ययोश्च भासमानो भेदः संसर्गविधयैव भायात् एवं चाखंडार्थत्वव्याघातः । तस्मादखंडार्थत्वसिध्यर्थं शक्तिजन्योपस्थितिं त्यक्त्वा शुद्धचैतन्योपस्थित्यर्थं लक्षणावश्यकीति" शक्तिपक्षस्य दूषितत्वाच्चेति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ २६ ॥

यदपि, यत्तु; ब्रह्मत्वस्य कालापरिच्छिन्नत्वरूपत्ववत् वस्त्वपरिच्छिन्नत्वरूपभेदाप्रतियोगित्वरूपत्वाद्ब्रह्मशब्देन जीवाभेदो ब्रह्मणि सिध्यति । तद्भेदे तद्रूपविकलत्वादल्पत्वप्रसंग इत्यद्वैत्युक्तमयुक्तं । ब्रह्मणो घटादिभ्यो भेदे तद्रूपत्वाभावेनाल्पत्वापत्या घटादिरूपत्वस्यावश्यकत्वेन जडत्वापत्तेः ।

अतोब्रह्मणोऽजडत्वमिच्छता भेदस्यपरिच्छेदरूपता त्याज्या । तथाच ब्रह्मणि जीवभेदस्यापरिच्छिन्नत्वाविरोधितया सूत्रस्थब्रह्मशब्देनाऽपरिच्छिन्नत्ववाचिना जीवब्रह्माभेदोऽसिद्धइति ॥ तन्न ॥ वस्तुपरिच्छेदाभावस्य ब्रह्मणि तत्तद्वस्तुस्वरूपत्वरूपस्यस्वीकारेपि जडत्वाप्रसक्तेः । घटादिरूपत्वस्य घटाद्यात्मना परिणममानाज्ञानविषयत्वरूपत्वेन तस्य जडत्वाप्रसंजकत्वात् । अन्यथा यद्रजतं साशुक्तिरिति प्रतीतिसिद्धशुक्तिनिष्टरजतरूपत्वेन शुक्तेः रजतवत्प्रातिभासिकत्वादिप्रसंगात् । जीवत्वस्याविद्यकतया तद्विशिष्टचैतन्यरूपस्य जीवस्य विशिष्टरूपेणाविद्यकत्वात्तदात्मनापरिणममानाज्ञानविषयत्वरूपजीवत्वस्य संभवेन ब्रह्मपदेन जीवब्रह्माभेदबोधनसंभवात् । जीवत्वंच जाग्रदाद्यवस्थात्रयवत्वमिति । तदत्यंतानुपपन्नं । तथाहि । अज्ञानस्याश्रयानुपपत्त्या लक्षणासंभवेन, विषयाभावेन, प्रमाणाभावेन चायुक्तताया: न्यायामृते सोपपत्तिकं समर्थितत्वादज्ञानस्वरूपमेवतावद्दुर्लभं । तत्राज्ञानरूप धर्मिग्राहकमानत्वेनोपन्यस्तस्याहमज्ञइति प्रत्यक्षस्य प्रतीत्यंतरसिद्धाज्ञानस्वरूपस्यात्मनि संसर्गमात्रवेदनरूपत्वेन सिद्धाज्ञान विषयत्वसंभवेपि न प्राथमिकसिद्धिरूपता । अहमज्ञानमिति वा, मय्यज्ञानमितिवाऽप्रतीत्या आरोपितस्याप्यारोपंविनाऽसिद्धेः । साक्षिण्यज्ञानानुवेधाभावेन तत्रतदारोपरूपत्वाभावेन तस्याज्ञानसाधकमानत्वायोगात् । अहमर्थाश्रितत्वोल्लेखेन शुद्धचिदाश्रयत्वमतभंगापातात् । अन्यथा कर्तृत्वादेरपि शुद्धचिदाश्रितत्वापाताच्च नतेनाज्ञानसिद्धिः । वस्तुतस्तु । अहमज्ञइति अहमर्थाश्रितत्वग्राहक धर्मिग्राहक मानविरोधात् । "निरनिष्टोनिरवद्य" इत्यादिश्रुतिविरोधाद्भ्रांतिसामानाधिकरण्यनियमाच्च नाज्ञानं शुद्धचिद्गतं । किंच चिन्मात्रेऽज्ञानस्य स्वाभाविकत्वे आनंदादिवदनिवृत्तिः । औपाधिकत्वे उपाधिस्सएवचेदात्माश्रयः । अन्यश्चेदन्योन्याश्रयः चक्रकमन

वस्थावेति । किंचाज्ञानस्यचिदाश्रितत्वे साक्षिण्यज्ञानप्रतीतेः तद्भाति तत्प्र कारकतया भ्रमत्वायोगात् दोषांतराभावान्नित्यत्वाच्चाज्ञानस्य साक्षिरूपस्य यथार्थतया तद्विषयस्याध्यस्तत्वायोगेन सत्यत्वात्तत्कार्यस्यापि सत्यत्वं दुर्वारं । किंच त्वन्मते शुद्धब्रह्मणश्चिन्मात्रत्वेपि श्रुत्यादौ तस्य सर्वज्ञत्वप्रतिपादनादे काश्रयैकविषयकज्ञानाज्ञानयोर्विरोधात् "तुरीयंतत्सर्वदृक्सदे"तिशुद्धेपिसार्वज्ञ श्रुतेः सर्वेषांदृगित्यन्यथाव्याख्यानस्य मुक्तौ सर्वाभावादतीतविषयोल्लेखे मोक्ष स्य संसारसमानधर्मत्वापाताच्चेत्यादिना तरंगिण्यां दूषितत्वात् । स्वरूप ज्ञप्तेः स्वतः सर्वकालाद्यसंबंधेऽसत्वापातेन स्वतस्सर्वसंबंधाभावेऽसर्वगतत्वा पातेनचाविद्ययेव स्वतएवान्येनापि संबंधोपपत्तेः असंगत्वश्रुतेः तत्कृतलेपाभा वपरत्वाच्च नाज्ञानस्य सर्वज्ञाश्रयत्वं । त्वन्मते गगनस्याप्यनित्यद्रव्यत्वेन स्वतएवांशसंभवेन "स्वेनैव कल्पिते देशे व्योम्नि यद्वद्घटादिकं । तथाजीवा श्रिताविद्यां मन्यंतेऽज्ञानकोविदा" इत्यादिप्रक्रियाया निर्मूलत्वात् । निराश्रया विद्यायोगेनान्योन्याश्रयापाताच्च न वाचस्पतिरीत्या जीवाश्रितत्वं वा तस्य युक्तं तस्मादाश्रयोदुर्लभः । किंच "स्वप्रभत्वेनापरोक्षव्यवहारार्ह आत्मनि०। तद्योग्यत्वाभावरूपमविद्यावरणं कथं ? "निर्विशेषे स्वयंभाते किमज्ञानावृतं भवेत् । मिथ्याविशेषोप्यज्ञानसिद्धिमेवह्यपेक्षते" इत्यादावाकरएवाज्ञानविष यासंभवस्योक्तत्वात् । न्यूनयाऽविद्यया विषयसंबंधिन्याधिकब्रह्मावरणायो गाच्च अनिर्वाच्याविद्यायाः विषयोपि दुर्वचः । अंगुलिर्न्यूनाप्यविषयसंबंधि त्वादधिकसूर्याच्छादिकेतियुक्तं । तदुक्तं "इति भाष्यकृतोभाषा तेन भ्रांति र्द्विरूपिणी । तादात्म्यारोपरूपावा धर्मारोपात्मिकापिवा । नाज्ञानमहमि त्यस्ति नाज्ञानत्वंमयीत्यपि । भ्रमो ब्रह्मणि तेनस्यात्कथमज्ञानकल्पना । अज्ञोहमितिच ज्ञानं सिद्धाज्ञानस्यवेदनं । उक्ताकारद्वयायोगात्सिद्धिश्च

भ्रमरूपिणी । नास्त्येवेतिकुतोऽज्ञानं कल्पितंस्यादियंतुधीः । नाज्ञानकल्प नारूपा ततोऽज्ञानमकल्पितं । नाज्ञानमन्यधर्मोयं ब्रह्माज्ञानैकवादिनः । अतद्वतिच तद्वत्वज्ञानंचेत्स्यादयं भ्रमः । अज्ञानवच्च तेब्रह्म तद्वत्ताधीः कथं भ्रमः ?" आत्मनि देहतादात्म्यारोपेपि मयिदेहइति तत्संसर्गारोपोनास्ति । एवमज्ञानतादत्म्यारोपेपि मय्यज्ञानमिति वा, अहमज्ञइतिवा, तत्संसर्गारोपः कथंस्यात् ? किंत्वज्ञानत्वरूपाज्ञानाधर्मस्यैव संसर्गारोपः । ततश्च देहस्येवा ज्ञानस्यैव संसर्गारोपे कथंनापसिद्धांतः ? "तत्रैव सन्निकृष्टस्य सन्निकर्षे कथं भ्रमः ? घटवद्भूमिघटयोस्संयोगोयदकल्पितः । दोषाभावाच्च ना ज्ञानभ्रांति र्युक्तामते तव । तमोन्यभ्रमदोषोपि नहिदोषस्स्वदर्शने । अनाद्यज्ञानवा देच तस्याज्ञानं न किंचित् । किंचाज्ञानाध्यासरूपीसाक्ष्यनादिर्मतेतव । जन्मैवास्य नयुक्तंतद्दोषजत्वंतु दूरतः । अमानत्वस्वतस्त्वस्य दोषाजन्यो भ्रमोपिचेत् । अतःप्रमीमाणत्वात्त्वय्यज्ञानमकल्पितं । किंचाज्ञानस्य विज्ञा नमहमित्येव देहिनां । आशाब्रह्माश्रिताज्ञाने पश्य किंकेनसंगतं । ऐक्याच्च देवचेद्ब्राह्ममन्योन्याश्रयतातदा । अज्ञानारोपमूलस्तेशास्त्रविस्तृतपादपः । मूलस्यदुर्बलत्वेतु सोपि वाताहतःपतेत् । सत्याज्ञानभवं विश्वमसत्यंकेनहे तुना । आम्रस्य बीजतः किंस्याद्विषवृक्षस्य संभवः । सत्याज्ञानागतोभेदो ज्ञानबाध्यः कथंवद ? सत्याज्ञाननिवृत्तेश्चायोगान्मोक्षः कथंतवेति" । ततश्च प्रत्यक्षस्यासाधकत्वादनुमानस्य न्यायामृते बहुधादूषितत्वेनाभासत्वात्, आग मस्यचान्यार्थत्वेनाऽज्ञानासाधकताया उपपादितत्वाच्च नाज्ञानस्य प्रामाणिक तेति । एवं तल्लक्षणानामप्याकरे बहुधादूषितत्वान्नतस्य लक्षणसंभवोपीति । किंच अस्तुवाहमज्ञइत्यादेरज्ञानसाधकमानत्वं । तथापि तस्य ज्ञानाभाव विषयताया आकरे समर्थितत्वान्नतस्य भावरूपत्वसिद्धिः । अस्तुवा भाव

रूपत्वं । तथापि मृद्घटइत्यादिवदनुवेधाभावेनोपादनत्वानुपपत्तिः । प्रपंचस्याज्ञानपरिणामत्वे रूप्यादिवत्स्वज्ञानात्पूर्वमिंद्रियसन्निकर्षायोगेन प्रतिकर्म व्यवस्थाभंगश्च । अन्यथाज्ञाननिवर्त्यत्वाभावापातात् । अस्तुवोपादानत्वं तथाप्यनादिभावस्योपादानाभावेन ब्रह्मणस्तद्रूपविकलत्वादल्पताऽअपरिहार्यैव। किंच वस्तुतः ततोभिन्नएव तदात्मना परिणममानाज्ञानविषयत्वदर्शनेन तस्य तद्रूपतायाः पारिभाषिकत्वापत्याऽपसिद्धांतः । निर्विशेषस्य स्वप्रकाश चैतन्यस्योक्तरीत्याऽज्ञानविषयत्वायोगश्च । स्वरूपचितोप्यज्ञानविरोधितायाः स्सामर्थितत्वात् । किंचाज्ञानस्यैवोपादानत्वे त्वन्मते "सच्चत्यच्चाभवदि" त्यादिनाब्रह्मणः सर्वोपादानत्वेन सर्वात्मकत्वोक्तिः एकविज्ञानेन सर्वविज्ञानं "यतोवे" त्यादिश्रुतिस्थपंचम्यादेर्ब्रह्मण उपादानत्वे मानत्वसमर्थनंचायुक्तंस्यात्। प्रपंचस्याभिन्ननिमित्तोपादानत्वसमर्थनपरप्रकृतिसूत्रादेः प्रवाहानिक्षेपापत्तिश्च । तत्वतो निर्विकारे ब्रह्मण्यतात्विक विकाराविरोधेन जगदुपादानमायाश्रयतया ब्रह्मणः उपादानत्वमित्यप्ययुक्तमेव । अंशोस्तंतुप्रतीवानादिमायांप्रति ब्रह्मणः उपादानत्वाभावात्। शुक्तिब्रह्मणोरेव रूप्याकाशाद्युपादानत्वसंभवे अविद्यान्वयव्यतिरेकयोर्निमित्तत्वेनाप्युपत्तेरविद्योपादानकत्वकल्पनायोगाच्च । किंचजीवस्याज्ञानपरिणामत्वेऽनादिभावत्वसिद्धांतभंगः । विशिष्टाभेदस्यैवोक्तरूपस्य संभवेनैक्यार्थमध्यासभाप्यस्यानुत्थानप्रसंगः । उक्तपारिभाषिकाभेदस्यभेदेपि संभवेनास्मन्मताविरोधश्चेति । किंचघटादेरज्ञानोपादानकत्वेसोपादानकत्वेन सकर्तृकत्वस्याप्यापातः । नचेष्टापत्तिः । जीवस्येश्वरस्यवा तत्कर्तृत्वायोगात् । आरोपितं प्रत्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वरूपकर्तृत्वस्याप्रामाणिकत्वाच्च । किंच त्वन्मते अभावस्य निरुपादानकत्वात्सोपादानत्वेपि भावरूपाज्ञानानुपादानत्वात् अभावरूप विकलत्वेनाल्पत्वापरिहारः । भावाभावयो

विलक्षणत्वेनोपादानोपादेयभावानंगीकारात् । अन्यथा सत्यस्यैवासत्योपादानत्वसंभवेन मिथ्याभूतस्य मिथ्याभूतमेवोपादानमन्वेषणीयमिति युक्त्याऽज्ञानकल्पनानुपपत्तेः । ननुसत्यस्यासत्योपादनत्वे सत्यस्यानिवृत्त्या तदुपादेयस्याप्यनिवृत्तिस्स्यादितिचेन्न । विरोधिसन्निपातादिना कार्यनाशदर्शनात् सत्यस्य दुग्धादेः परिणामदर्शनेनाज्ञानस्यापि सत्यतायाएवयुक्तत्वाच्च । किंच इदं रूप्यमिति रूप्यानुविद्धस्येदमंशस्यैव दोषादिवशात्सत्याविकाराविरोधेन रूप्यात्मना मिथ्याविकाररूपविवर्तसंभवेन तदननुविद्धस्याज्ञानस्योपादानत्वमयुक्तं । नहिकदाचिदपि कस्यापीदं रजतमितिवत् घटोज्ञानमितिवाऽज्ञानं घट इतिवा प्रत्ययोस्ति । परोक्षधियोप्यज्ञाननिवर्तकत्वेन श्वेतत्वेनानुमितेशंखे श्वैत्याज्ञानाभावेन पीतत्वभ्रमायोगः । सुखाद्यावरकाज्ञानाभावेन तत्रदुःखाभावत्वादिभ्रमायोगश्च । भावविलक्षणस्याप्युपादानत्वे ज्ञानप्रागभावस्यैवोपादानत्वापातश्चेति । नचमृद्घटइत्यादिवदनुवेधाभावोपि उपादानत्वं युक्तं । रूपंघटइतिप्रतीत्यभावेनानुवेधनियमाभावादितिवाच्यं । शुक्लोघटश्चलतिघट इति विशेषानुवेधस्य सत्वात् । नच प्रकृत्याद्यनुवेधः परमतेपि नास्तीति घटादेः प्रकृत्याद्युपादानत्वमपि नस्यादिति वाच्यं । मृद्घटइत्यादेरेव तदनुवेधत्वात् । घटादेस्तु साक्षात्प्रकृत्युपादानत्वानंगीकारात् । भ्रांतेस्तु नकेनापि रूपेणाज्ञानानुवेधस्संभवतीत्युक्तं । किंच यद्रजतं साशुक्तिरित्यस्य बाधायां सामानाधिकरण्यरूपस्यार्थव्यवस्थापकतायाः अद्वैतचंद्रिकायां दूषिततत्वात् । यद्रजतमित्यत्र रजतपदस्य रजतभिन्नत्वेसति रजतत्वप्रकारक भ्रमविषयसमर्पकत्वेन बाधायां सामानाधिकरण्यस्य यस्स्थाणुस्सपुमानित्यादाविव शुक्तेः रजतरूपत्वासाधकत्वात्प्रतीति सिद्धे त्युक्तिरयुक्ता । विशिष्टरूपजीवस्याज्ञानपरिणामत्वेनोक्तरूपाभेदविवक्षायां विशिष्टैक्यप्राप्त्या शुद्धाद्वैतभंग

पत्तिः । नीलोघटइत्यादौभेदाभावप्रतिभासानुपपत्तिः । मोक्षेऽज्ञानाभावे नब्रह्मण्युक्तरूपजीवाभेदानुपपत्तिः । शुक्तौरजताभेदांगीकारेनेदंरूप्यमिति बा धज्ञानस्यैव भ्रमत्वापातश्चेतिदिक् । किंच तादात्म्यनिषेधरूपभेदविरोधिनोऽभेदस्य तादात्म्यरूपत्वमेवोचितं । उक्तपारिभाषिकाभेदस्य भेदाविरोधित्वात् । नीलोघटइत्यादौ भासमानोऽभेदः नोक्तरूपस्संभवति । किंतु तादात्म्यमितिवक्तव्यं । ततश्च लाघवात्सर्वत्राप्यभेदस्य तादात्म्यरूपत्वस्यैव युक्तत्वात् । तादात्म्यस्यच तन्निष्ठासाधारणधर्मयोगित्वरूपत्वात् ब्रह्मणोघटाद्यभेदे जडत्वापत्तिर्दुर्वारैवेति । किंच प्रपंचस्याज्ञानकल्पितत्वे यतोवेत्यादौ जन्माद्युक्तिः तदैक्षतेत्यादौ ईक्षापूर्वककर्तृत्वोक्तिः "वायोरग्निरित्यादौ" अबादेर्वाय्वादिजन्यत्वोक्तिः "पृथिव्यप्सुविलीयत" इत्यादौ पृथिव्यादीनामबादौ लयोक्तिरित्याद्ययुक्तं स्यात् । नह्यज्ञानकल्पितस्य रूप्यादेर्जन्मादिकंवा, ईक्षापूर्वकसृष्टत्वंवा, कल्पितात्कल्पितांतरस्योत्पत्तिर्वातत्रलयोवा, दृष्टइष्टोवेति । अधिकंतु न्यायामृततरंगिण्यादौ व्यक्तं । किंचाज्ञानशब्देनाऽनाद्यनिर्वाच्याऽविद्याविवक्षायां तत्स्वरूपस्य दूषितत्वादविद्यास्वरूपस्यैवालाभः । त्रिगुणप्रधानविवक्षायांतु ब्रह्मणस्तद्विषयत्वानुपपत्तिरित्यास्तां विस्तरः । जाग्रदाद्यवस्थावत्वं जीवत्वमित्युक्तिरपि भवन्मते जाग्रदाद्यवस्थाया अंतःकरणधर्मत्वांगीकारादयुक्तैव । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ २७ ॥

यदपि "यत्तु" ब्रह्मणोनिरतिशयमहत्वार्थं अनेकात्मकत्वे अनेकात्मकमाषराशौ निरतिशयमहत्वबुद्धिस्स्यात् । किंचापरिच्छेदस्य ब्रह्मानन्यत्वे बृहधात्वर्थसंभवेपि प्रत्ययार्थाश्रयासिद्धिः । अन्यत्वेप्यपरिच्छेदस्य तात्विकत्वे ब्रह्मणः तद्रूपत्वविकलत्वात् परिच्छिन्नत्वापत्तिः । अतात्विकत्वे परिच्छिन्नत्वापत्तिः। किंच वस्त्वन्यत्किंचित्सत्यमस्तिचेत्तान्निरूपितमहत्वंसिध्यतीति

ब्रह्मणस्सद्वितीयत्वापत्तिरिति ॥ तन्न ॥ ब्रह्मणोऽनेकात्मकत्वस्यानेकात्मना परिणममानाविद्याविषयत्वरूपत्वात् मापराशौ तदभावेन महत्वबुध्यापादनासांगत्यात् । अपरिच्छेद्यत्वस्य ब्रह्मानन्यत्वमेव । बृहधातूत्तरप्रत्ययस्याप्याश्रय एवार्थः अत्यंताभेदे आश्रयाश्रयिभावः "स्वेमहिम्नि प्रतिष्ठित" इत्यादाविव संभवतीति सिद्धांते दोषाभावात् । महत्वनिरूपकतावच्छेदकंचाल्पत्वामात्रं । नतुपारमार्थिकत्वविशिष्टं गौरवात् । तथाचापारमार्थिकाल्पत्वमादायापि महत्वं बोधयता पारमार्थिकद्वितीयरूपानिरूपकासिध्या ब्रह्मणस्सद्वितीयत्वापादनासंभवादिति । तदप्यसारं । वस्तुतः सर्पभिन्नस्यैव रज्वादेस्सर्पात्मना परिणममानाविद्याविषयत्वदर्शनेन तस्य तदात्मकत्वरूपतायाः प्रागेव बहुधा दूषितत्वात् । अविद्यायाः परिणामित्वादेरपि प्राङ्निरस्तत्वात् । निर्विशेषात्यंताभेदे भेदव्याप्तस्याधाराधेयभावस्य बाधितत्वाच्च । तत्ववादिनां सिद्धांतेतुअभेदे भेदकार्यनिर्वाहकभेदप्रतिनिधिविशेषबलात्सर्वंयुक्तं । ततश्चनस्मरतिभवानुक्तार्थस्येति । किंच भिन्नधर्मशून्यत्वस्य तत्ववादिभिरंगीकृतस्य भवताप्यंगीकारे भवदभिमतनिर्गुणस्य सगुणत्वापातः । निर्गुणसगुणब्रह्मविभागानुपपत्तिः । धर्माणां ब्रह्मणितात्विकत्वनिराकरणासंगतिः । सगुणवाक्यस्य तत्वावेदकत्वोक्त्ययुक्तिरित्यादिकं स्यात् । "स्वे महिम्नी" त्यादिकंतु ब्रह्मणोऽचिंत्यशक्तित्वाद्विशेषबलाच्च युज्यते । अल्पशक्तिजीवाभिन्न निर्विशेषब्रह्मवादेतु नैवमुपपत्तिरिति दृष्टांतोपि परमते नोपपत्तिमानिति । किंच शब्दार्थतद्योग्यताप्रामाण्यादीनां, अनुमेयानुमितिप्रामाण्यादीनांच समसत्ताकत्ववल्लोके त्र्यणुकघटादौ मेरुसर्षपादौ चनिरूप्यनिरूपकतावच्छेदकयोर्महत्वाल्पत्वयोस्तुल्यसत्ताकत्वदर्शनेनप्रकृते संकोचे कारणाभावेनसद्द्वितीयत्वापादनंयुक्तमेव । घटादेरसत्वे कुलालादौ तत्कारणत्वस्याप्यसत्वेन सतिस्वसमानसत्ताके भृत्यादौ राजादौ तदु

त्कर्षदर्शनेन च सर्वत्रनिरूप्यनिरूपकयोस्समसत्ताकत्वस्य दुरपन्हवत्वात् । अयंमहानित्युक्ते कस्मादिति स्वारसिकाकांक्षानुभवेन स्वनिष्ठोत्कर्षादिसमसत्ताक स्वनिरूपितापकर्षाद्याश्रयाभावे अयमस्मादुत्कृष्टइत्यादि व्यवहाराभावेन स्वसमानसत्ताकधार्मिकांतरे सत्येवायं परमधार्मिकइत्यादि व्यवहारदर्शनेन च निरूप्यनिरूपकयोर्वा, निरूप्यनिरूपकतावच्छेदकयोर्वातुल्यसत्ताकत्वमकामेनाप्यभ्युपगंतव्यमित्यलं । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ २८ ॥

यदपि, यत्तु; ब्रह्मणोजिज्ञासाब्रह्मजिज्ञासा; ब्रह्मणइति कर्मणिषष्टीत्यादि श्रीशांकरभाष्यमसंगतं । विचारजन्यज्ञानाविषयस्य ब्रह्मणः विचाराविषयत्वादिति ॥ तन्न ॥ फलविषयत्वाभावेपि ब्रह्मणि विचाराख्य वृत्तिविषयत्वांगीकारात् । नच ब्रह्मणोऽपरोक्षवृत्ति विषयत्वेन फलविषयत्वमापादयितुं शक्यं । स्वक्रियाविरोधेन चैतन्यरूपे ब्रह्मणि चैतन्याख्यफलविषयत्वायोग्यतया तदापादनासंगतेः । नचतर्हि, व्यापकं फलविषयत्वं निवर्तमानं व्याप्यं वृत्तिविषयत्वमपि व्यावर्तयतीतिशंक्यं । ब्रह्मणि व्यभिचारेण व्यापकत्वस्यैवासिद्धेरिति । तदपिमोहमूलं । "विचारकर्मत्वाभावा"दिति चंद्रिकायां सकलकारकशक्तिविधुरस्य ब्रह्मणः परपक्षे उक्तरूपविचारकर्मत्वस्य दूषितत्वेन तादृशकर्मत्वस्यानिष्क्रियब्रह्मवादिनांगीकर्तुमशक्यत्वात् । कारकशक्तिविधुरस्यापि शास्त्रजन्यापरोक्षवृत्तिव्याप्यत्वेन कर्मत्वव्यपदेशइत्यंगीकारेच फलव्याप्यत्वस्यापरोक्षवृत्तिव्याप्यत्वं प्रतिव्यापकत्वेन ब्रह्मणि च कर्तृकर्मविरोधेनतस्याभ्युपेतुमशक्यतया व्यापकाभावेच व्याप्याभावस्य सुलभत्वेनोक्तापादनस्योपपन्नतया तदापादनासंगतेरिति त्वदुक्तेरेवासंगतत्वात् । व्याप्यांगीकारेऽनिष्टव्यापकप्रसंजनरूपतर्के आपाद्यानिष्टत्वस्य भूषणत्वेन ब्रह्मणः फलव्याप्यत्वायोग्यतायास्तर्कांगत्वेनादूषणत्वात् । अन्यथा, पर्वतस्यनिर्वह्नित्वांगीकारे निर्धू

मत्वापादनमप्ययुक्तं स्यात् । तत्रापि धूमस्य प्रत्यक्षसिद्धत्वेन पर्वतावृत्तित्वायोग्यत्वात् । किंचोक्तनियमस्य ब्रह्मणि व्यभिचारचोदनमत्यंतायुक्तं । आपादनविषयएव व्यभिचारोक्तेरसंगतत्वात् । नहि तर्कांगभूतापाद्यापादकव्याप्तेरापादनविषयएवव्यभिचारः शक्यशंकः । घटादौ सर्वत्र नियतसहचारदर्शनेन योग्यस्थले व्यभिचारादर्शनेनचापरोक्षवृत्तिव्याप्यत्वफलव्याप्यत्वयोर्व्याप्यव्यापकभावस्य सुदृढत्वेनापह्नोतुमशक्यत्वात् । अन्यथा वह्नेरप्रत्यक्षत्वात्पर्वतोनिर्वह्निरितिवदंतंप्रतियदिपर्वतोनिर्वह्निःस्यात्तदानिर्धूमः स्यादित्यापादनायोगः । पर्वतएव व्यभिचारेण निर्धूमत्वस्य व्यापकत्वासिद्धेरिति वक्तुं शक्यत्वादिति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ २९ ॥

यदपि, यत्तु; कर्मणिषष्ठीपक्षे प्रमाणादिपरिकरविशिष्टब्रह्मणो जिज्ञासाकर्मत्वसंभवेन प्रमाणादि जिज्ञासानामपि शाब्दत्वसंभवादार्थिकत्वोक्तिरयुक्तेति ॥ तन्न ॥ जिज्ञासाकर्मसमर्पकब्रह्मशब्देन शक्त्या ब्रह्मस्वरूपस्यैव बोधनेन प्रमाणादि विशिष्टब्रह्मबोधकत्वे लक्षणापत्याच स्वरूपस्यैव जिज्ञास्यत्वेन प्रतिज्ञातत्वावगतेः प्रमाणादि प्रतिज्ञाया आर्थिकत्वोक्तेरेव युक्तत्वादिति । तदपि भ्रमाविजृंभितं । अन्यथानुवादात्, अनुक्तोपालंभात्, भावानवबोधाच्च । तथाह्यत्रचंद्रिकायां, "स्वपक्षे कर्मणि षष्ठ्यामपि प्रमाण, साधनप्रयोजनादिपरिकरयुक्तस्यैव ब्रह्मणो जिज्ञासाकर्मत्वान्नप्रमाणादिविचारस्याप्रतिज्ञाततताप्रसंग" इत्युक्तं । तत्प्रकाशेपि "षष्ठीसमासपक्षेपि न कर्मणि सआश्रयितुं युक्तः । तथात्वेहि ब्रह्मस्वरूपमेवजिज्ञासायांकर्मतयान्वेतीति" ब्रह्मजिज्ञासैव प्रतिज्ञाता नप्रमाणादिजिज्ञासेत्यग्रे तद्विचारो नयुक्तः स्यात् । तथाच कर्मणि षष्ठीपरिग्रहो नयुक्तइत्याशंक्य समर्थयते । स्वपक्षइति । ब्रह्मजिज्ञासायां प्रतिज्ञातायां लक्षणप्रमाणादिजिज्ञासामंतरेणतस्या अभावात्प्रधान

ब्रह्मजिज्ञासयैवार्थात्प्रमाणादिजिज्ञासापि लभ्यत इति भावः । अतएव परिकर पदप्रयोगः । उक्तंचसुधायां । "तस्याविनाप्यभिधानेन लाभादित्यादीत्युक्तं" । सुधायामपि "नहिलक्षणादिजिज्ञासामंतरेण ब्रह्मजिज्ञासास्ति । अन्यथाऽनेकविषयत्वेन शास्त्रभेदप्रसंगः । स्वरूपसाधनफलजिज्ञासाहि ब्रह्मजिज्ञासा प्रधानेनाप्रधानोपलक्षणस्यांगीकृतत्वात् । साधनादिजिज्ञासामंतरेण ब्रह्मज्ञानाय विचारः कार्य इत्युक्ते केन साधनेन कस्मै फलायेत्याकांक्षायाः साधनादिविचारंविना अनिवृत्ते"रित्युक्तं । तथाच लक्षणया अर्थाद्वा प्रमाणादिजिज्ञासायाअपि लाभसंभवान्नतद्विचारस्याप्रतिज्ञातत्वमिति हि चंद्रिकाशयः तत्रच त्वदुक्तं दूषणं बधिरकलहमनुकरोतीत्युपेक्ष्यमेवेति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ ३० ॥

यदपि, यत्तु; पंचपादिकाविवरणयोः जिज्ञासाशब्दस्यावयवशक्त्याज्ञानेच्छापरत्वं विचारेच लक्षणेत्युक्तमयुक्तं । रूढ्यैव विचारबोधनसंभवादिति॥ तन्न ॥ शक्तिग्राहककोशादिप्रमाणेषु जिज्ञासापदस्य विचारे शक्त्यनुक्तेः । माध्वव्यतिरिक्तानां विचारे प्रयोगप्राचुर्याभावेन शक्त्य सिद्धेश्चेति । तदप्यज्ञानमूलं । "जिज्ञासाशब्दतोहीच्छामज्ञात्वैव विजानते । विचारं लौकिकास्तेन तत्रायं रूढयिष्यते । अन्यथा मंटपादीनां गृहादौ स्यान्नरूढता । गंगाशब्दात्तु तीरादि तद्धीपूर्वं प्रकाश्यते" । "जिज्ञासाशब्दान्मीमांसाशब्दादिवेच्छाप्रतीत्यभावेपि विचारःप्रतीयते । अन्यथा धर्मबुभुत्सा ब्रह्मबुभुत्सेत्येवं बुभुत्सापदादापि विलंबेन तद्धीसंभवान्नियमेन विचारे जिज्ञापदं न प्रयुज्यते"त्यादि चंद्रिकाग्रंथेन झडितिप्रत्यय, नियतप्रयोगान्यथानुपपत्तिरूप समुदायशक्तिग्राहकसामग्र्या अनन्यधीपूर्वक विचारप्रतीतिरूपानन्यथासिद्धकार्यरूप शक्तिकल्पकसामग्र्याश्चोक्तत्वेन शक्तिग्राहकाभावरूप हेतोरसिद्धत्वात् ।

जिज्ञासितंसुसंपन्नमि ति भागवतादौ विचारे जिज्ञासाशब्दप्रयोगदर्शनेन तदभावोक्तेरज्ञानमूलत्वात् । अन्यथा कोशादिगृहीतरूढेर्मंटपादिशब्दस्यप्य न्यथोपपत्तेरुक्तत्वेनरूढिमात्रोच्छेदप्रसंगात् । जिज्ञासाशब्दादिच्छाप्रतीत्य विलंबितविचारप्रतीतेः परस्यापि संमतत्वाच्च । इच्छारूपार्थाप्रतीतौ तत्रानुप पत्यनुसंधानाभावेपिझडिति स्वरसतः प्रतीयमानस्यार्थस्य लाक्षणिकताया अयुक्तत्वाच्च । उक्तभागवतादिवाक्यस्याप्तवाक्यतया शक्तिग्राहकमानत्वात् गत्यंतरसत्वे विधौ लक्षणाया अन्याय्यत्वाच्चेति । तस्मादुक्तं दूषणं सुस्थ मितिसिद्धं ॥ ३० ॥

यदपि, यत्तु; जिज्ञासाक्षिप्तस्य विचारस्याध्याहृतकर्तव्यपदार्थान्वय इति भामत्युक्तमयुक्तं । विचारे जिज्ञासापदशक्तिसंभवेनाक्षेपोक्त्ययोगात् । व्याकरणस्य साधुत्वमात्रपरत्वमेव । किंच विचारे कर्तव्यत्वाध्याहारस्यानुवा दत्वप्रसंगः । तस्मिन्कर्तव्यत्वस्य स्वतएव सिद्धत्वात् । किंच जिज्ञासाप दस्य भवद्रीत्या शक्त्यसंभवेपि लक्षणासंभवात् लाक्षणिकस्य विचारस्य विधि संभवे विचारस्याक्षिप्तत्वोक्त्ययोगः । किंच जिज्ञासापदस्य विषयसूचकत्वेन सफलत्वे सिद्धे नानर्थकविचारकर्तव्यतापरतायुक्ता । किंच विषयाभावादिच्छा भावं वदंतंप्रतीच्छयाविषयादिसूचनोक्त्ययोगः । किंच कारणस्य जिज्ञासा यानियमेननकार्यरूपविचाराक्षेपकता । कार्यंविनापि कारणसंभवात् । किंच नचेच्छाविचारसामग्री । फलेच्छायांसत्यामपि साधनाननुष्ठानादिति ॥ तन्न ॥ जिज्ञासापदे विचारशक्तत्वस्य पूर्वमेव निराकृतत्वात् । आक्षेपमात्रेण विचा रलाभेलक्षणोक्त्यसंभवात् । आक्षेपलब्धस्य विचारस्यापातप्रतीतार्थनिर्णायक तया सिद्धस्य विध्ययोगात् । विचारकर्तव्यत्वस्यानवधाननिवृत्यर्थत्वेन वि चारावधानपर्यवसायिनः । सूत्रस्यानुवादकत्वाप्रसक्तेः । जिज्ञासापदस्य वि

10

चारकर्तव्यताया अनवधाननिवृत्तिप्रयोजनकत्वेन विचारकर्तव्यत्वतात्पर्यकत्व स्यावश्यकत्वात् । विचारेच्छया विषयसूचनोक्त्ययोगेपि ब्रह्मज्ञानेच्छया तत्सूचनोक्त्युपपत्तेः । सर्वत्र कारणत्वावच्छेदेन कार्याक्षेपकत्वनियमाभावेपि जिज्ञासायां जातायां विचारस्य सर्वत्र क्रियमाणत्वेन कारणविशेषस्य कार्य विशेषाक्षेपकत्वस्याप्रत्यूहत्वात् । अतएवोक्तसाधनचतुष्टयवत्पुरुषनिष्ठाब्रह्मजि ज्ञासापुष्कलकारणमेव । उक्तविशिष्टेच्छासत्वे विचारस्य नियमेनोपलब्धेरिति । तदेतदुत्तानदृशोऽर्वाचीनस्योन्मादमूलं । तथाहि । अत्रैवं चंद्रिकावाक्यनि ; "भामात्यांतु न जिज्ञासानाम विचारः इच्छायांसन्निधानात् । नचशास्त्रप्रवृ त्यंग विषयप्रयोजन, सूचनेन स्वार्थपरत्वोपपत्तेर्विचारे लक्षणायुक्ता । एवंच मुमुक्षानंतरं ब्रह्मजिज्ञासाभवितुं युक्तेत्येव श्रौतोऽर्थः विचारस्त्वार्थिकोर्थःज्ञातु मिच्छाहि संधिग्धे विषये निर्णयाय भवति । निर्णयश्च विचारसाध्य इती च्छानिमित्तेन विचाराक्षेपात् । आर्थिकेचास्मिन्नर्थे कर्तव्यपादाध्याहारादि" त्युक्तं । तदपिन ॥ विचारे रूढेरुक्तत्वात् । व्याकरणस्यसाधुत्वमात्रपरत्वात् । उक्तंहि । "यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते । स्वरसंस्कारमात्रार्थातत्र व्याकरणस्मृति"रिति । भवतीत्यध्याहारस्य स्वतःसिद्धत्वेप्यनुवादत्वप्रसंगात् । "तद्विजिज्ञासस्वेति" श्रुत्यनुसारिणा सूत्रेणेच्छाया अविधेयत्वेन लक्षणया विचारस्य विधेयत्वात् । विषयाद्यभावादिच्छाभावं वदंतंप्रतीच्छया तत्सू चनोक्त्ययुक्तेश्च । किंचैवंसति तावन्मात्रेण नैराकांक्ष्यान्नार्थिकविचारकर्त व्यतापरतायुक्ता । शास्त्रारंभवत्तस्य फलत्वेनैव सिद्धे"रिति । सतिचैवं ग्रंथसंदर्भे अन्यथानुवादः, तद्दूषणाभासप्रयासः, अनुक्तोपालंभः, असंबद्ध प्रलपश्च कथंस्वस्थात्मनः संभवतीत्युन्मादमूकएवेत्ति । किंच जिज्ञासाशब्द स्य झडितिप्रत्ययानियतप्रयोगादिसामग्रीबलेन रूढेः साधितत्वाच्छक्तिनिराक

रणोक्तिः ; लक्षणायाअपि पदवृत्तित्वेन लाक्षणिकार्थस्य शाब्दत्वसंभवेप्य क्षितपार्थस्यानुमानिकत्वेनाशाब्दत्वादाऽर्थिकार्थापेक्षया लाक्षणिकार्थस्य मुख्य त्वात् लक्षणोक्यसंभवादित्युक्तिश्चायुक्ता । यद्यपि परमतेआर्थिकार्थस्या पि सूत्रार्थत्वमंगीकृतं । तथापि प्राथमिकस्य श्रौतार्थस्य मुख्यत्वादेव मुक्तं । किंच जिज्ञासासूत्रोक्तविचारस्य शास्त्रारंभोपयुक्तस्य वेदार्थनिर्णाय क न्यायानुसंधानरूपत्वेन तस्य भामतीमते अध्ययनविध्याक्षिप्तस्य विवरण मते नियमविधिप्राप्तस्य श्रवणादिरूपविचारस्याज्ञानसंशयायुक्तत्वशंकाऽसंभा वना, विपरीतभावनादिनिवर्तकतया भवत्सिद्धांतसिद्धत्वादनवधाननिवृत्यर्थ त्वोक्तिःस्वसिद्धांताबोधविलसितैव । तस्य स्वातंत्र्येण वेदार्थनिर्णायक त्वात् । किच विध्ययोग्यत्वादित्यप्यसंगतं । विवरणमते नियमविद्ध्यं गीकारात् । भामतीमते तस्य ज्ञानरूपत्वेन स्वतोविद्ध्यनंगीकारेपि ज्ञान विधिसमर्थनेन तद्विधेरंगीकारयिष्यमाणत्वाच्च । किंच ब्रह्मज्ञानाय वेदांत विचारकर्तव्यतासमर्थनपरस्यास्य सूत्रस्य विचारावधानपर्यवसायित्वोक्तिरसं बद्धा । एवमापातप्रतीतार्थनिर्णायकत्वोक्तिर्विचारस्य नोपपन्ना । क्वचिद्वि चारेणापातप्रतीतार्थस्य त्यागसंभवात् । किंच जिज्ञासापदस्य विचारार्थक त्वमंगीकृत्य तत्रकर्तव्यपदाध्याहारेणानुवादकत्वपरिहारेपि स्वतःसिद्धभवती त्यादिक्रियाध्याहारे ग्रंथकृदुक्तमनुवादकत्वं दुष्परिहारमेव । विचारस्यार्थि कत्वे शास्त्रारंभवत्तस्य फलत्वेनैव सिद्धेर्नार्थिकविचारकर्तव्यतापरतायुक्तेति शंकापि ननिवारितेति दुष्परिहरैवेति । किंच "ब्रह्मज्ञानेच्छयातत्सूचनेत्या द्यप्ययुक्तं । नहि पूर्वपक्षिणा ब्रह्मज्ञाने इच्छामंगीकृत्य तद्विचारआक्षिप्तः किंतु विषयाद्यभावेनेच्छैव नोदेतुं युक्तेति ह्याक्षिप्तं । नच सर्वजनीनाहमि त्यनुभवसिद्ध आत्मा संदिग्धोवा, सप्रयोजनोवा, येन जिज्ञास्यःसन् विचारं

प्रयुंजीते"ति त्वदीयपूर्वपक्षोपसंहारे जिज्ञासाक्षेपपूर्वं विचारस्याक्षिप्तत्वात्। एवं समग्रस्य कारणस्य कार्यानुमापकत्वेपि न कारणमात्रस्य तत्संभवतीत्यत्र नियामकमनभिधाय कारणविशेषस्य कार्यविशेषानुमापकत्वोक्तिरप्ययुक्ता। फलेच्छामात्रस्यासाधकताया उक्तत्वात्। नच विशिष्टजिज्ञासापिसामग्री विचारे इष्टसाधनताज्ञान तद्धर्मिकाप्रामाण्यशंकाद्यभावरूपप्रवर्तकसामग्रीविशेषस्योक्तविशिष्टजिज्ञासाशरीराप्रविष्टत्वात्। तात्कालिककरणपाटव, शरीरसामर्थ्य, उपयुक्तविषयांतरावबोधादेरपि कारणकोटिप्रवेशादिति। तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ ३१ ॥

यदपि, यत्तु, "यस्माद्ब्रह्मजिज्ञासासंपन्ना तस्माद्ब्रह्मविचारःकर्तव्यः। जिज्ञासाशब्दः अवांतरवाक्ये ज्ञानेच्छापरः। महावाक्ये विचारलक्षक"इति कौमुद्युक्तमयुक्तं। युगपज्जिज्ञासापदस्य वृत्तिद्वयप्रसंगात्। अध्याहारसापेक्षावांतरवाक्यकल्पनानुपपत्तेश्च। जिज्ञासाशब्दस्य ज्ञानेच्छापरत्वे मानाभावाच्चेति ॥ तन्न ॥ "अथातोधर्मजिज्ञासे"त्यत्र धर्मशब्दस्य धर्मेशक्तिरधर्मेलक्षणाच स्वीकर्तव्या। उपादानार्थं धर्मस्येव परिहारार्थमधर्मस्यापि जिज्ञास्यत्वा"दिति कौमारिल वार्तिकरीत्या युगपद्वृत्तिद्वयस्वीकारात्। गंगायां मीनघोषावित्यादौ वृत्तिद्वयस्य संमतत्वात्। एकजातीयवृत्तिद्वयस्यैव युगपदनंगीकारात्। तथाच ज्ञानेच्छारूपहेतोर्विचारकर्तव्यत्वस्यच लाभार्थमध्याहारस्यावश्यकत्वेनाध्याहारे अनुपपत्यभावात्। ज्ञाधातोर्ज्ञानार्थे सन्प्रत्ययस्य चेच्छार्थे व्याकरणस्यैय प्रमाणत्वेन मानाभावोक्त्यसंगतेरिति। तदपिन। मण्युक्तरीत्या युगपन्मुख्यामुख्यवृत्तिद्वयस्वीकारपक्षे दूषणांतरस्योक्तत्वेन विवक्षाविशेषेण तदुक्तिरिति चन्द्रिकाप्रकाशएव व्यक्तत्वात्। ततश्च सतिगत्यंतरे वृत्तिद्वयं न सह्यमिति चन्द्रिकाशयः। किंच अधिकारिणां ब्रह्मज्ञानेच्छा

भवतीत्यवांतरवाक्यं । यस्माद्ब्रह्मजिज्ञासा संपन्ना तस्माद्ब्रह्मविचारः कर्तव्य इति महावाक्यं । तत्राधिकारसंपत्त्यनंतरं मोक्षाख्यफलवत्वाद्गुणपूर्णस्य विष्णोर्विचारः कर्तव्यइत्येकवाक्यतया योजनासंभवेन यस्मादित्याद्यध्याहारसापेक्षावांतरवाक्यभेदादिकल्पनाया अध्याहारस्यैव बाधकत्वेनायुक्तत्वात् । नच विषयादिसूचनार्थं मुख्यवृत्तिरवांतरवाक्ये वक्तव्या । तथाच विषयादिसिद्ध्यन्यथानुपपत्त्येच्छापरत्व मावश्यकमितिवाच्यं । "अथशब्देनाधिकार मत इत्यमुनाफलं । ब्रह्मेशब्देन विषयं सूचयामास सूत्रकृदि"त्युक्तरीत्या विषयप्रयोजनयोरन्यथैव सूचनसंभवेन जिज्ञासाशब्दस्येच्छापरत्वे विषयादिसिध्यन्यथानुपपत्तेरभावात् । मानाभावादित्यस्येच्छापरत्वसाधकतयोपन्यस्तार्थापत्तेस्तत्रमानत्वाभावात् अर्थापत्तिरूपप्रमाणाभवादिति ग्रंथकृदाशयमविदुषोऽर्वाचीनस्योत्तानदृशोव्याकरणस्यतत्रमानत्वोक्तिःकथंसंगतेतिविवेकिनोविभावयंतु । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥ ३२ ॥

यदपि, यत्तु; अस्य शास्त्रस्य पूर्वमीमांसया नगतार्थता । तत्रकार्यनिष्ठवेदभागस्य विचारितत्वेपि सिद्धवस्तुब्रह्मपरवेदस्याविचारितत्वात् । तदर्थमस्य शास्त्रस्य प्रणयनमित्यद्वैत्युक्तमसंगतं । उपास्यविशेषभूतब्रह्मविचारस्योपासनापादे उपासनाविधिविचारस्य चास्मिन्शास्त्रे प्रवर्तनायोगादिति ॥ तन्न ॥ ब्रह्मज्ञानवदुपासनस्य मानसत्वाविशेषात्संगतिविशेषलाभेनास्मिन् शास्त्रे उपासनाविधिविचारोपपत्तेः । नच "समुद्रंमनसाध्यायेदि"ति ध्यानविशेषस्य पूर्वतंत्रे विचारितत्वेनोपासनस्यापि ध्यानरूपत्वेन मानसस्य तत्राविचार्यात्रविचारे किंनियामकमिति शंक्यं । अस्मिन् शास्त्रे मानसस्य ब्रह्मज्ञानस्य प्राधान्येन प्रतिपादनात् समुद्रमित्युक्तध्यानस्य प्राधान्येनाप्रतिपादनात् । प्राधान्येन प्रतिपादित ब्रह्मज्ञानेन मानसत्वसाम्यात् ब्रह्मोपासनस्यैव संगतत्वे

न न्याय्यत्वात् । नचोपासनस्यानित्यफलत्वविधेयत्वसाधर्म्याभ्यामुपासना वाक्यस्यातत्वावेदकत्वाच्चोपासनाविचारः पूर्वतंत्रएव युक्तइतिशंक्यं । "नच सपुनरावर्तत" इत्यादि श्रुतिसिद्धमपुनरावृत्तिरूपमोक्षंप्रति साक्षादेव दहरा द्युपासनस्य हेतुत्वात् । मोक्षशास्त्रेऽस्मिन्नेव प्रधानफलांशमादाय संगत्युपपत्या त्रैवोपासनाविचारस्य न्याय्यत्वात् । उद्गीथाद्युपासनंतु उपासनत्वसाम्यादा नुषंगिकतयाऽत्रविचार्यत इति । तदपि मंदं । चन्द्रिकायामेव निर्विशेषज्ञा नार्थत्वादुपासनाया इहविचारेच यागादिनित्यकर्मणामपि ज्ञानार्थत्वान्मानस संकल्परूपतयोपासनावद्विद्यासाम्याच्च तद्विचारोपीहैव स्यादिति व्यक्तमुक्त त्वात् । यागस्य देवतामुद्दिश्य द्रव्यत्यागरूपत्वेन त्यागस्यच मानससंकल्प विशेषरूपत्वेन कर्मणामपि मानसत्वेन विद्यासाम्याच्च । यदुक्तं दहराद्युपास नस्य नित्यफलकत्वमिति । तत् त्वदीयानंदमयनयभाष्यभामती, कल्पतर्वा दिग्रंथविरुद्धं । तत्रतावद्भाष्यं; "कानिचिदुपासनान्यभ्युदयार्थानि, कानिचि त्क्रमशुक्त्यर्थानिकानिचित्कर्मसमृध्यर्थानी"ति । "तदुपासनाकानिनिचिदभ्युद यार्थानि, मनोमात्रसाधनतयात्र पठितानि, कानिचित्क्रममुक्त्यर्थानि, कानि चित्कर्मसमृद्ध्यर्थानीति", भामती । "उपास्तीनामपि मोक्षसाधनत्वव्यावर्तये फलांतराण्याह । तदुपासनानीति ।अभ्युदयार्थानि प्रतीकोपासनानि, क्रम मुक्त्यर्थानि, दहराद्युपासनानि, कर्मसमृद्ध्यर्थानि, उद्गीथादीनीति" कल्पत रुरपि । एवंच भवन्मते "नान्यःपंथा"इत्यादिश्रुत्या ब्रह्मज्ञानस्यैव स्वसमान विषयकाज्ञानकल्पितबंधनिवर्तकतया साक्षान्मोक्षहेतुत्वेपि सगुणोपासनादीनां निर्विशेषज्ञानद्वारा तत्प्राप्त्यादिद्वाराच क्रममुक्त्यर्थत्वेन प्राणाद्युपासनस्येव दहरोपासनस्यापि क्रममुक्त्यर्थत्वेन पराभिमतमोक्षंप्रति साक्षाद्धेतुत्वानंगीका रात् । "नच सपुनरावर्तत" इत्युक्तस्य भवन्मते गौणमोक्षतया परममुक्तौ

सगुणस्यनिवृत्तौ तत्प्राप्तिरूपगौणमोक्षस्यापि निवृत्यवश्यंभावेन नित्यत्वासंभ वेन नित्यफलसाधनविचारे तन्निवेशस्यायुक्तत्वाच्च। आद्ये पादे अंतरित्या द्यधिकरणे द्वितीयपादेचावस्तुतत्वरूपसविशेषविचारस्यासंगतत्वाच्च। किंचा "चार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेण समावृत्य कुटुंबी शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनिसर्वेंद्रियाणि संप्रतिष्ठाप्याहिं सन्सर्वाणि भूतान्यन्यत्रतीर्थेभ्यः सखल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकम भिसंपद्यते नचपुनरावर्तते नचपुनरावर्तते" इतिछंदोगश्रुतौ, "तस्मात्सर्वेंद्रि याणीशे निधाय पुरुषोत्तमे। दृष्ट्वातंपरमंविष्णुंतल्लोकंप्रतिपद्यते। नावर्तते पुनस्तस्मात्कदाचित्केनचित्कचिदि"तितदुपबृंहकप्रमाणानुरोधेन दृष्ट्वेत्यध्याहार स्यावश्यकत्वेन पराभिमतगौणमोक्षस्यापि विद्याफलत्वेनोपासनाफलत्वस्याश्रू यमाणत्वात्तथोक्तिरयुक्ता। अन्यथा "आचार्यकुलाद्वेदमधीत्ये"त्यादिना यम नियममात्रेण ब्रह्मलोकप्राप्तिप्रतीत्या तत्फलत्वप्रसंगात्। ततश्चोक्तातिप्रसंगप रिहारायोदाहृत स्मृत्यनुसरणायचोक्ताध्याहारस्यावश्यकत्वादुक्तबाधकसद्भा वात्साधकाभावाच्च नोपासनायास्त्वन्मतेनित्यफलत्वं युक्तं। किंच परमते उपा सनाया मानसत्वेन विद्यासाम्यादत्रविचारे विद्यायाअपि तेन रूपेणोपासनासा म्यात्तत्रविचारएव संगतत्वात् न्याय्यः। हेयत्वातत्वावेदकत्वादिना विध्यंतर साम्यात्पूर्वतंत्रेपि विचारसंभवेनात्रैव विचारे नियामकाभावश्च। प्राधान्येन विधिवाक्यविचारपरे पूर्वतंत्रएवोपासनाविधिवाक्यविचारस्य न्याय्यत्वात्। वस्तुतत्वविचारपरे ब्रह्मतंत्रे अतथाभूतसविशेषब्रह्मविचारस्यासंगतत्वाच्च। सविशेषनिरूपणस्य निर्विशेषज्ञानार्थत्वंतु कफोणिगुडायितं। निराकरिष्यमा णत्वात् उद्गीथाद्युपासनस्यानुषंगिकतयात्रविचारे विद्यायाअपि तेनैव निमित्ते न तत्रविचारप्रसंगाच्चेति। तस्मादुक्तं दूषणं सुस्थमिति सिद्धं॥ २३॥

यदपि, यत्तु; ताद्विशेषंप्रतीत्यद्वैतभाष्ये विप्रतिपत्तिं प्रदर्शयता चान्द्रि काकृता तस्यां धर्मिविकल्पेन दूषणमुक्तं ॥ तन्न ॥ ऐक्यस्य चिन्मात्रस्यैव विप्रतिपत्तिधर्मित्वात् । भामतीकल्पतर्वोस्तथैवोपपादनात् । विशेष्यविप्रति पत्यापि विशेष्यप्रतीत्यनुकूलत्वेन विशिष्टविचारस्य न्यय्यत्वात् । मुमुक्षुभि रप्युभयानुगतचिन्मात्रज्ञानार्थं विशिष्टस्यैव प्रथमंविचार्यत्वाच्च । वस्तुतोऽह मालंबने चिन्मात्रे अज्ञानवशात् देहत्वेंद्रियत्वादिविप्रतिपत्तेः संभवात् । सौत्रब्रह्मशब्दस्य चिन्मात्रे स्वारस्यस्योपपादितत्वेन विप्रतिपत्तिधर्मिपरत्वसं भवाच्चेत्यलमिति । तदपिमोहमूलं । "तत्र त्वंपदार्थे तावद्विप्रतिपत्तीर्दर्शय तीति, तदेवं त्वंपदार्थे विप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात्तत्पदार्थेपि विप्रतिपत्तिमाहेति"च भामत्युक्त्या त्वंपदार्थेपि विप्रतिपत्ति धर्मित्वप्राप्त्या चिन्मात्रस्यैवेति अवधारणानुपपत्तेः । विशिष्टप्रतीतेर्नियमेन वि शेष्यविषयिकाया विशेष्याज्ञानादिनिवर्तकत्वेन विशिष्टनिश्चयानंतरं विशेष्य स्वरूपमात्रे बुभुत्साद्ययोगेन विशिष्टज्ञानस्य तत्पूर्वभावित्वगर्भस्य विशेष्यप्रती त्यनुकूलत्वस्यायुक्तत्वात् । प्रत्युत; विशेष्य, विशेषणप्रतीत्योरेव कथंचिद्विशि ष्टप्रतीत्यनुकूलत्वाच्च । सामान्यप्रतिपत्ति, विशेषविप्रातिपत्योर्जिज्ञास्यत्वसामा नाधिकरण्य नियमेन चिन्मात्र विशिष्टस्वरूपयोर्भिन्नतया विशेष्यस्वरूपमात्र विप्रतिपत्तेर्विशिष्टजिज्ञासांप्रत्यननुकूलत्वात् । विचाराधीनविशिष्टानिश्चयस्य विशेष्यस्वरूपप्रतिपत्यनुकूलत्वेप्रकृष्टप्रकाशादिवाक्यानामखंडार्थत्वभंगापत्तेः। त्वदीयभाष्ये, भामत्यांच, त्वंपदार्थे विशिष्टेऽहमर्थएव "देहमात्रं चैतन्यविशि ष्टमात्मेति प्राकृताजना" इत्यादिना विप्रतिपत्युक्त्या तद्विरोधात् । तत्पदार्थे च विशिष्टएव "अस्ति तद्व्यतिरिक्त ईश्वरः सर्वशक्तिरिति केचिदि"त्यादिना विप्रतिपत्युक्तेस्तद्विरोधापाताच्च । विशिष्टस्य मिथ्यात्वेन मुमुक्षं तत्वचिज्ञासुं

प्रति विशिष्टविचारकर्तव्यतोक्तेरयुक्तत्वाच्च । यदुक्तमत्र चिन्मात्रज्ञानार्थं विशिष्टस्यैव प्रथमं विचार्यत्वादिति । तदंतारित्याधिकरणे चंद्रिकायामेव निरस्तं । तदेवेह किंचित्प्रपंच्यते । तथाहि । यच्चोक्तं सविशेषनिरूपणं निर्विशेषज्ञानार्थमिति ॥ तन्न ॥ "उदेति हवैसर्वेभ्यः पापेभ्य" इति श्रुतफलहानाद्ययोगात् । तथाच । "विशिष्टब्रह्मधीसाध्या शुद्धधीरित्यसंगतं । विशिष्टप्रत्यये यस्माद्विशेष्यंभासतेतरां" । किंच सविशेषज्ञानं निर्विशेषज्ञानस्य नतावत् दृष्टद्वारा हेतुः तद्विशिष्टज्ञानजन्येनाज्ञानध्वंसेन चित्तवशीकरणेन वा तदभावविशिष्टज्ञानस्य तदभावोपलक्षितज्ञानस्यवा तद्विशेषणाज्ञानस्यवा क्वाप्यदर्शनात् । हिरण्यश्मश्रुत्वादिरूपादियुक्तपराग्भूतसविशेषज्ञानेन तद्विपरीतनिर्विशेषज्ञानायोगाच्च । निषेधोपयोगिनोबुद्धिपूर्वकारोपस्यापि शब्दप्रमाणानक्षेपत्वात् । नह्यत्रघटोऽस्तीत्युक्त्वात्रसनास्तीति वक्तव्यं । ततश्च ब्रह्मनिर्विशेषमिति वक्तुं रूपादिविशेषकथनं नयुक्तं । नाप्यदृष्टद्वारा, विहितक्रियाजन्यत्वाददृष्टस्य । त्वन्मतेच ज्ञानस्याविधेयत्वात् । नपि ज्ञानप्रतिबंधकदुरितनिवृत्तिद्वारा, तस्य नित्यादिकर्मणैव निवृत्तेः । त्वन्मते ज्ञानस्याज्ञानमात्रनिवर्तकत्वेन साक्षाद्दुरितनिवर्तकत्वायोगाच्च । नच व्यावहारिकं दुरितं व्यावहारिकसविशेषब्रह्माज्ञानकार्यं । येनाज्ञाननिवृत्या तत्कार्यंपापं निवर्तेत । एतेन सविशेषज्ञानसंतानरूपं निदिध्यासनमदृष्टद्वारावा, दुरितनिवृत्तिद्वारावा, चित्तवशीकरणद्वारावा, निर्विशेषज्ञानार्थमितिनिरस्तं । श्रुतफलहान्याद्यापातात् । सविशेषनिदिध्यासनस्यापि निर्विशेषनिदिध्यासनवत्, स्वविषयापरोक्षहेतुताया एव युक्तत्वाच्च । "दशमस्त्वमसी"त्यादाविव शाब्दे ज्ञाने चित्तवशीकरणानपेक्षणाच्च । आपरोक्ष्यहेतुचित्तैकाग्रयादेश्च निर्विशेषपरोक्षज्ञनाधीनतन्निदिध्यासनादेवसिद्धेः । चित्तवशीकरणाभावे सविशेषनिदि

ध्यासनस्यैवायोगाच्च । नापि सविशेषध्यानंनिर्विशेषज्ञानार्थं । ज्ञानविशेषोध्यानमितिन्यायामृतेतृतीयपरिच्छेदे उक्तत्वात् । इह "यएवंवेदे" तिज्ञानार्थविदधातुश्रवणाच्च । भगवति रूपं तात्विकमिति न्यायामृते ब्रह्मणोनिराकारत्वभंगे समर्थितत्वेन तद्विषयकस्य ज्ञानत्वसंभवाच्च । "हिरण्मयः पुरुषोदृश्यत" इत्यपरोक्षज्ञानविषयत्वोक्तेश्च । नहि "योषित्याग्नित्वंदृश्यतइत्युच्यते । किंचयोषिदादेरग्नित्वाद्यभावेपितथाध्यानवान्निर्विशेषब्रह्मणएवहिरण्यश्मश्रुत्वादिनाध्यानसंभवेनसविशेषब्रह्मणःसाधकानुग्रहार्थमैच्छिकरूपपरिग्रहोक्तिरयुक्ता । तस्मान्नसविशेषनिरूपणं निर्विशेषज्ञानार्थं । अन्यथा वैपरीत्यं स्यात् । "सत्यंज्ञानमित्या"दिसद्ब्रह्मनिरूपणमपि "असद्वाइदमग्र इत्यादिश्रुतिसिद्धासद्ब्रह्मज्ञानार्थंस्यात् । एवंच । "असद्रूपं परं ब्रह्म साक्षात्कर्तुमनीश्वराः येमंदास्तेऽनुकंप्यंते सद्ब्रह्मप्रतिपादनैः । निर्विशेषंपरंधर्म मनुष्ठातुमनीश्वराः । येमंदास्तेनुकंप्यंते सविशेषनिरूपणैः" । इतिस्यात् । शक्यं हि ब्रह्मकांडे लक्षणया निर्विशेषब्रह्मवत् कर्मकांडेप्यग्निहोत्रादिसविशेषधर्मविलक्षणः । कश्चिन्निर्विशेषोधर्मः प्रतिपाद्यतइति वक्तुं । निर्विशेषधर्मइवनिर्विशेषब्रह्मण्यपि प्रमाणाप्रवृत्तेरिति । किंच चंदिकाप्रकाशएव चिन्मात्रेविप्रतिपत्तिराशंक्य निराकृता । "तथाहि । नन्विहसूत्रे प्रतीचिदेहत्वादि विप्रतिपत्तिर्नायुक्ता । तस्याः जिज्ञासाधार्मिणि ब्रह्मणि विप्रतिपत्तिसूचनएव तात्पर्यात् । उक्तंच भामत्यां त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिंसूचयित्वेति । तथाच नदोषइतिचेदयमाशयः । जीवभेदाभेदविप्रतिपत्तौ त्वन्मते ब्रह्मविचारपरं द्वितीयसूत्रे जीवाभेदस्यैव वाच्यत्वेन जीवभेदकलक्षणोक्तिरयुक्तेति तत्कथनं व्यधिकरणं । अतएवोक्तमुत्तरसूत्रइत्यादि । किंच ब्रह्मणिसामान्यप्रसिद्धिः किंविशिष्टे ? उतनिर्विशेषे ? नाद्यः । तस्य

प्रत्यगभेदाभावेनोद्देश्यत्वाभावात् । तदुद्दिश्यजीवाभेदविधानायोगात् । मुमुक्षुभिरजिज्ञास्यत्वाच्च । भाष्ये नित्यशुद्धबुद्धमुक्तस्वभावमित्यनौपाधिके ब्रह्मणि प्रसिद्धिप्रदर्शनायुक्तेश्च । नद्वितीयः । तत्रविप्रतिपत्यभावात् । त्वयापि विशिष्टएव तत्प्रदर्शनाच्च । सर्वज्ञं सर्वशक्तिसमन्वितमिति विशिष्टप्रसिध्युक्त्ययुक्तेश्च एतेन, वेदादेवापाततोब्रह्मक्वाचित्सविशेषं क्वाचिन्निर्विशेषंच प्रतीतमिति विरुद्धवाक्यद्वयाद्विप्रतिपत्तिः । अतएव भाष्ये द्विविधब्रह्मस्वरूपप्रदर्शनमितिनिरस्तं भाष्ये केचिदिति वादिविप्रतिपत्युक्त्ययोगादि"त्यादिनेति । किंच "अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणा" इत्यादिश्रुत्या अवयवशक्त्याचगुणपूर्णवस्तुनि ब्रह्मशब्दस्य स्वारस्येन निर्विशेषेस्वारस्योक्तिरज्ञानमूलैव । वस्त्वपरिच्छेदाद्यर्थस्य दूषितत्वात् । ततश्च नपरोक्तदूषणाभासोयुक्त इति । तस्मादुक्तं दूषणं सुस्थमिति सिद्धं ॥३४ ॥

यत्तु, मध्वमते, अथशब्दो मंगलानंतर्योभयार्थः अतःशब्दोविष्णुप्रसादरूपहेत्वर्थः, ब्रह्मजिज्ञासेत्यत्र कर्मणिषष्ठी, ब्रह्मपदमनंतगुणाश्रयवाचकंसदल्पगुणाज्जीवगणाद्ब्रह्मणोभेदंसूचयन् जीवब्रह्माभेदपूर्वपक्षनिरासकानंतगुणाश्रयं विष्णुं वदति । जिज्ञासाशब्दो रूढया श्रवणादि त्रयपरः तथाच शमदमाद्यनंतरं विष्णुप्रसादाद्धेतोः मंगलरूपाणि विष्णुसंबंधीनि श्रवण, मनन, निदिध्यासनानि कर्तव्यानीति सूत्रार्थः सचानुपपन्नः । अथशब्दस्य युगपत्वृत्तिद्वयविरोधापत्तेः । एतद्दूषणस्य पूर्वग्रंथकृतैवोक्तत्वात् । अन्यथा सैंधवपदस्य युगपदश्वलवणोभयार्थत्वापत्तिः । तत्रेवात्राप्यनुगतशक्यतावच्छेदकाभावात् । गंगायांमीनघोषावित्यत्रविजातीयवृत्तिद्वयं नदोषाय । नचमंगलमथशब्दोच्चारणफलं; नवाच्यार्थइति टीकोक्तमितिवाच्यं । भाष्यस्थ चकारस्वारस्येनानंतर्यसमानयोगक्षेमत्वस्य मंगलेप्रतीतेर्वाच्यत्वावग

मात् । "आनंतर्येऽधिकारस्यमंगलार्थैतथैवच । अथशब्द"इति भाष्योदाहृत पुराणवचने तथाशब्देनानंतर्यवन्मंगलस्यापि वाच्यत्वावगमाच्च । अतः ग्रंथादौ मंगलाचरणस्यावश्यकत्वात्तत्परतयाथशब्दं व्याचष्टइति तत्वप्रकाशिका प्रामादिक्येव । अतःशब्दस्य सर्वनामत्वमंगीकृत्य विष्णुप्रसादस्य हेतुत्वपरत्वमुच्यते; उत अकारो विष्णुवाचकइति कोशानुसारेण । नाद्यः । उपस्थितस्यैवं सर्वनाम्ना परामर्शनीयत्वात् । सौत्रेण केनापि पदेन विष्णुप्रसादस्यानुपस्थितत्वात् । नद्वितीयः । अकारस्य विष्णुपरत्वेपि प्रसादवाचकत्वासंप्रतिपत्तेः । ब्रह्मशब्दस्यानंतगुणाश्रयवाचकत्वंभवन्मतेनसंभवति । आनंदादिगुणानां भगवदभिन्नत्वेनाभेदे आधाराधेयभावानुपपत्तेः । नचाभेदेपि विशेषवलादाश्रयाश्रयिभावइति शक्यं । विशेषस्य ब्रह्मभिन्नत्वे "एवंधर्मानिति" श्रुतिविरोधात् । अभिन्नत्वे ब्रह्मणैव हेतुना ब्रह्मगुणयोराश्रयाश्रयिभावइत्युक्तंस्यात् । तथाचानर्थिकाविशेषकल्पना । ब्रह्मशब्देन गुणपूर्णवाचिनाल्पगुणाज्जीवाद्ब्रह्मणोभेदः सिध्यतीत्यभ्युपगमोप्यसंगतः । भवन्मते विरुद्धधर्मयोरप्येकत्रसमावेशस्वीकारात् । भवन्मते एकस्यैव ब्रह्मण आनंदमयाधिकरणे अन्नमयादिरूपेण गुहाधिकरणे आत्मांतरात्मरूपेण, नसंख्योपसंग्रहादितिनये पंचपंचजनरूपेण नस्थानतोपीतिनये विश्वादिरूपेणैकत्वविरुद्धमनेकत्वमंगीकृतं । अशरीरस्यैवेश्वरस्य "अरूपवदेवही"त्यत्रानुव्याख्यानसुधयोरशरीरत्वविरुद्धं नानाशरीरत्वंस्वीकृतं । रामकृष्णाद्यवताराणां भेदश्रवणं लौकिकैर्भ्रांतिगृहीतभेदानुवादकमित्युक्तं"सर्वथापितुतएवे"त्याधिकरणे । एवमानंदमयस्यावयविनः तद्विरुद्धावयवरूपत्वं स्वीकृतं । "एकआत्मनः शरीरेभावादि"त्याधिकरणे खांडववनदाहकत्व शामकत्वादि विरुद्धधर्मवतोरिंद्रार्जुनयोरत्यंताभेदः साधितः । एवं विरुद्धधर्मसांकर्यमंगीकुर्वतां माध्वानांमते विरुद्धधर्मवतोर्जीवे

शयोर्भेदः कथंसिध्येत् । नचोदाहृतस्थले प्रमाणबलाद्भेदे बाधितेभेदप्रतिनिधि नाविशेषेणेश्वराचिंत्यशक्त्या वा सर्वनिर्वाहः क्रियतइतिवाच्यं । तर्हि "तत्त्वमसी"तिप्रमाणबलात्जीवेशभेदस्य बाधितत्वेनाभेदेपि विशेषेणेश्वरशक्त्यावा सर्वज्ञत्वासर्वज्ञत्वादिसर्वभेदव्यवहारोपपत्तेरंगीकर्तव्यतापत्तेः । भवदुक्तविशेषस्य शक्तेश्चभेदाभेदविकल्पाभ्यां प्रागेवदूषितत्वात् । उभयव्यपदेशाधिकरणे ब्रह्म तद्धर्मणामानंदादीनां ब्रह्मतच्छरीरयोश्चात्यंताभेदस्य साधितत्वेन शरीरात्मवादापत्या चार्वाकमतप्रवेशापत्तिः । एतेन "जुष्टंयदापश्यत्यन्यमीशमि"तिश्रताव न्यशब्देन जीवब्रह्मणोर्भेदकथनान्नाभेदइति नव्यंमाध्वोक्तमपास्तं । "अन्योंतर आत्माप्राणमय इत्यादावन्नमयादीनां भेदकथनेपि "अनन्योप्यन्यशब्देने"तिपुराणवचनमात्रेण तेषामभेदं स्वीकुर्वद्भिर्भवद्भिः "तत्त्वमसि, ब्रह्मदाशाः, नान्योतोस्तिद्रष्टा नेहनानास्तिकिंचन, नात्रकाचनभिदास्ति, मृत्योःसमृत्युमाप्नोति यइहनानेवपश्यति, एकत्वमनुपश्यतः, एकधैवानुद्रष्टव्य"मित्यादिश्रुतिभिः "द्वैतिनोऽतथ्यदर्शिनः, "ज्ञानं यथा सत्यमसत्यमन्यत्, एतत्तु यत्संव्यवहारभूतं । तत्रापि चोक्तं भुवनाश्रितंते, वेणुरंध्रविभेदेन भेदः षडजादिसंज्ञकः । अभेदव्यापिनो वायोस्तथासौ परमात्मन" इत्यादिभिःद्वैतनिंदा, जगन्मिथ्यात्व, जीवब्रह्माभेदबोधकैः प्रसिद्धविष्णुपुराणवचनैश्च समधिगतजीवब्रह्माभेदस्यानिच्छयापि स्वीकर्तव्यतापत्तेः । नह्येवं, 'अद्वैतिनोऽतथ्यदर्शिनइति कुत्रापि मूलकोशेषु दृश्यते । जिज्ञासापदंतु श्रवणादित्रये एकशक्त्याप्रवर्तते ? उतशक्तिभेदेन । नाद्यः । त्रितयानुगतशक्यतावच्छेदकाभावात् । नद्वितीयः । "अन्याय्यंचानेकार्थ"त्वमिति पूर्वतंत्रसूत्रविरोधेनानेकशक्त्ययोगात् । सैंधवपदादिषु प्रयोगप्राचुर्याच्छक्तिभेदकल्पनं । नह्यत्रश्रवणादिषु जिज्ञासापदस्य माध्वभिन्नानां प्रयोगप्राचुर्यमस्ति । किंतु, व्याकरणसिद्धयोगार्थमादायैव ज्ञानेच्छायां

सर्वैः प्रयुज्यते । तस्मान्माध्वोक्तरीत्या सूत्रार्थोऽनुपपन्नः । किंच माध्वग्रंथेषु पूर्वतंत्रमार्गविरोधो बहुधा दृश्यते "द्वादशाहवदुभयविधमि"तिसूत्रीयमध्वभाष्ये द्वादशाहः सत्रात्मकः क्रत्वात्मक इति लिखितं; तत्, अहीनसत्ररूपेणोभयविधो द्वादशाहइति पूर्वतंत्रलेखनविरुद्धं । क्रतुत्वस्य सत्रवृत्तित्वेन तेनाकारेण क्रत्वात्मकः सत्रात्मक इति पक्षद्वयलेखनमयुक्तं । लिंगभूयस्त्व सूत्रे यज्ञीयहिंसाया इति कर्तव्यतात्वेन प्राबल्यादिति तत्वप्रकाशिकायांलिखितं। तत्पूर्वतंत्रेहिंसाया इतिकर्तव्यतात्वमिति कुत्राप्यलिखितत्वात्पूर्वतंत्रविरुद्धं । भूम्नइतिसूत्रे तत्वप्रकाशिकायां दीक्षा प्रायणीयो, दयनीय, सवनत्रयावभृथात्मकः क्रतुरितिलिखितं । तदपि पूर्वतंत्रविरुद्धं । तथापूर्वतंत्रे कुत्राप्यालिखितत्वात् । "स्वामिनःफलश्रुते"रित्यधिकरणे अयजमानानामपि ऋत्विजां सत्रयागफलमिवेति लिखितं । तदपि पूर्वतंत्रविरुद्धं । सूत्रे येयजमानास्तेऋत्विज इति वचनेन ऋत्विजां यजमानत्वेनायजमानत्वाभावात् । आनंदमयाधिकरणसुधायां, "ज्योतिरुपक्रमाधिकरणतत्वप्रकाशिकायांचज्योतिषांस्तोमोहिज्योतिष्टोमइतिलिखितं, तदापिपूर्वतंत्रोदाहृतश्रुतिविरुद्धं । "त्रिवृत्पंचदश, सत्पदश एकविंशाः, एतानिवावज्योतींषि यएतस्यस्तोमा"इतिपूर्वतंत्रोदाहृततांडिमहाब्राह्मणवाक्यबलेन ज्योतिष्टोमपदस्य बहुव्रीहित्वावगमेन तत्पुरुषस्यासंगतत्वात् नचमीमांसकरीतिर्माध्वैर्नांगीक्रियते; अतस्तदुल्लंघनं नदोषायेति शंक्यं । "अंगीकृतत्वादपि तैःपदानांचपृथक्पृथगि"त्यनुव्याख्यानश्लोकेन मीमांसकमतेपीदंसमानमित्यंतेनश्लोकेनोच्यतइत्यादिना महावाक्यभेदएवदेषः नत्ववांतरवाक्यभेदइति तदस्माकमपिसमानमित्यंतेन सुधाग्रंथेनच मीमांसकसिद्धांतरीतेः स्वोत्कार्थसाक्षित्वेन कथनादिति । तन्मंददंधनं । तथाहि तत्रतावत्तत्ववादिमतानुसारित्वभ्रांत्या सूत्रार्थवर्णनमेवासंगतं । "यतोनारायणप्रसादमृतेन

मोक्ष "इत्यादिभाष्ये, "जिज्ञासोत्थज्ञानजात्तत्प्रसादादेवमुच्यत"इत्यनुभाष्येच जिज्ञासैकसाध्य ज्ञानैकसाध्य प्रसादैकसाध्य मोक्षाख्यफवत्वस्य जिज्ञासाकर्त व्यत्वे ज्ञापकत्वरूप हेतुत्वस्यातःशब्दार्थत्वोक्त्यात्रविवक्षितप्रयोगे लिंगविधया जिज्ञासार्तव्यतासाधक प्रमाणतया विवक्षितानां मोक्षाख्यफलवत्व, बंधसत्यत्व, वेदस्यस्वतःमामाण्य, सिद्धार्थपरत्वादीनामतः, शब्दार्थत्वाज्ञानेन जिज्ञासा जनकतया विवक्षितस्य ब्रह्मप्रसादमात्रस्य ज्ञापकत्वरूपहेतुत्वभ्रांत्या अतः शब्दार्थत्वकथनात् । विष्णुपादैकसंश्रयत्व विरक्तत्वादिसर्वसंग्रहायाधिकार संपत्यनंतरमित्यथशब्दार्थमज्ञात्वा, शमाद्यनंतरमित्यनभिप्रेतार्थकथनात्, यो ग रूढि,गौणी,लक्षणाभेदभिन्नमुख्यामुख्यवृत्तिव्यतिरेकेणतात्पर्यवृत्यभावस्य क र्मनिर्णयादौ समार्थितत्वेन शब्दवृत्तिविषयस्यैव तात्पर्यविषयतया मंगलस्य पूर्वेक्तरीत्या शब्दर्थत्वाभावेन सौत्रपदार्थानन्वयितया तस्यान्वयोक्तेरज्ञानमूल त्वात् । "ब्रह्मज्ञानाय वेदविचारःकर्तव्यइत्येव वचनव्याक्ति"रिति न्यायामृतो क्त्याब्रह्मसंबंधीनीत्यस्याप्यज्ञाननिबंधनत्वान् । ओंकारार्थान्वयानुत्केश्चेति । किंच । एतेन, "यत्तुकेनचिदुक्तं । "भाष्येमंगलार्थोऽधिकारानंतर्यार्थ" श्चेति चकारोनुपपन्नः । तुल्यार्थैहि समुच्चयः । यथा गोशब्दः सास्नावदर्थो जला र्थश्चेति । नचेह मंगलंवाच्यं । येन चकारोपपत्तिः मंगलफलक आनंतर्य वाचक इत्येतावता सामंजस्यादिति । तन्निरस्तं । परममंगलरूपविष्ण्वर्थक त्वस्यापि "अकारःसर्ववागात्मा परब्रह्माभिधायकः । तथौप्राणात्मकौप्रोक्तौव्या तिपिस्थितिविधायका" वितिप्रमाणानुसारेण वर्णनात् । सकृच्छ्रुतस्याप्यथ शब्दस्य तंत्रावृत्येकशेषाणामन्यतमाश्रयणेनार्थद्वयोपपत्तेः । नकेवलं मंगल फलकः किंत्वानंतर्यवाचकश्चेति चशब्दोपपत्तेरिति" चंद्रिकाप्रकाशेनैव विद्या वान् धनवांश्चेत्यादौ मतुपः आश्रयाश्रयिभाव स्वस्वामिभावादिरूपार्थभेदेपि

समुच्चायकचशब्दवत्, वसिष्ठोब्रह्मिष्ठो अरुंधतीपतिश्चेत्यादौ विधेयविशे
षकचशब्दवच्चायमपिचशब्दोयुक्तइतिचशब्दास्वरस्यशंकावृत्तिद्वय
विरोधशंकाचतिरोहितेतितद्दूषणंस्मृतमारणमेव । अथशब्दस्य विष्णु
रूपमंगलवाचकत्वोक्तिस्तु तस्यविष्णुस्मरणादिरूपमंगलफलकत्वोपपादना
येति नतस्याप्यन्वयप्रतियोगिता । एतेन तत्वप्रकाशिकाप्रामादिकीति
स्वेतिकरेवप्रामादिकीति सिद्धं । तत्पाठस्यापि समर्थितत्वादिति । यदपि,
अतःशब्दस्येत्यादि । तदप्यज्ञानविजृंभितं तथाहि । "ननुप्रकृतस्यहेतुत्ववा
चिनातःशब्देनकथमिदंमोक्षसाधनप्रसादसाधनज्ञानेहेतुत्वंलब्धं । अधिकारि
विशेणत्वेनमोक्षस्यप्रकृतत्वेपितंप्रतिनारायण प्रसादस्यसाधनत्वादरप्रकृतत्वेनत
स्यातइति प्रातिपदिकेनपरामर्शा संभवेनतस्यविचारकर्तव्यतायां हेतुत्वस्याविभ
क्त्यादेशतासिलोक्त्ययेगात् । मैवं । "यमेवैषवृणुतइत्यादि" श्रुत्याप्रयेजनाभावप्र
युक्तानारंभणयित्वशंकानिरासहेतोरन्यस्याभावात् । श्रुवेणावद्यतत्यादौद्रवद्रव्य
मितिवत्यतइत्यादिभाष्योक्ताध्याहारेण शब्दतः बुद्धिस्थत्वरूपप्रकृतत्वसंभ
वात् । अत्रयतइत्यादि भाष्योक्ताध्याहारे "यमेवेति" श्रुतिः उक्ताशंकानिरासक
त्वान्यथानुपपत्तिश्चबीजं । "यतइत्यध्याहारंविनाविचारकर्तव्यत्वरूपार्थानुप
पत्यायत्रानवसरइतिश्लेको यतइत्यध्याहारसमर्थनपरतयापिव्याख्येयः । नके
वलंकर्तव्यपदाध्याहारसमर्थनपरतया । यद्वा । जन्मादिसूत्रेप्रमाणेनबुद्धौ
सन्निहितत्वात्जगतः अस्येत्यनेनपरामर्शवदत्रापिप्रसादादेर्मोक्षहेतुत्वादेः प्रामा
णिकत्वादेतच्छब्देनपरामर्शः । बुद्धिसन्निहितत्वमेवहिप्रकृतत्वं ।
प्रमाणमेवबुद्धौसन्निधापकं । बुद्धिस्थपरामर्शकत्वादेवतमेवंविद्वानित्यादि
ना प्रामाणिकतादर्शिताभाष्ये । यद्वा एतत्सूत्रनिर्णेतव्येन "नारायणेसौपर
मोविचिंत्योमुमुक्षुभिः कर्मपाशादमुष्मा" दित्यादिविचारविधिवाक्येन प्रसा

दद्वाराविचारस्य मोक्षसाधनतायाः "यस्यप्रसादात्परमार्तिरूपादितिपूर्वार्धेनप्रा प्त्योपस्थापितत्वात्तदतःशब्दार्थः । एकस्यविषयवाक्यतयोदाहरणंतूप लक्षणतया । व्याख्येयेप्रकृतस्यव्याख्यानेअतइतिपरामर्शसंभवात् । यद्वा अनुव्याख्यानोक्तरीत्यामीमांसांगभूतब्रह्मतर्केप्रकृतत्वात्सिद्धेव्युत्पत्यादिक मिव विचारस्यप्रसादद्वारा मोक्षहेतुत्वमतःशब्दार्थः । अनुव्याख्यानेतु "अतो यथार्थबंधस्ये"त्यादिना बंधस्यामिथ्यात्वात् तन्निवृत्तेःप्रसादनैरपेक्ष्यात्नभगव त्प्रसादार्था जिज्ञासामुमुक्षुणाकर्तव्येत्यादिशंकानिरासाय प्रयोजनसाधकजग त्सत्यत्वादिकमप्यतःशब्देनोक्तं । विषयसिद्धिहेतुयुक्तिष्वपिब्रह्मपदसूचित गुणपूर्त्यादियुक्तिभिन्नवेदप्रामण्यासिद्धार्थबोधकत्वादिरूपा शब्दस्यनप्रामाण्यं प्रामाण्येपिसिद्धार्थेनप्रामाण्य मित्यादिप्रमाणारोपिताकारशंकानिरासकृद्युक्ति रप्यशब्देनैवसूचिता । अपेक्षितार्थसूचकत्वादतःशब्दस्येत्युक्त्वा "यतोनुभवतः सर्वसिद्धमेतदतोपिचेत्या दिनाबुद्धौपरिवर्तमानंहिसाक्षात्प्रकृतं ग्रंथोक्तत्वंतुतार्लिं गं । बंधसत्यत्वादिकंचानुभवसिद्धत्वात्प्रकृतमितिमतांतरमुक्त्वा "अत स्तदर्थसंक्षेपादतइत्यभ्यसूचय " दित्यादिनामीमांसांगभूतब्रह्मतर्काख्यतर्कशास्त्रे सूत्रकृत्कृतेप्रकृतोजिज्ञासाकर्तव्यत्वोपयोगियुक्तिकलापोऽतःशब्दार्थः । तर्क शास्त्रस्यमीमांसांगत्वंच तन्निर्णीतस्वरूपसंख्याबलाबलादिभिःप्रमाणैरिहप्रमेयसं शोधनादिति मतांतरमुक्तमिति तदेव "मित्यादिचंद्रिकाग्रंथेनैवाप्रकृतत्वशंका याःसमूलघातंघातितत्वात् । यदपि उत अकारोविष्णुवाचकइत्यादि "तदपिनयुक्तं । "परस्यब्रह्मणोविष्णोःप्रसादादितिवाभवे "दितिप्रमा णबलेनातइत्यस्यप्रसादार्थत्वसंभवात् । ब्रह्मतइत्येव तदर्थःप्रसादादितिपर्य वसितोर्थइत्यंगीकारेण प्रसादस्यवाच्यत्वाप्राप्तेर्वोक्तशंकावारणसंभवात् । यदपि विशेषस्यब्रह्मभिन्नत्व इत्यारभ्यानर्थिका विशेषकल्पनेत्यंतं तत्खव्याहतं

तत्ववादिसिद्धांताज्ञानविजृंभितंच । तथाहि । भेदस्यप्रमाणबाधितत्वे अभेदस्यनिरवकाशप्रमाणसिद्धत्वेच भेदप्रतिनिधिनाविशेषेणैवसर्व भेदकार्यनिर्वाह इतिसत्यं । तत्रविशेषोनामाभेदे भेदकार्यकारी भेदप्रतिनिधिर्वस्तुनिष्टः शक्तिविशेषः । किमत्रमानमितिचेत् प्रत्यक्षंतावत्प्रमाणमितिब्रूमः तथाहि । शुक्लःपटइत्यादिधियांकुंडेबदरइत्यादिबुद्धितोवैलक्षण्यंतावदनुभूयते । तच्च संयोगादिसंसर्गानवगाहित्वेसतिसमूहालंबनातिरिक्तत्वरूपं । तच्चशुक्लरूपपटयोर्विशेषणविशेष्यभावनिर्वाह्यं । ततस्तदुपपादकपदार्थविषयित्वमंगीकार्यं । नचतद्विषयीभूतः समवायः तस्यसूत्रकृतैव निरस्तत्वात् । अनयोःसंयोगइतिवत् अनयोः समवायइति स्फुटप्रतिभासाभावाच्च । तस्माद भेदविषयकत्वंबाच्यं। तत्रात्यंताभेदभानेशुक्लःपटइतिविशेषणविशेष्यभावापन्नतयाभानानुपपत्तिः तस्मात्तन्निर्वाहायतयोः कश्चिदधिकोर्थोभासतइत्यभ्युपेयं । सएवविशेषः । अभेदेपिविशेषकत्वाद्वस्तुशक्तिरेवाविशेषोनामा । तथाच विशेषसद्भावे तादृशंप्रत्यक्षमेवप्रमाणं । यद्यपि तंतुपटयोरत्यंतभिन्नघटपटयोरिवपरस्परवैलक्षण्यानुभावाभावात्अत्यंतभेदस्वीकारेमूर्तद्वयस्यैकत्रावस्थानायोगेनतंतुपटयोरेक देशस्थत्वानुपपत्तेः । गुरुत्वाधिक्यापत्तेश्च । तयोरभेदांगीकारेपिभेदस्याप्यंगीकारेणतंतवःपटइतिसामानाधिकरण्यबुद्ध्युपपादनवदत्रापितथास्यादितिवक्तुंशक्यते । तथापितत्रसामानाधिकरण्यबुद्धिनिर्वाहायैवनभेदोंगीकृतः । किंतुपटावस्थातः प्रागिमेतंतवएवनपटइति ।निर्बाधप्रत्ययान्यथानुपपत्याभेदस्याप्यंगीकारात् । आतानवितानात्मकतंतवएवपटइत्यबाधितप्रतीत्या अभेदस्याप्यभ्युपगमात्। एकतरपरिशेषेविनिगमकाभावाच्चभेदाभेदयोःसिद्धौतस्यसामानाधिकरण्यव्यवहारानियामकत्वमभ्युपगम्यते। प्रकृतेच पटोनशुक्लइतिकदापिप्रतीत्यभावात् महारजनरंजनावस्थायामपिविशेषदर्शी

नामयंशुक्लोनेति प्रमानुदयाच्च । अंगुलीद्वयवद्भेदेनानुपलंभाच्च शुक्लभेदस्य पटेसत्वायोगेन शुक्लःपटइति प्रतीतसामानाधिकरण्यस्य भेदेननिर्वोढुमशक्य तयाविशेषसिद्धेरावश्यकत्वात् । भवन्मतसिद्धगुणगुण्यादिभेदाभेदाविरोध निर्वाहार्थमपि विशेषांगीकार्यः । विरुद्धयोर्गोव्याघ्रयोर्मंत्रशक्त्यैकत्रावस्थान दर्शनेनविशेषरूपवस्तुशक्तेरेवसंभावितत्वात् । एवं पटेशौक्ल्यं शुक्लःपटइति प्रतीत्याशुक्लरूपस्यपटेनसहाभेदतद्वृत्तित्वयोर्भावात् । तत्रसविशेषाभेदोंगी कार्यः । अत्यंताभेदे आधाराधेयभावानुपपत्तेः । नचशुक्लइत्यत्रशुक्लरूपाश्र याभेदएवभासतेनतुशुक्लरूपाभेदः । अन्यथारूपंघटइतिप्रत्ययापत्तिरिति वाच्यं । शुक्लादिपदानांगुणवाचित्वेनतच्छब्दोल्लेखिप्रत्यक्षस्यगुणाभेदा वगाहित्वात्रूपेघटाभेदावगाहिसाक्षात्कारस्तुवर्ततएव । रूपंघटइति शब्दप्रयोगस्तुनायोग्यत्वान्निवर्तते किंतुविशेषबोधनादेर्व्यवहारोपयोगितया तस्यैवावश्यकत्वेन सामान्यतोरूपाद्यभेदबोधनस्यप्रयोजनाभावात् । यदा प्रयोजनसद्भावात्तादृशव्यवहारः क्रियते तदातद्वाक्यंयोग्यमेव । अयोग्यत्वे बीजाभावात् । शक्लादिशब्देभ्योमतुपोलुग्विधायकं गुणवचनान्मतुपोलुगिष्ट इतिवचनंतु कदाचिद्विशेषप्रयुक्तव्यवहृतिगोचरधर्मधर्मिभावबोधतात्पर्येपिम तुपोलोप एवेत्यर्थकं स्वरार्थंवातोनतद्बाधकं । वस्तुतस्तु प्रतीतौनतल्लोपा दिकंशवयशंकं । शब्दएवतत्प्रसारात् । घटादौरूपभेदस्यप्रमितत्वेनभेद बाधाच्चेति । एवं ब्रह्मणआनंदइति आनंदोब्रह्मेतिच व्यवहारादानंदस्यब्रह्माभेद तत्संबंधित्वयोर्निर्वाहायापिविशेषोंगीकार्यः । "एकमेवाद्वितीयं नेहनानास्ति किंचने"त्यादिश्रुतिभिर्हरेर्गुणकर्मादिभिर्भेदस्यनिषिद्धत्वेन भेदेनसंबंधव्यवहारा देर्निर्वाहस्य निरूपयितुमशक्यत्वात् एवंलोकेपि कालः सदास्ति देशःसर्वत्रा स्ति सत्तासती प्रमेयत्वंप्रमेयमित्यादि स्ववृत्तित्वावगाहिव्यवहारनिर्वाहायापि

विशेषोंगीकार्यः । तथाभवन्मतेपि ज्ञानानंदादिपदानां ब्रह्मस्वरूपमात्रबोध कत्वात्तेषांपर्यायत्ववारणाय तथाचिदंशस्यसदंशस्यचानावृतत्वं पूर्णानंदांशस्यावृतत्वं चैतन्याभिन्नस्यैक्यस्यचैतन्यप्रकाशेप्यप्रकाशइत्यादिनिर्वाहायापिविशेषोंगीकार्यः । "नात्रकाचनभिदास्ती"ति ब्रह्मस्वरूपभेदस्यनिषिद्धत्वात् । नैय्यायिकैरपिसत्पपदार्थातिरिक्तपदार्थानंगीकारिभिःआधारत्वा धेयत्वविषयत्वविषयित्व प्रतियोगित्वानुयोगित्वा दिधर्माणामाश्रयस्वरूपत्वस्यैवांगीकृतत्वेन तेषामाधाराधेयभावादि व्यवस्थानिर्वाहाय विशेषोंगीकार्यः । भट्टादिभिरप्यभावस्याधिकरणत्वेपितेनसहाधाराधेयभावनिर्वाहाय भूतलाभावादिपदानां पर्यायत्ववारणाय गुणगुण्यादीनांभेदाभेदयोरंगीकृतत्वेन तयोरविरोधोपपादनायच विशेषोंगीकार्यः । किंच"एवंधर्मान्पृथक्पश्यन्निति" श्रैतार्थापत्तिरपितत्साधिका । तत्रहि बहुत्वविशिष्टधर्माणां ब्रह्मणा सहभेदस्यनिषिद्धत्वेनैकब्रह्माभिन्नेषु बहुत्वमाश्रयाश्रयिभावश्चभेदंविनैवतत्प्रतिनिधिना विशेषेणोपपाद्यमितिस्फुटमवगम्यते । तदुक्तं । "उक्त्वाधर्मान् पृथक्तस्य निषेधादेवमेवहि । विशेषोज्ञायते श्रुत्याभेदादन्यश्चसाक्षित"इति । किंचगुणागुण्याद्यभेदपक्षे पटोपलंभेपितद्रूपानुपलंभार्थं भेदाभेदपक्षेपि तयोरविरोधार्थं अत्यंतभेदपक्षेसमवायःसंबद्धः भेदोभिन्नः अंत्यविशेषोव्यावृत्त इत्याद्यबाधितव्यवहारनिर्वाहार्थं विशेषोंगीकार्यः किंचअभावादावस्तित्वादिर्नाभावादितोभिन्नः गुणादिष्वनंतर्भावेन षट्पदार्थनियमभंगात् । अनियमपक्षेपि अस्तित्वेअस्तित्वांतरमित्यनवस्थानात् । तत्रविशेषोपिनचेत्कथं विशेषणविशेष्यभावादि । ननुसात्तादेः सत्ताद्यंतराभावेपि स्वभावविशेषादेवतद्व्यवहारइतिचेन्न । तस्यैवस्वभाव विशेषस्यास्माभिर्विशेषशब्देनोक्तेः । समवायादिः स्वनिर्वाहकइतिचेन्न । स्वस्यस्वयमेव निर्वाहकंहिस्वनिर्वाहकंवि

शेषाभावेच कथमेकस्यैव निर्वहणक्रियायांकर्मत्वं कर्तृत्वंच । एवंच ब्रह्मस्व रूपभूतयोर्ज्ञानानंदयोर्ब्रह्माभेदयोश्चैकतरपरिशेषाभावःप्रमेयत्वादेः स्वाश्रयत्वा दिकंवा भेदान्यनियम्यं भेदानियम्यत्वेसतिनियम्यत्वात् एवंब्रह्मस्वरूपभूतं विज्ञानानंदादिकं भेदान्यैकतरापरिशेषानिर्वाहकवत् भेदहीनत्वेसति एकतरा परिशेषरूपानिर्वात्यवत्वात् । यथासंप्रतिपन्नमित्याद्यनुमानान्यपितत्रमानानि। विशेषविशेषिणोश्चाभेदएवेतिसचविशेषस्तत्तद्धर्मिस्वरूपएव । नचतथात्वे आश्रयाश्रयिभावानुपपत्तिः । स्वाभिन्नोपिस्वाश्रयत्व संपादकत्वाकारेणैवत त्सिद्धेः । अभिन्नेवस्तुनिभेदकार्यनिर्वाहकत्वस्ययत्रभेदोनिषिद्धःभेदकार्याणि चावगम्यंते एतदुभयान्यथानुपपत्तिरूपार्थापत्यास्वरूपग्राहिण्या अभेदेभेद कार्यनिर्वाहक एवासौविशेषःसिद्धइतिधर्मिग्राहकमानेनैवसिद्धत्वात्तत्रप्रमाणां तरान्वेषणमप्रयोजनं । नचविशेषेविशेषांतरांगीकारेअनवस्था विशेषेविशेषां तरानंगीकारात् । कथंतर्हिभेदकार्यदर्शनं । आधारभूतविशेषमाहात्म्यबला देव । कुतएतत् । इत्थं । ज्योतिष्टोमेनयजेतेतितृतीययायागस्यप्रामाणिकत्वे सतियथातन्निर्वाहार्थं कालांतर देशांतर देहांतरभोग्यंफलंकल्पयित्वा तस्यच फलस्यसद्यःप्रध्वस्तयागजन्यत्वानुपपत्तिपरिहारार्थं मध्येअपूर्वमित्यादिकल्प्यते प्रमाणसिद्धार्थनिर्वाहार्थंकल्प्यमानस्यापिप्रमाणिकत्वात् । एवंप्रकृ तेप्युक्तप्रकारेणाविशेषे प्रामाणिकेसतितस्ययावंताविनाननिर्वाहस्तावत्सर्वमपि कल्प्यमेव । विशेषनिर्वाहकस्यापिविशेषग्राहकप्रमाणेनैवाक्षिप्तत्वात् । यथा हुः । "प्रमाणवंत्यदृष्टानिकल्प्यानिसुबहून्यपीति" । एवंचधर्म्यत्यंतभेदे अभेदे भेदाभेदयोश्च दोषदर्शने भेदभेदाभेदपक्षयोरनवस्थादिदूषणैरुक्तक्रमे णदुष्टत्वात् । क्वचिद्विश्राममंगीकृत्यतस्यस्वनिर्वाहकत्वमभ्युपेयं। तदपेक्षयाप्रका शरूपस्यदीपस्य प्रकाशकत्ववत् सर्वनियामकेश्वरस्येतरानियम्यत्ववत् इतर

वाक्यानांपौरुषेयत्वेपिवेदस्यापौरुषेयत्ववत् तार्किकाभिमतविशेषस्यस्वतएव व्यावृत्तत्ववच्चकस्यचित्स्वनिर्वाहकत्वमविरुद्धमिति संभावितत्वज्ञानपूर्वकमत्यंताभेदेकल्पनालाघवमिति युक्त्योदाहरिष्यमाणागमेनचात्यंताभेदपक्षस्यैवस्वनिर्वाहकविशेषसाहित्येन सिद्धतयाविशेषस्य तत्रधर्मिग्राहकमानेनैव दोषांतरासंस्पर्शात् । अन्यथास्वतोव्यवृत्तत्वेन सिद्धस्यापिविशेषस्येतरसाम्यापादनपूर्वकदोषांतरैरसिद्धिप्रसंगात् । तचकल्पितभेदेनशुक्लःपटइत्यादिव्यवहारसंभवात् अविद्यावरणेन पूर्णानंदाभानोपपत्तेःभेदाभेदयोर्मध्येभेदस्यप्रातीतिकत्वेन समसत्ताकत्वाभावेनाविरोधात् ज्ञानानंदादिपदानांप्रवृत्तिनिमित्तभेदेनापर्यायत्वोपपत्तेः । विशेषस्योपयोगाभावः । अन्यथाजीवब्रह्मणोरप्यभेदमेवांगीकृत्यविशेषेणैवसर्वनिर्वाहंकृतोनरोचये: । श्रुतेस्तुधर्मेतात्पर्याभावान्नश्रुतार्थापत्युत्थानं । आगमस्तुनास्त्येव । भेदकार्यकारिणोविशेषस्याभेदेनविरुद्धतयाभेदवदभेदेन सहावस्थानासंभवात् । सर्वत्रापिविशेषेणैव सकलभेदकार्यनिष्पत्तौभेदस्यदत्तजलांजलित्वापाताच्च । नविशेषांगीकारेयुक्तइतिवाच्यं पटोनशुक्लइतिकदापि प्रतीत्यभावेन भेदकल्पनाया अयुक्तत्वात् । प्रातीतिकस्यार्थक्रियाऽसंभवात् । भेदपरंपराकल्पनापत्या अनवस्थादिदोषापत्तेः अतात्विकस्यतात्विककार्यविघातकत्वेन विशेषणविशेष्यभावव्यवहारानुपपत्त्यशामकत्वाच्च । विशेषाभावेअनावृतचिदंशाभिन्नपूर्णानंदादेरावरणायोगात् विषयंविनाअविद्यासिद्ध्ययोगात् तांविनांशभेदाभावेनान्योन्याश्रयत्वापातात् । उभयोरप्यनादित्वाददोषइतिचेत् तर्ह्यंशस्यकल्पितत्वाभावेनस्वाभाविकत्वप्राप्त्याऽखंडत्वहानेः । अनादेरज्ञानप्रयोज्यत्वस्याप्रामाणिकत्वाच्च । विशेषाभावेप्रवृत्तिनिमित्तभेदस्याप्यसंभवात् । अनृतास्वप्रकाशपरिछिन्नरूपेशबलेसत्यत्वज्ञानत्वादेरयोगात् । योगेवातस्यैवानृतादिव्यावृत्तत्वप्रसंगात् । सत्यादिपदानां

लक्षणया अखंडार्थत्वे च शुद्धे तदसिद्धेश्च पर्यायत्वस्य दुर्वारत्वात् । व्यावर्तकस्य सत्यत्वादेस्तात्पर्यतो ब्रह्मण्यनर्पणे असत्यादिव्यावृत्तिरूपप्रयोजनाविशेषासिद्धेश्च। अत्यंताभेदस्य निरवकाशप्रमाणेन सिद्ध्यनंतरमेव तत्र भेदकार्य निर्वाहाय तत्प्रतिनिधेर्विशेषस्याभ्युपगतत्वेन प्रकृतजीवेशाभेदपरत्वेन पराभिमतश्रुतेरुपपत्ति उपजीव्यप्रत्यक्ष प्रबलनिरवकाशश्रुत्यंरादिविरुद्धत्वेन तत्रतात्पर्यायोगे जीवेशाभेदस्याप्रामाणिकतया तत्र प्रातिनिधिविशेषांगीकारे बीजाभावात् । मुख्यासंभव एवह्यनुकल्पः । माणवके मुख्यसिंहव्यवहारनिमित्तस्य सिंहत्वस्य विरोधेपि क्रौर्यादेरविरोधवदत्राप्युपपत्तेः । धर्मिग्राहकप्रमाणेन विशेषस्य भेदकार्यकरस्याप्यभेदाविरोधित्वेनैव सिद्धत्वात् । तत्र विरोधापादकतर्कस्यापि धर्मिग्राहकमानविरोधेनानुत्थानाच्च । नचानेनैव सर्वकार्यनिर्वाहे भेदोदत्तजलांजलिः स्यादित्युक्तमितिवाच्यं । तथात्वे पूतिकस्य सर्वत्र ग्रहणे संभवति सोमाभाव प्रसंगात् । तत्र मुख्ये संभवति नामुख्यं कल्प्यत इति चेत्समः समाधिः । सिंहेपि क्रौर्यस्यानुगतत्वेन सिंहव्यवहारे संभवति सिंहत्वस्यापि दत्तजलांजलित्वापाताच्च । भगवद्धर्माणामन्यतोप्राप्तत्वेनानुदकत्वायोगेन गुणपूर्णत्वव्यवस्थापनेन च श्रुतीनां भगवद्धर्मेषु तात्पर्यस्य निराबाधतया निर्णीतत्वाच्च । "भेदाभेदौ चयः पश्ये" दित्यादिप्रमाणबलेन भेदमात्रस्य लोकसिद्धत्वाच्च भेद भेदाभेदयोर्द्वयोरपि श्रुत्या निषिद्धत्वेन श्रौतार्थापत्तेर्विशेषमानत्वस्याप्रतिहतत्वात् । यत्तु धर्मान्पुण्यानि परमात्मनः पृथक्पश्यन्तदसमर्पणंकुर्वंस्तदनुसारेणाधोविधावतीति श्रुत्यर्थवर्णनं तत्पूर्वोत्तरवाक्येषु भगवद्धर्माणामिव पुण्यपापादीनामप्रकृतत्वेन प्रकरणाद्यनानुगुण्यादुदक्षरत्वाच्चानुपादेयमेवेति पदवाक्यप्रमाणविदामग्रेसरेण भगवता भाष्यकारेणोक्त एव श्रुत्यर्थः । विस्तरस्तु न्यायामृते व्यक्तः । किंच "अभावो यत्र भेदस्य प्रमाणावसितो भवेत् । विशेषो नाम तत्रैव विशेषव्यवहारभागि" त्याद्यागमोपि तत्र

प्रमाणं । तेचविशेषाअनंतेषुपदार्थेष्वनंताएवसंति । नपुनरेक एवसर्वत्र । तथाचानंतद्रव्येषुयत्रयावंतोव्यवहारास्तत्रतावंतः परस्परविशेषिणोविशेषाउक्त लक्षणाःवर्ततइतिनकोपिक्षुद्रोपद्रवः । तस्मात्साधकसद्भावात्बाधकाभावाच्च निर्भेदमपितद्ब्रह्मानंतकल्याणगुणपूर्णं ब्रह्मशब्देनभण्यतइतिसिद्धं । तदुक्तं । "अणुत्वंचमहत्वंचतथैवघटयेच्छ्रुतं । स्वसामर्थ्यविशेषेणघटयेत्सर्वमीदृशं । स्वैश्वर्यस्यविरोधीनिघटयेन्नात्मानिप्रभुः । विरूद्धयोःसतोर्योगःस्वमूलाघातिनोभवेत् । मुनेःशक्त्याकिंनुवनेवैरिणःसहसेरते । तच्छक्त्यापिनवैराग्यंकामेनसहतद्धृदि । बहिर्वातपसोविघ्नकारिणःसंतिराक्षसाः । भेदहीनेपिभेदस्यकार्यंयो घटयेच्छ्रुतं । स्वसामर्थ्यविशेषोहिविशेषइतिगीयते । परप्रकाशकोदीपोनाकिं स्वस्यप्रकाशकः । विशेषोन्यत्रनिर्वाहीस्वनिर्वाहीकथंनसः । शक्तःस्वदोषं प्रहरेग्दण्हीयाच्चेत्वशक्तता । नृहरेःनखरक्रौर्यंकिंस्वोदरविदारणं । गुणत्वस्यगुणित्वस्यतदभेदस्यचेश्वरे । प्रामाणिकस्यघटनाशक्त्यैवस्यात्सुखादिवदि"ति । यच्च ब्रह्मपदेनजीवभेदःसिद्ध्यतीत्यभ्युपगमोप्यसंगतइति । तदपिमंदं । अभेदैकत्ववत्येवघटेद्रव्यांतरसहितेद्वित्वदर्शनात् । तथेहास्मिन्ब्रह्मणिअन्येनसह द्वित्वमस्तु । उत्तरत्र यःसेतुरित्यादिभिःपूर्वत्र यस्यब्रह्मचक्षत्रंचेत्यादिभिर्ब्रह्मविषयकैर्वाक्यैःसंदष्टत्वेनास्यब्रह्मप्रकरणत्वात् । किंचदृश्यतेहिप्रमेत्वंप्रमेयं आनंदंब्रह्मणः भेदोभिन्नइत्यादावेकास्मिन्नेवविशेषणविशेष्यभावेनसंबंधः । विज्ञानमानंदंब्रह्मेत्यादावानंदब्रह्मणोरेकत्वस्यसिद्धत्वात् । तथेहाप्येकस्मिन्ब्रह्मण्यनेकत्वमस्तु । "नेहनाने"त्यदिनातुब्रह्मणिस्वगुणक्रियादिभिर्भेदएवनिषिद्धः । नत्वनेकत्वसंख्या । किंतु "अयंवैहरयोयंवैदशचसहस्राणिचबहूनिचानंतानि तदेतब्द्रह्मापूर्वमनपरमनंत"मित्यादिचतुर्थबृहदारण्यकश्रुत्या "युक्ताःह्यस्यहरयः शतादशेतितस्यहवा एतस्यपरमस्यत्रीणि रूपाणि कृष्णोरामःकपिलइति

तस्यहवाएतस्यपंचरूपाणि शतरूपाणि सहस्ररूपाणि अमितरूपाणीत्या"दि श्रुत्याचविहिताहिंसा। विरोधंतुप्रमितत्वाद्भेदप्रतिनिधिर्विशेषोवारयिष्यति। एवंचघटपटयोर्भेदोद्वित्वनिर्वाहकः। ब्रह्मणितुभेदस्य"नेहनाने"त्यादिनानिषेधात् "अयंवेदशचे"त्यादिनैकत्वानेकत्वयोःप्रमितत्वात्सोमकार्यनिर्वाहकेणसोमप्रतिनिधिनापूतिकेनसोमकार्यमिवभेदकार्यमविरोधकेनभेदप्रतिनिधिनास्वरूपसामर्थ्यापरपर्यायेणविशेषेणभाविष्यति। समर्थितश्चसौविशेषः। अनुव्याख्यानसुधयोस्तु"ऋतंपिबंता"वितिप्रकृतयोर्द्विवचनविषयतयाद्वित्वाधारयोःयःसेतुरित्येकवचेनविशेषणादभेदैकत्वाधारतयावगमा" दित्यादिनाप्रकृतवाक्यएवद्वित्वैकत्वयोरैकाधिकरण्यंप्रमितमित्यविरोधउक्तः। किंचब्रह्मणआनंदमात्रात्मकत्वेतत्स्फुरणाभावः। ज्ञानमात्रात्मकत्वेआनंदाभावइत्युभयथापिमोक्षस्यापुमर्थत्वंस्यात्। सुखप्रकाशस्यैवपुमर्थत्वात्। ज्ञानानंदोभयात्मकत्वेतुसिद्धमेकस्याप्यनेकत्वं। तन्निर्वाहस्तुविशेषबलादित्येकःपरिहारः। अन्यस्तु यथामीमांसकमतेमेधपतयइत्यादौद्वित्वैकत्वयोर्देवतात्वादिरूपभेदेनोपपत्तिस्तथाब्रह्मणः स्वरूपेणैकत्वंरूपविशेषेणद्वित्वमितिश्रौतयोर्द्वित्वैकत्वयोःसमुच्चयोस्तु। "इंद्रो मायाभिःपुरुरूपईयते यदेकमव्यक्तमनंतरूपं एकंरूपंबहुधायःकरोति पश्य मेपार्थरूपाणिशतशोथसहस्रश"इत्यादिश्रुतिस्मृतिभिरेवसमुच्चयावगतेरिति। एवमानंदमयनयेअन्नमयादिपंचानामपिब्रह्मशब्दात्मशब्द मंत्रवर्णसमाख्याब्रह्मवित्प्राप्यत्वादिनिरवकाशश्रुतिलिंगादिभिः परब्रह्मत्वस्यप्रमितत्वादेकस्यापिब्रह्मणअन्नमयादिकोशस्थानिरुद्धादिरूपभेदेनपंचात्मकत्वंप्रमितमितिवा विशेषबलाद्वा विरोधपरिहारःपूर्ववत्।एवंनसंख्येतिनयेप्राणस्यप्राणमित्यादौप्राणनियंतृत्वादिविष्णुलिंगश्रवणात् "नामानिसर्वाणि तावाएता" इत्याद्युक्तसर्वशब्दवाच्यत्व मुमुक्षुज्ञेयत्वादिप्रागुक्तहेतुभ्यश्चएकस्यापिबहुरूपत्वेनपंचत्वसंख्यायाः मे

दप्रतिनिधिविशेषबलेनचसंभवान्नतत्रापिविरोधप्रसक्तिः । एवं "नस्थानतइति" नयेसर्वेषुभूतेषुचक्षुरादिस्थानेषुएतमेवपूर्णगुणमाचक्षतइत्यर्थक "सर्वेषुभूतेष्वेतमेवब्रह्मेत्याक्षत" इतिश्रुतौ "एषतआत्मांतर्याम्यमृत" इत्ययमेवसःसोयमात्मे" त्यादिभाष्योदाहृतश्रुतिषुचतत्रतत्रस्थितभगवद्रूपणांपरस्परंमूलरूपेणचाभेदकथनात्। "अमात्रोनंतमात्रश्चेत्यत्रभिन्नांशशून्यः पुनरनंतांशश्चेतिविश्वादिरूपाणामभेदोक्तेश्च । भेदव्यपदेशस्यच "भिन्नोभिन्नेषुसंस्थितेः ऐश्वर्याद्रूपमेकंचसूर्यवद्बहुधेयते" इत्यादिस्मृत्यागोष्टेगावएकीभवंतीत्यत्रैक्योक्तिवत् व्यात्पेहरा "वंगुष्टमात्रःपुरुष" इत्युक्तिवच्च स्थानभेदेनोपचारेणवैश्वर्यबलेनवोपपत्तेःनतत्रापिविरोधः । तदुक्तं । "स्थानानांभेदस्तस्याभेदएवे" ति । एवं "अरूपवदेवही" त्यत्रतु "ऐकात्म्यप्रत्ययसारं आनंदरूपममृतमित्यादि" श्रुतिबलेनज्ञानानंदाद्यात्मकदिव्यदेहश्रवणेनरूपश्रुतेस्ताद्विषयत्वस्य "भौतिकानिहिरूपाणिभूतेभ्योसौपरोयतः । अरूपवानतःप्रोक्त" इत्यादिस्मृत्याप्राकृतरूपहीनेगृहांतश्चाक्षुषप्रकाशेविद्यमानेपिबाह्यप्रकाशाभावेनाप्रकाशव्यवहारवत् अरूपश्रुतेरप्राकृतविग्रहेपिहरौप्राकृतरूपाभावविषयत्वोपपत्तेः । अप्राकृतदिव्यविग्रहस्यचानित्यत्वाद्यनापादकत्वात्सैंदर्यसंभवान्माहात्म्यवत्वाच्चयुक्तातत्रभक्तिरित्युक्तं । सतिचैवं कुत्रविरोधः । रामकृष्णादिरूपाणामभेदःश्रुत्यादिसिद्धइतिनोदाहृतस्थलेविरोधवार्तेति । किंच "आनंदरूपं सुवर्णज्योतिः दहरोस्मिन्नंतरआकाशः" इत्यादिषुभगवतःरूपंश्रूयते । यदिरूपंनस्यात्तर्ह्यानंदमित्येवस्यात् । कथंसुवर्णरूपत्वमरूपस्य कथंवादहरत्वं दहरश्च "केचित्स्वदेहेत्यादौरूपवानुक्तः" सहस्रशीर्षा पुरुषः रुग्मवर्णं कर्तारं सर्वतःपाणिपादंतत् विश्वतश्चक्षुरि" त्यादिवचनात् विश्वरूपाध्यायादेश्चरूपवानवसीयते "नतस्यप्राकृतामूर्तिर्मांसमेदोस्थिसंभवा । नयोगित्वादीश्वरत्वात्सत्यरूपाच्युतोविभुः । सद्देहःसुखगंधश्चेति" पैंगिखिलेपु

"देहोयंमेसदानंदोनायंप्रकृतिनिर्मितः । परिपूर्णश्चसर्वत्रतेननारायणोस्म्यह" मित्यादिब्रह्मवैवर्ते । "रामकृष्णादिरूपाणिपरिपूर्णानिसर्वशः । नचाणुमात्रं भिन्नानितथाप्यस्मान्विमोहसीत्यादि"नारदीयेचरूपोक्तेःतदनुगृहीतैः ब्रह्म सविग्रहं स्रष्टृत्वादित्याद्यनुमानैश्चाकारसिद्धेश्चभगवान्रूपवानेव । अतएव "विकरणत्वान्नेतिचेत्तदुक्त"मितिसूत्रेईश्वरस्यकर्तृत्वार्थं"बुद्धिमान् मनोवान् अंगवान् प्रत्यंगवानिति"श्रुत्यासकरणत्वमुक्तं । नचश्रुतिरवांतरब्रह्मपरा रूपोपासनापरा आरोपितरूपपरावेतियुक्तं । "आदित्यवर्णमि"तिश्रुतौप्रकृत्यात्मकतमःपरत्वोक्तेः । "यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यत"इत्यत्रापरोक्षज्ञानविषयत्वोक्तेः "सहस्रशीर्षे"त्यत्र"तमेवंविद्वानि"ति "यदापश्य"इत्यत्रच"पुण्यपापेविधूये"ति "नसंदृशेतिष्ठतिरूपमस्ये"त्यत्र"यएनंविदुरमृतास्तेभवंती"तितज्ज्ञानस्यमोचकत्वोक्तेश्च । "देवाअप्यस्यरूपस्यप्रवेष्टुंचपरंतपे"ति"विमुक्तगम्यत्वाद्युक्तेश्च । अन्यथोपासनायाअनर्थफलत्वेनतथोपासनापरत्वे "तेषांदुःखप्रहाणायश्रुतिरेषा प्रवर्तत"इत्यादिश्रुतिविरोधापातात् । आरोपितविषयकत्वेआप्रामाण्यापातात् । न्यायामृतेप्रपंचेनैतत्प्रक्रियायानिरासाच्च । अतएवेदंरूपंनभौतिकंप्राकृतमनित्यं वा । "सर्वैपंचभिराविष्टंभूतैरीश्वरबुद्धिजैः । ईश्वरोहिमहद्भूतंप्रभुर्नारायणोविराट् । तमसःपरस्ता"दित्यादावभौतिकत्वाद्युक्तेः । "नित्योनित्याना"मितिनिर्धारणेन देहतोपिनित्यत्वावगमात्। सर्वेनित्याःशाश्वताश्चदेहास्तस्यमहात्मनः । परमानंदसंदोहाज्ञानमात्राश्चसर्वश"इत्यादौनित्यत्वाद्युक्तेश्च । भेदाभावेप्यहि कुंडलाधिकरणन्यायेन विशेषबलेन विग्रहवत्वोपपत्तेः पिशाचादा विवांतर्धानशक्त्यानुपलंभसंभवाच्च । नचा"शरीरं अपाणिपाद"इत्यादिविरोधः । "अदुःखमसुख"मितिसुखादिनिषेधकवाक्यवत्प्राकृतशरीरावयवादिनिषेधपरत्वात् । "अरूपोऽकृतत्वाच्चे"तिस्मृतेश्च । तस्मान्नाप्राकृशरीरप्राकृतशरीराभावयोर्विरो

धः । एवं "सशिरःसदक्षिणःपक्षइत्यादिप्रमाणेनावयवाद्यभेदावगमात् । आनंदमयतदवयवयोर्द्वयोरपिपूर्णत्वरूपब्रह्मत्वस्य "यथैवकृष्णकेशस्यकृष्णस्यब्रह्मताखिला । दर्शिताचैवपार्थायनिःसीमाःशक्तयोस्यही" त्यनुव्यानसुधयोःसमर्थनाच्चनावयवत्वविरोधोपि । अत्रनारायणादिरूपाणामानंदमयशब्दितानंदमयकोशस्थनारायणाख्यमूर्त्यवयवत्वंच "अंगांगित्वेनभगवान्स्वानंदानुभवेस्थितः । सएवव्यूह्यचात्मानंपृथग्रूपइवास्थित" इत्यैतरेयभाष्योदाहृतप्रमाणदिशा तथा"सर्वतःपाणिपादादिर्यतःपाण्यादिशक्तिमान् । केशादिष्वपिसर्वत्रकृष्णकेशोहियादवः । अणोरणुतरैरूपैःपाणिपादादिसंयुतैः । सर्वत्रसंस्थितत्वाद्वासर्वतःपाणिपादवा"नितित्रयोदशगीतातात्पर्योदाहृतप्रमाणोक्तदिशाचमुक्तारत्ननिर्मितप्रतिमायांमुक्तादेरिवज्ञातव्यं । किंचआनंदमयपुच्छयोर्द्वयोरपिपूर्णत्वेनब्रह्मशब्दस्तावन्मुख्यःपूर्णत्वंहिब्रह्मशब्दस्यमुख्यार्थः यथाधर्मांतरेष्वदृष्टमपिजातिसमवायादौधर्मितोधिकदेशत्वं यथापरिच्छिन्नेनाव्रियमाणसंबंधिनावृतेष्वन्येष्वदृष्टमपिपरिच्छिन्नाज्ञानावृतेनिरंशेचैतन्येअपरिच्छिन्नत्वं यथावाआनंदांतरेअदृष्टमपिब्रह्मानंदस्यपूर्णत्वादिकं तथान्यत्रादृष्टमप्यवयवस्यपूर्णत्वं विचित्रशक्तियुक्तब्रह्मावयवेस्तु उक्तंच "विश्वतश्चक्षुः पूर्णमदःपूर्णमिद" मित्यादिश्रुत्या "सर्वतःपाणिपादंत"दित्यादिस्मृत्याचावयवस्यपूर्णत्वं । "ब्रह्मतावयवेपिस्यात्तथावयविनिस्वतः । यथैवकृष्णाकेशस्ये"त्यादिनानुव्याख्यानेच । युक्तंचानवस्थापरिहारायकचित्संबंध्यादेःसंबंधत्ववत् अस्मिन्नेवप्रकरणे"आनंदंब्रह्मणइतिश्रुतेरानंदात्मकस्यैवब्रह्मणआनंदित्ववच्च विशेषबलाच्छक्तिव्यक्तिभावात् "सशिरःसदक्षिणःपक्ष" इत्यादिश्रुत्यादिबलाच्चावयाविनएवावयवत्वामिति । ततश्चब्रह्मण्यवयवावयविनोरैक्यस्यप्रमितत्वेनतत्रापिभेदप्रतिनिधिनाविशेषेणसर्वनिर्वाहसंभवान्नविरोधावकाशः । विरोधशामकस्योपपादितत्वात् ।

एवं अंशस्यार्जुनादेस्तच्छरीरार्जकपूर्वतनतदनुष्ठितकर्माभावेनकर्मानिर्मितशरीराभावेनित्यदेहत्वापातान्मोक्षभावप्रसंगेनाऽनन्यगत्या "अंशिनस्तुपृथक्जाताअंशास्तस्यैवकर्मणेति" स्मृत्याचांशिकर्मार्जितशरीरेअर्जुनाद्यंशानामवस्थानमित्यवश्यंवाच्यत्वात् तस्यचांशांशिनोर्भेदेअयोगात् तत्कर्मार्जितशरीरेस्वातंत्र्येण स्वभोगावच्छेदकेअवस्थानान्यथानुपपत्तिरूपेण अंशिगतप्रधानसाधनोपासनादिफलस्यांशेनानुसंधीयमानत्वेनतदन्यथानुपपत्तिरूपेणचांशांशिनोरभेदसाधकमानेन अंशिगतात्यल्पज्ञानसुखाद्यननुसंधानस्यमानुषसंपर्क प्राकृतान्नभोजनादिना भगवदिच्छयाचोपपन्नतयाबाधकाभावेनचांशांशिनोरभेदस्यसिद्धत्वात् । सत्यप्यैक्येसुविजातेनचांशेनांशिगतंसुखदुःखाद्येवानुभूयते । यतः कश्चित्सर्वाननुसंधानरूपोविशेषस्त्वंशिकृतोभवेत् । भूम्याद्यपकृष्टदेशं गर्भवासाद्यवस्थां मानुषान्नोपभोगादिकंचनिमित्तंकृत्वेश्वरेणक्रियते । अतोंशस्यांश्यनभिमतकरणादिकंयुज्यते । एतेनेंद्रार्जुनयोरभेदेपरस्परविरुद्धखांडववनदहनशमनादिकमयुक्तमितिनिरस्तं । अचिंत्येशशक्त्यैवोक्तनिमित्तेनचाशेषानुसंधानप्रतिबंधेनानभिमतकरणाद्युपपत्तेः । दृश्यंतेखल्वघटितंघटयंत्येश्वरशक्त्याप्रेरिताः कामक्रोधादिपरवशाऐहिकामुष्मिकदुःखहेतुंस्वशिरःच्छेदादिकंमहापातकंचकुर्वाणाः । ततश्चतत्रापिविशेषएवसर्वनिर्वाहकइतिनाविरोधः । नचयथार्जुनस्यैक्येसत्यपींद्रगताशेषानुसंधानमचिंत्येशशक्त्याप्रतिबध्यते तथा जीवपरमात्मनोरभेदेपिपरस्परानुसंधानप्रतिबंधोस्तु । अपकृष्टदेशादिकमिवदेहाद्युपाधयोनिमित्ततामापत्स्यंतइतिवाच्यं । जीवाभिन्नस्यभवन्मतेपरमात्मनोचिंत्यशक्तिमत्तारूपेशतायाएवायोगात् । जीवस्तावदनीशइत्यनुभवसिद्धं । तदभेदेपरमात्माप्यनीशइत्युक्तमेव । ततश्चानीशस्येशतास्त्वितिस्वव्याहतंकथमनुन्मत्तःशंकेत । यत्किंचिद्विरुद्धमिवप्रतीयमानमपिईश्वरे तदितरत्रवाप्रमा

णसिद्धमीश्वरैश्वर्याविरोधिच यथाणुत्वमहत्वादि यथावार्जुनादीनामशेषानुसंधानाभावःतत्सर्वमीश्वरैश्वर्यबलेनघटतइत्यंगीकार्यं नतुनिराकार्यं । यत्पुनरप्रमितं तदीश्वरैश्वर्याविरोध्यपिनांगीकार्यं । शशविषाणादिकल्पनापत्तेः । यच्चप्रमितमपीश्वरैश्वर्यविरोधि तदपिनकल्पनीयं । कल्पकविघातकत्वात् । किंतुप्रमाणस्यापातप्रतीतार्थेआभासतावर्णनीयेति । तदेवंजीवेशाभेदस्याप्रमितत्वात् ईशताविघातकत्वाच्च तत्राभेदमंगीकृत्यविशेषणनिर्वाहोक्तिरस्वस्थचेतसएवयुक्तेतिसिद्धं । किंच"त्वयीश्वरेब्रह्मणिनोविरुद्ध्यते यस्मिन्विरुद्धगतयोप्यानिशं पतंति विरुद्धधर्मरूपोसावैश्वर्यात्पुरुषोत्तमः"इत्यादिस्मृतिभिः "अस्थूलोनणुरमध्यमोमध्यमः गुणाःश्रुताःसुविरुद्धाश्चदेवे"इत्यादिश्रुतिभिश्चेश्वरेनकस्यापिविरोधास्यावकाशइत्यवगम्यते । किंच"तत्त्वमसी"त्यस्यभवन्मतेअखंडार्थत्वेन चिन्मात्रपरतयैक्यपरत्वासंभवात् तत्परत्वेपिजीवत्वब्रह्मत्वोपलक्षितयोरैक्यपरत्वेविशिष्टार्थत्वेनाखंडार्थत्वभंगप्रसंगात् ऐक्यमात्रबोधनेजीवेशाभेदासिद्धेः ऐक्यस्वरूपमात्रेविवादाभावात्। चैतन्येचैतन्यभेदस्यकेनाप्यनंगीकारेणवाक्यवैयर्थ्यापत्तेः । सर्वज्ञत्वादिधर्माणांनित्यत्वेनयावद्धर्मिभावितयातत्परित्यागासंभवेनविशिष्टैक्यबोधकत्वापातात् । उपजीव्यप्रत्यक्षेणोपपत्यानिरवकाशानेकभेदश्रुतिभिश्चविरुद्धत्वेनैक्यपरत्वासंभवात् । "स्वातंत्र्येचविशिष्टत्वेस्थामत्यैक्यवोरपि । सादृश्येचैक्यवाक्सम्यक्सावकाशायथेष्टत"इत्यनुव्याख्यानोक्तरीत्यासावकाशस्यतत्त्वमस्यादिवाक्यस्यबहुभिः प्रकारैर्न्यायामृते अन्यथा व्याख्यातत्वात् । "गृष्टयोर्विवादेसंप्राप्तेपहत्वैकामपराङ्मुखीं विरोधशांतिंकः कुर्याद्विनाम्लेच्छकुमारकानि"त्युक्तदिशाभेदाभेदश्रुत्योर्द्वयोरप्यपौरुषेयत्वेनाशंकितदोषतयापरमप्रमाणयोर्मध्येभेदवाक्यानामतत्वावेदकत्वेनाप्रामाण्यंव्यवस्थाप्याभेदवाक्यानांतत्वावेदकत्वेनप्रामाण्यकथनस्यायुक्तत्वात् ।किंतुयोग्यार्थेद्वयो

रपिपरमप्रामाण्यस्यैवव्यवस्थापनीयत्वात् । निषेधायाभेदानुवादइत्यपिवक्तुं शक्यत्वेनतत्रतात्पर्यायोगाच्चनैक्यस्यप्रमितत्वं । उपक्रमाद्यानुण्यंतुभेदएवेति समर्थितमधस्तादिति । किंचमहावाक्यप्रतिपाद्यमैक्यमावांतरवाक्यप्रपिपाद्यं सत्यत्वादिकंचब्रह्मणापरस्परंचाभिन्नमेव ततश्चचैतन्यप्रकाशेप्यैक्यस्याप्रकाशः अपर्यायशब्दवेद्यत्वं चैतन्यप्रकाशस्यानाद्यविद्यानिवर्तकत्वाभावःअद्वैतज्ञान स्यतन्निवर्तकत्वमित्यर्थक्रियाविशेषः चैतन्यमेकं सत्यत्वादीन्यनंतानीतिसंख्या भेदइत्यादिभेदकार्याणिचावगम्यंते एतदुभयान्यथानुपपत्याभेदरहितेपिचैत न्येभेदप्रतिनिधि स्तत्कार्यकारीकश्चिच्छक्तिविशेषोस्तीतित्वयापिवक्तव्यत्वेनवि शेषाचिंत्यशक्त्योरकामेनापिशिरसामहादरेणधार्यतयातन्निराकरणोक्तिरप्ययु क्तैव । ततश्चैश्वर्याविघातकत्वेननजीवेशाभेदःसंभवतीतितत्रप्रमितेनभेदेनैव सर्वकार्यनिर्वाहोनतुतत्प्रतिनिधिनाविशेषेणेतिनतत्प्रतिबंदीयुक्तेतिदिक् । अस्म न्मतेचयादृशतादृशाविरुद्धधर्माधिकरणत्वंनभावभेदहेतुःकिंतु देश काल पुरुष स्थानभेदादिव्यवस्थापकाभावविशिष्टमेव । प्रकृतेचजीवेशयोरल्पज्ञत्वसर्वज्ञ त्वादिधर्माणांतत्तत्स्वरूपभूतत्वेनस्वाभाविकतयाकस्याप्युक्तव्यवस्थपकस्याभा वेनागमाद्युपजीवित्वेनचनिरवकाशत्वादिनाप्रबलस्योक्तविशिष्टविरुद्धधर्माधिक रणत्वस्यभेदसाधकतानिष्प्रत्यूहैव । ईश्वरस्यज्ञानानंदाद्यात्मकाप्राकृतादिव्य शरीरात्मकत्वस्यानित्यमुक्तत्वेनबहुप्रमाणप्रमितस्यांगीकारेपिसंसारिचेतनानाम त्यंतभिन्नभौतिकजडदेहस्यांगीकृतत्वाच्चार्वाकमतप्रवेशापादनमप्यनुचितमेव । जडशरीरात्मवादोहिचार्वाकवादइति । किंच"जुष्टंयदेत्यत्रभेदव्यपदेशादि तिसूत्रेपश्यतीतिसन्निहितोजीवएवपादिन्यायेनान्यत्वप्रतियोगितयान्वेति "जीवा दन्यःस्वतंत्रोय"इतिस्मृतेः अन्यमीशमितिश्रुत्याभिन्नजीवदृशंगत"इत्यादिस्मृ तिभ्यश्चेत्यपदेनभेदस्यसूत्रकृतैवोक्तत्वान्नव्यमाध्वेत्युक्तिरज्ञाननिबंधनैव ।

जीवेशभेदस्यप्रमितत्वेनमुख्येसंभवतिप्रतिनिधिकल्पनायोगात् । अन्योंतरआ आत्मेत्यत्रतु अन्यत्वांतरत्वाद्युक्तिरधिष्ठानभूतकोशानामंतरत्वादन्यत्वात् ब्रह्म णोबहुरूपत्वात् विशेषसद्भावात् अनन्योप्यन्यशब्देनेत्यादिस्मृतिबलाच्चयु क्ता । तत्रस्थानगतमन्यत्वंस्थानिन्युपचर्यतइत्येकःपक्षः । वक्ष्यतेचैतत्सू त्रकृता "ह्यपेक्षयेतिसूत्रे" । बहुरूपत्वादन्यत्वं अणूरूपतयांतरत्वंचमुख्य मेव । यद्वाबहुरूपत्वादंतरत्वं पंचत्वसंख्याचमुख्यैव । "अभिन्नोपिविशे षेणैवान्यइत्युदितोहरि"रित्यनेनान्यत्वमपिमुख्यमेव । "भेदशब्दाविशेषंतुह रावन्यत्रभिन्नता"मितिस्मृतेः । तथाचब्रह्मशब्दादिनापंचानामपिब्रह्मत्वनि श्चयात्तत्रमुख्यस्यभेदस्यासंभवेनप्रतिनिधिनाविशेषेणान्यइत्यादिव्यपदेशोऽविरु द्धइति । यदपि पुराणवचनमात्रेणेति तदप्ययुक्तं । "यदिविद्याच्चतुर्वेदा न्सांगोपनिषदान्द्विजः । नचेत्पुराणसंविद्यान्नैवसःस्याद्विचक्षणः । इतिहा सपुराणाभ्यांवेदंसमुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदोमामयंचालयिष्यती"त्या दिनास्मृतीनांश्रुत्युपबृंहकत्वेनश्रुतिसखीत्वात्स्मृतिभिः श्रुत्यर्थनिर्णयस्यन्याय्य त्वात् । ब्रह्मशब्द आत्मशब्द मंत्रवर्णसमाख्या ब्रह्मवित्प्राप्यत्व परब्रह्मप रत्वेननिर्णीतोपनिषद्रूपस्थानमध्यपतितत्व भृगुवल्लीसमाख्यानादिसाधारणश्रु त्युपपत्तिभिः अन्नमयादिषुप्रत्येकंतत्तत्प्रकारणोदाहृतश्लोकेषुश्रूयमाणाभिःसर्वो पजीव्यत्वसंहर्तुत्वरूपाद्यत्वसर्वदेवादिचेष्टकत्वअवाङ्मानसगोचरत्वसंकल्पपूर्व कंसर्वसष्टृत्व सर्वांतर्यामित्व लोकचेष्टकत्वाद्यसाधारणोपपत्तिभिश्चान्नमयादी नांपंचानामपिब्रह्मत्वस्यसाधितत्वाच्च । एवं तत्त्वमसीत्याद्यप्यसंगतं । "तत्त्व मसी"त्यादेरुपपत्तिविरोधादिनाजीवब्रह्मैक्यपरतायाः दुर्निरूपत्वस्यासकृदावेदि तत्वात् । एवं "अंशोनानाव्यपदेशा"दितिसूत्रे "अन्यःपरोअन्योजीवः ब्रह्म दाशा"इत्यादिश्रुतौजीवेशयोर्भेदाभेदयोरुक्तेः अन्यतरश्रुतिबाधस्यायोगात्

साक्षाद्भेदाभेदयोश्च प्रमाणविरुद्धत्वात् निरवकाशप्रमाणसिद्धं भेदमंगीकृत्याभेद स्थाने तत्सदृशत्वे सतितदधीनत्वरूपमंशत्वं जीवस्योपवर्णितं । "असंततेश्चा व्यतिकरः प्रकाशादिवन्नैवं पर" इतिसूत्रद्वये "द्विरूपावंशकौ तस्य परमस्य हरेर्वि भोः । प्रतिबिंबांशकश्चाथ स्वरूपांशक एव च । प्रतिबिंबांशकाजीवाः प्रादुर्भा वाःपरेस्मृताः । प्रतिबिंबेष्वल्पसाम्यंस्वरूपाणीतराणितु । अंशाश्चदेहयोग्यत्वा ज्जीवाबंधादिसंयुताः । अनुग्राह्याश्चतेनैवनतुमत्स्यादिकोहरि" रित्यादिस्मृतिष्व पिप्रतिबिंबांशत्वोक्त्या "ब्रह्मदाशा" इत्यादेःसादृश्याभेदपरतयाव्याख्यातत्वात् । "अंतरेणापिवतिमतिदेशोवगम्यते अब्रह्मदत्तंब्रह्मदत्तइत्याहब्रह्मदत्तवदितिगम्य त" इतिमहाभाष्योक्तेश्च । एवं "नान्योतोस्तिद्रष्टे" त्यादेःस्वातंत्र्येणान्येषां चे तनानामपिदर्शनशक्तिर्नास्तिकिमुजडस्यप्रधानस्येत्यर्थतात्पर्यकत्वेनमुख्यामुख्य योर्मुख्येसंप्रत्ययइतिन्यायेनद्रष्टृशब्देनस्वतंत्रद्रष्टुरेवोक्त्यापरतंत्रद्रष्टंतरनिषेधपर त्वाभावात् "इंद्रोमायाभि" रित्यत्रापीश्वरस्यविचित्रशक्तिभिर्मत्स्याद्यनेकरूपत्वमे वोच्यते । नतु अज्ञानेनघटादिरूपत्वं । "रूपंरूपंप्रतिरूपोबभूवे" तिपूर्वो क्तानांबिंबभूतभगवद्रूपाणामेवेहरूपशब्देनप्रत्यभिज्ञानात् । उत्तरत्रच "अयं वैहरय" इतिहरिशब्दवाच्यविष्णुरूपाणांदशत्वादिनाबहुत्वोक्तेः । "तदेतद्ब्रह्मा पूर्वमनपर" मित्यादिनातेषांब्रह्मत्वोक्तेश्च । चिन्मात्रेइंद्रशब्दास्वारस्याच्चनैता भिःश्रुतिभिःपरस्येष्टसिद्धिः । "नेहनानेत्यादिश्रुतीनांब्रह्मणिस्वगुणाक्रियावय वावताररूपादिभिर्भेदानिषेधपरत्वेनन्यायामृतेसोपपत्तिकंव्याख्यातत्वात् । "एकधैवे" त्यादेस्त्वन्मतेपिब्रह्मणिस्वरूपभेदनिषेधपरतयाव्याख्यातत्वात् "यदे वेहतदमुत्रे" त्यादिपूर्वोत्तरप्रकरणेषुभगवद्रूपाणांगुणादीनांचप्रसक्तत्वेन नानाश ब्दस्वारस्येन अत्रेत्युक्तिबलेनचयुक्त्याभासादिप्राप्तभेदनिषेधपरत्वेन "मृत्योः समृत्युमाप्नोती" त्यादेर्व्याख्यातत्वाच्चनकापिश्रुतिःपरस्यसमीहितमभिधत्ते ।

विष्णुपुराणवचनान्यपिस्वार्थसाधकत्वभ्रांत्योदाहृतानिनस्वेष्टसाधकानि । तथा हि । विष्णुपुराणेद्वितीयांशेत्रयोदशाध्यायादिषुभरतावधूतराजसंवादप्रकरणे वराहावतारप्रकरणेचाविद्यमानाह्येतेश्लोकाः तत्रपूर्वमुनिभिर्वराहस्तुतिप्रकरणे "परमार्थस्त्वमेवैकोनान्योस्तिजगतःपते । तवैषमाहिमायेनव्याप्तमेतच्चराचर" मितिश्लोकेपरमार्थइत्यस्योत्तमोर्थइत्यर्थः तदुपपादकतयातवैषमाहिमेत्युक्तेः । निष्क्रियस्यमाहात्म्यादेरयोगात् । एवं "यदेतद्दृश्यतेमूर्तमेतज्ज्ञानात्मनस्तव । भ्रांतिज्ञानेनपश्यंतिजगद्रूपमयोगिनः । ज्ञानस्वरूपमखिलंजगद्रूपमबुद्धयः । अर्थस्वरूपंपश्यंती" तिपूर्वग्रंथेभौतिकदेहग्रहणपरित्यागादिनिषेधार्थंसर्वरूपाणां ज्ञानात्मकदिव्यदेहसद्भावप्रतिपादनार्थंचायंग्रंथसंदर्भःप्रवृत्तः । अत्रात्मशब्दोदेहवाची । ज्ञानात्मकदेहवतस्तवमूर्तंधरण्युद्धरणादिक्रियाविशिष्टंयद्रूपंदृश्यतेतद्रूपमयोगिनः भगवतिमनोयोगरहिताअयोग्याः भ्रांतिज्ञानेनपंचमहाभूतात्मकजगद्रूपंपश्यंति अखिलंसमस्तंभगवन्मूलरूपावताररूपतद्देहादिकंज्ञानस्वरूपमेवाबुद्धयःसम्यग्ज्ञानरहिताः अर्थस्वरूपंयज्जगत् भूतादिरूपार्थरूपंतदात्मकंपश्यंतोमोहसमुदायेपरिभ्रमंतइतितदर्थः । एवमुत्तरत्र देवस्तुतिप्रकरणे नमोनमस्तेविश्वेशत्वंब्रह्मत्वंपिनाकधृगि"त्यादौ "सर्वात्मकस्त्वंदेवेशसर्वभूतास्थितोयत" इतिवाक्येनसर्वकारणत्वसर्वत्रस्थितत्वादिनासर्वात्मकत्वोक्तेर्गतिरुक्ता । एवं "आधारभूतंविश्वस्याप्यणीयांसमणीयसां । प्रणम्यसर्वभूतस्थमच्युतंपुरुषोत्तमं । ज्ञानस्वरूपमत्यंतंनिर्मलंपरमात्मनः । तमेवार्थस्वरूपेणभ्रांतिदर्शनतःस्थित"मितिपराशरस्तुतौज्ञानरूपत्वंभगवतउक्तं । ततःपरमयंश्लोकः "विज्ञानंपरमार्थोसौद्वैतिनोऽतथ्यदर्शिनः । एवमेवामिदंविश्वंनभेदिसकलंजगत् । वासुदेवाभिधानस्यस्वरूपंपरमात्मन"इति । विज्ञानंज्ञानात्मकंब्रह्म उत्तमोर्थः तत्रद्वैतिनःमूलरूपावताररूपादिषुसामर्थ्यवैलक्षण्यादिग्रहवंतः इदं

विश्वंनभेदि परमात्मविश्लेषविधुरं सकलंजगत्स्वंस्वातंत्र्योपेतंस्वात्मकंरूपंस्वरूपंयत्रतत्तादृशं तदधिष्टानमित्यर्थः "सर्वांतर्यामिकोविष्णुःसर्वनाम्नाभिधीयते । एषोहंत्वमसौचेतिनतुसर्वस्वरूपतः । सर्वंसमाप्नोषिततोसिसर्व" इत्यादेः । एवंज्ञानरूपंब्रह्म सत्यंमुक्तामुक्तनियामकं जगत्सद्भावयापकं नित्यंचतुर्विधनाशरहितं अन्यच्चजगन्नैतादृशमित्यर्थः । भुवनाश्रितंतेइत्यत्रतुव्यक्तोभेदः । आश्रयाश्रयिभावोक्तेः । वेणुरंध्रेत्यत्रतुअनायासेनवायुदृष्टांतेनजगत्सर्जनमेकस्यभगवतउच्यते । नभिद्यतइतिव्युत्पत्याअभिन्नस्यवायोरित्यर्थः । किंच "ब्रह्मणोनृततोभेदःसत्यश्चेद्बेदखंडनं । व्याहतंस्यादसत्यश्चेद्ब्रह्मणोनृतताभवेत् । भेदाभेदभिदाचेत्स्यात्कथंभेदोनिवार्यते । भेदाभेदभिदानोचेत्कथंभेदो निवार्यत" इतिन्यायामृतोक्तरीत्या भेदखंडनमयुक्तं चेति । इत्थंचनकुत्रापिभवदाभिमतजगन्मिथ्यात्वंजीवब्रह्माभेदोवाबोधितइतिपरस्यायोग्यकामनामात्रमनेनाभिव्यक्तमित्यलं । यदपि नाद्वैतिनिंदादृश्यत इति तन्मंदं "असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं । तआसुराःस्वयंनष्टाजगतःक्षयकारका" इतिव्याससमृतौ "ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः । शास्त्रतत्वमविज्ञायतथावादबलाजनाः । याथातथ्यमविज्ञायशास्त्राणांशास्त्रदस्यवः । ब्रह्मस्तेनानिरानंदाःअपक्वमनसोऽशिवाः । तेषांतमःशरीराणां तमएवपरायणं। यतःस्वरूपतश्चान्योजातितःश्रुतितोऽर्थतः । कथमस्मिसइत्येवसंबंधःस्यादसंहितइतिमोक्षधर्मे। अधंतमःप्रविशंतियेविद्यामुपासत" इति श्रुतौचान्यत्रचबहुधानिंदितत्वात् । अन्यंसंतंपरमात्मानंस्वयमितिमन्यमानस्तेनएव। नहिस्वकीयंपरित्यजन्स्तेनोभवतीत्यद्वैतिनएवस्तेनत्वेनापहार्षीदित्यादिश्रुतौनिंदितत्वाच्च । किंच "यथापक्षीचसूत्रंचनानावृक्षरसायथा ।यथानद्यःसमुद्रश्चशुद्धोदलवणेयथा । यथाचोरापहार्यौचयथापुंविषयावपि । तथाजीवेश्वरौभिन्नौसर्वदैवविलक्षणा" वितिछंदोग

श्रुत्युपब्रुंहणस्मृत्यादौ भेदस्यैव प्रमितत्वात् । "विश्वं सत्यं यच्चिकेतसत्यमित्तं सत्यंचजगदीदृश "मित्यादौजगत्सत्यतायाएवप्रमितत्वाच्चसर्वमपिशास्त्रंपरस्यप्रतिकूलमेव । श्रुत्यादीनांव्यावहारिकपरत्वादिकल्पनंतु "दीर्घभ्रांतिकरीचेत्स्यादतत्वावेदकप्रमा । रज्जुसर्पादिविज्ञानादप्याधिक्यादमानते"त्यनुव्याख्यनादावेवनिरस्तं । यदपि जिज्ञासापदं त्विति । तदप्यज्ञानमूलं । चंद्रिकायामेव "ज्ञानेछार्थोपिजिज्ञासाशब्दःमननरूपविचाराभिधायकइतिपक्षेछत्र्यछत्रिसमुदायेछत्रिसाहचर्यात्छत्रिणोगछंतीतिलक्षणयाछात्रिशब्दवत् मननरूपेविचारेशक्तस्यजिज्ञासाशब्दस्यतत्सहपठितश्रवणादौलक्षणोपपत्तेः । यद्वेहटीकायांजिज्ञासाविचारशब्दाभ्यांसाक्षान्निदिध्यासनेनपरंपरयाश्रवणमननाभ्यांचित्तस्यतत्प्रावण्यंभगवदेकनिष्टतातद्रूपाश्रवणादित्रितयानुगतोपासनाविवक्षिते"त्युक्तत्वेनशक्तिपक्षे साक्षात्परंपरयाचित्तस्यतत्प्रावण्यरूपत्रितयानुगतशक्यतावच्छेदकलाभेनैकशक्तिसंभवात् लक्षणापक्षेसुतरांदोषाभावाच्च । अत्रसाक्षात्परंपरयाचित्तस्यतत्प्रावण्यमित्यनेननिदिध्यासनेन श्रवणमननाभ्यांवाभगवदेकनिष्टतद्गतोत्कर्षविशेषमात्रविषयकमनोवृत्तित्वं श्रवणादित्रितयानुगतमेकंशक्यतावच्छेदकं विवक्षितं । तथाचसूत्रार्थोऽनुपपन्नइत्यज्ञोक्तिरेवानुपपन्नेति । ततश्चतत्ववादिमतनिर्णीतंसूत्रार्थस्वरूपमेवाविदुषोऽर्वाचीनस्यतन्निराकरणाययतमानस्य कथंनजातालज्जेतिचित्रमितिदिक् । यदपि पूर्वतंत्रविरोधव्युत्पादनं तदप्यज्ञाननिबंधनं । "द्वादशाहव"दितिसूत्रभाष्येयथाद्वादशाहःक्रत्वात्मकःसत्रात्मकश्चभवतीत्युक्तं । तत्रक्रत्वात्मकइत्यस्य अत्रक्रतुरित्यहीनोविवक्ष्यते अहीनैकाहेष्वस्यश्रेष्टत्वात्क्रतुशब्दःतथाचश्रुतिः "श्रेष्टयज्ञो वाएषद्वादशाह"इति अत्र द्विविधो द्वादशाहः । सत्रमहीनश्चेति । तत्रैकादशाहःपर्यंतमहर्गणाअहीनाएव । त्रयोदशाहादिकंसत्रमेव । मध्यमंतुयजमानेच्छया

एकयजमानकत्वेअहीनसंज्ञकं अनेकयजमानकत्वेसत्रसंज्ञकं । सत्रस्यापि क्रतुत्वेपियजमानेच्छयाएकानेकयजमानकत्वेन द्वादशाहस्यक्रतुत्वमहर्गणत्वरूपमहीनत्वं सत्रत्वंचयुज्यते द्वादशाहमहीनात्मकं प्रस्तुत्य सत्रमुच्यते"सर्वेप्यग्नीन्यजेर"न्निति श्रवणात् । ततश्चाहीनात्मकःसत्रात्मकइतिवक्तव्ये क्रतुविशेषेअहीनेक्रतुपदप्रयोगःअहीनैकाहेष्वस्यश्रेष्ठत्वज्ञापनार्थः । क्रतुसत्रयोःसामान्यविशेषभावज्ञापनार्थश्चेतिसम्यग्व्याख्यातत्वेनोक्तशंकायाः गर्भश्रावेणवगतत्वात् । एवंलिंगभूयस्त्वसूत्रे "यागीयपशुहिंसायामितिकर्तव्यतायाएवप्राबल्यदर्शना"दितिटीकावाक्यस्य पापजननस्वभावायाअपिहिंसायास्तांशक्तिंपरिभाव्यपुण्यजननशक्त्याधायकत्वेनसंत्रादीतिकर्तव्यतायाहिंसादिरूपयागस्वरूपनिष्पादकत्वेनचप्राबल्यदर्शनादिति भावदीपेव्याख्यातत्वेनतत्रहिंसायाइतिकर्तव्यतात्वस्यानुक्ततयाअनुक्तोपालंभात् । एवं भूम्नइतिसूत्रे "यथाखलुदीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकस्यक्रतोः सर्वयागेष्वनुवर्तनएवसाफल्यादन्यथावैफल्यात्ज्यायस्त्व"मितिटीकावाक्यस्य "अत्र दीक्षानाम ज्योतिष्टोमेयजमानसंस्काररूपकर्मविशेषः प्रायणीयोदयनीयौतस्यक्रतोराद्यंतयोःकर्तव्येष्टिविशेषौ प्रातःसवनमाध्यंदिनसवनतृतीयसवनभेदेनसोमाभिषवरूपसवनत्रयं अवभृथोनाम "अप्स्ववभृथेनचरंती"त्युक्तेष्टिविशेषः । एतादृशांगकलापविशिष्टस्यक्रतोरग्निष्टोमस्यसर्वयागेषुद्वादशाहाद्यहर्गणेष्वनुवर्तनेनवा दीक्षाद्यंगकलापविशिष्टयागवाचकत्वेनमीमांसकमते रूढ्याप्रसिद्धोप्यत्रक्रतुशब्दः कर्तुंयोग्यत्वान्निमित्तात्तदंगकलापपरो विवक्षितः । तस्य सर्वक्रतुष्वनुवर्तनेन वा ज्यायस्त्वमितिव्याख्यातत्वेनोक्तांगकलापस्यपूर्वतंत्रप्रसिद्धत्वेनालेखनोक्तेरयुक्तत्वात् । किंचविपरीतोक्त्योर्विरोधेप्युक्त्यनुक्त्योर्विरोधंवदन्पूर्वतंत्राभिज्ञंमन्योदेवानांप्रियः श्लाघनीयप्रज्ञ एवे ति । एवं "स्वामिनःफलश्रुतेरिति सूत्रभाष्यटीकास्थायज

मानपदस्य "अत्रायजमानानामित्यस्यग्रहपतिव्यतिरिक्तानामित्यर्थः तेन" येय जमानास्तेऋत्विज "इतिवाक्याविरोध" इतिभावदीपे "सत्रयागेषुनकेवलंग्रहपते रेव किंतुऋत्विजामग्रहपतीनामिष्टप्रथमयज्ञानांस्वान्स्वानग्नीन्तदग्निषुसमारो प्यदीक्षितानामनात्तदक्षिणानामल्पंफलंदृश्यते ग्रहपतेःद्रव्यादिस्रष्टुरसमत्वेपी ति"तत्वप्रदीपे च ग्रहपतिव्यतिरिक्तऋत्विक्परतयाव्याख्यातत्वेनोक्तशंकाऽप्रस रात् । "एवंज्योतिरुपक्रमात्त्वित्यधिकरणटीकायां"ज्योतिषांस्तोमइत्यादिरू पाहिज्योतिष्टोमादिशब्दव्युत्पात्तिरित्युक्तं । अत्रपूर्वपक्षेज्योतिष्टोमशब्दस्य भगवद्वाचकत्वं ज्योतिरादिशब्दानामन्यार्थत्वमंगीकृत्यवाअन्यवाचकत्वं विना वेति विकल्प्यद्वितीयकल्पे "कथमसौस्तोमादिशब्दनामन्यपरत्वानभ्युपगमे सं भवेत् । अन्यथाभगवन्नामावृत्तिमात्रत्वप्राप्ते"रित्यंतमिदंटीकावाक्यंप्रवृत्तं । तथाचात्रपूर्वपक्षानुवादपरटीकावाक्यस्थत्वमात्रेणतत्पुरुषसमासस्यास्मत्सिद्धांत त्वभ्रांतिनिबंधनचोद्यमयुक्तमेव । वस्तुतस्तु तत्रापिज्योतिर्नामकस्तोत्रसमू हवतोयागस्यैवज्योतिष्टोमपदेनग्रहणंविवक्षितं । इत्यादिरूपेत्यत्रत्यादिपदे नयत्रेत्यस्यविग्रहवाक्यघटकत्वस्याभिप्रेतत्वात् । उक्तटीकावाक्यस्य ज्योति ष्टोमशब्दस्यपदसमाहाररूपत्वप्रदर्शनएवतात्पर्येणसमग्रव्युत्पात्तिप्रदर्शनपरत्वा भावेनतन्मात्रेणसिद्धांतेतत्पुरुषसमासइत्यस्याप्राप्तत्वाच्चेति । तदुक्तं परिमळे "यद्यपित्रिवृत्पंचदशसप्तदशएकविंशाएतानिवाज्योतींषियएतस्यस्तोमाइतिज्यो तींषिस्तोमा यस्मिन्निति ज्योतिष्टोम इति विग्रह इतिप्रसिद्धः तथापि अवयव विभागप्रदर्शन एवास्यतात्पर्यमित्येके अन्ये तु एवमेवविग्रहः बहुव्रीहिप्रसि द्धिस्तु अन्यथानेयेत्याहुरिति । यादुपत्येतु इदंनिर्वचनंप्राचीनमीमां सकसिद्धमित्युक्तं । तस्मात्परोक्तंदूषणमत्यंतासंबद्धमित्यलं त्यक्तकणवुसो त्पवनायासेनेति सिद्धं ॥ ३४ ॥

यदपि। अत्रायंकक्ष्याक्रमः अकृतकर्मविचारस्यापि ब्रह्मविचारेअधीतोपनिषत्प्रतीतापातार्थानिर्णयार्थं प्रवृत्तिसंभवेनब्रह्मविचारेकर्मविचारानंतर्यमसंगतमिति प्रथमकक्ष्येति। तन्न। यद्यपि चंद्रिकायां "कर्मविचारानंरं ब्रह्मजिज्ञासेत्यत्रश्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिक्रमाणांक्रमेप्रमाणानामन्यतमस्याभावा" दित्यादिनास्यार्थस्य दूषितत्वात्कर्मविचारानंतर्यं नास्मत्सिद्धांतः। तथापि परस्याप्रबुद्धस्यविचाराकौशलप्रकाशनायात्रापिकिंचिद्विचार्यते। तथाहि। कार्यनिष्ठवेदभागःपूर्वतंत्रे वस्तुतत्वानिष्ठस्तूत्तरतंत्रेविचार्यतेइतिविषयभेदंवदतस्तवमतेपूर्वतंत्रेकस्याधिकारः। नतावदधीतब्रह्मतंत्रस्यज्ञानिनःभवन्मतेअविद्यावद्विषयत्वात्कर्मविद्यायाः। ज्ञानिनःसर्वकर्मत्यागस्यसिद्धांतित्वेनप्रयोजनाभावात्। अज्ञस्याप्यनधिकारेनिरधिकारिकंतच्छास्त्रमापद्येत। तस्मादज्ञत्वावस्थायांकर्मविचारपरपूर्वतंत्रमधीत्यैवब्रह्मज्ञानकामनयाब्रह्मतंत्राध्ययनेयतितव्यमितिवक्तव्यतयाब्रह्मजिज्ञासायाःकर्मविचारानंतर्यस्यन्याय्यत्वात्। अवस्तुविचारस्यवस्तुतत्वज्ञानोपयोगित्वांगीकाराच्च। अस्मन्मतेतुकर्मतंत्रस्यवेदैकदेशामुख्यार्थविचारपरत्वात् मुख्यतःब्रह्मतंत्रस्यसर्ववेदार्थविचारपरत्वस्य "शब्दजातस्यसर्वस्ययत्प्रमाणश्चानिर्णय" इत्यादिमानसिद्धत्वात्। ज्ञानिनोपिकर्मानियमाच्च। नैषनोषः। वस्तुतस्तुनित्यानित्यविवेकाद्यानंतर्यमपिनोक्तरीत्यायुक्तमितिकर्मविचारानंतर्यदूषणेयतमानस्य "परदोषान्पश्यसित्वमात्मदोषान्नपश्यसी" त्याभाणकविषयतापरस्यापन्नेति। यदपि। "अथातःशेषलक्षण" इत्यत्राथशब्दस्यभेदविचारानंतर्यार्थत्वेकर्मभेदकर्मांगत्वविचारयोर्हेतुहेतुमद्भावोनियामकः प्रकृतेकर्मब्रह्मविचारयोर्हेतुहेतुमद्भावे नियामकादर्शनमितितृतीयाकक्ष्या। "तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेने" तिश्रुतिःइष्यमाणवेदनेयज्ञादिकर्मणांसाधनत्वसम पिंकाकर्मब्रह्मविचारयो

हेतुहेतुमद्भावेनियामिकेतिचतुर्थीकक्ष्या । तमेतमितिवाक्येशब्दतःप्रधानभूता यांवेदनेच्छयांयज्ञादिसाध्यत्वंप्रतीयतेनत्वर्थतःप्रधानेवेदनेइतिपंचमी । ज्योतिष्टोमेनयजेत असिनाजिघांसतीत्यादाविवतृतीयांतार्थस्यार्थतःप्रधानएवान्वयोन्याय्यइतिषष्ठी । तमेतमित्यत्रेप्यमाणवेदनमुपासनात्मकंसूत्रेतुविचारात्मकमितिनप्रकृतेउक्तनियामकसंभवः । जिज्ञासूत्रस्यतृतीयांतपदघटितत्वाभावेनात्रशब्दतःप्रधनेच्छायामेवानंतर्यान्वयापत्तिरिति । तदप्यसमंजसं । कर्मणाज्ञानमातनोतीत्यादौसाक्षादेवज्ञानेकर्मसाध्यत्वप्रतीतेः । सूत्रेतृतीयांतपदाभावेपियज्ञेनेतिश्रुतौतस्यसत्वेनतन्मात्रे णार्थतः प्रधा नेज्ञानेयज्ञादिसाध्यत्वप्रतीतिसंभवेनाथशब्दस्यानंर्यार्थत्वसाधनसंभवात् । सूत्रेतुसिद्धेअथशब्दस्यानंतर्यार्थत्वेतस्ययथायोग्यमन्वयोपपत्तेः । चैत्रस्यगुरुकुलमित्यादाविवार्थतःप्रधानेअन्वयसंभवात् । तात्पर्यविषयार्थएवान्वयस्ययुक्तत्वात् । श्रुतिस्थवेदनसूत्रस्थवेदनयोर्वैलक्षण्येनियामकाभावाच्चेति । तस्मात्परोक्तमयुक्तमिति सिद्धं ॥ ३५ ॥

यदपि । नित्यानित्यवस्तुविवेकाद्यानंतर्यमथशब्दार्थोनभवति । नित्यानित्यविवेकस्यब्रह्मविचारोत्तरभावित्वेनतत्पूर्वत्वाभावादितिप्रथमकक्ष्या । निश्चयरूपस्यतस्योत्तरभावित्वेपिसंभावनात्मकस्यानित्यानित्यविवेकस्यविचारपूर्वभावित्वसंभवइतिद्वितीया । संभावनात्मकस्यतस्यब्रह्मज्ञानफलंनित्यमनित्यंवेतिसंशयरूपत्वान्नतस्यवैराग्यहेतुत्वमितितृतीया । ब्रह्मज्ञानफलंनित्यमनित्यंवेतिसंभावनायांनित्यत्वकोटिरुक्तटत्वेन कर्मफलमनित्यंनित्यंवेतिसंभावनायामनित्यत्वकोटिरुक्तटत्वेन विचारात्प्रागधीतसांगसशिरस्कस्वाध्यायस्यभासते । उक्तटत्वमनुक्तटत्वंचजातिविशेषःइयंचसंभावनानसंशयत्वाक्रांतेति चतुर्थी । अधीतस्वाध्यायस्योक्तविचारात्प्रागुक्तसंभावनोत्पत्तौनियामकाभा

वद्दतिपंचमी । ज्ञानकांडे "तद्यथेहे तिकर्मफलानित्यत्वप्रतिपादकंवाक्यं" नस पुनरावर्तत इतिज्ञानफलनित्यत्वप्रतिपादकवाक्यैःसाकमुपलभ्यते । कर्मकांडे "स्वर्गकामोयजेत अपामसोमममृताअभूमे"तिचकर्मफलानित्यत्वानित्यत्वप्रतिपादकवाक्यमात्रमुपलभ्यते । नतुज्ञानफलानित्यत्वप्रतिपादकंवाक्यं । अत एवनियामकादुक्तसंभावनोत्पत्तिसंभवइतिषष्ठीकक्ष्येति । तदप्यसमंजसं । यद्यप्ययमन्योन्याश्रयोविशिष्टाद्वैतिभिरेवोक्तः । "केचित्तु नित्यानित्यवस्तुविवेकादीनिनब्रह्ममीमांसाधिकारिविशेषणानि । तेषांतत्साध्यत्वेनान्योन्याश्रयादिति फलज्ञानंसंभावनतमकंचेद्विवेकोपितथास्त्विति"चचंद्रिकोक्तेः । तथाप्युक्तादेवनिमित्तादत्रविचारेप्रवृत्तिः । तथाहि । भामतीरीत्यानित्यानित्यशब्दयोः सत्यानृतपरत्वंविवेकस्यनिश्चयरूपत्वंचांगीकृत्यतदानंतर्योक्तौब्रह्मैवसत्यमन्यदसत्यमितिविवेकस्यप्रागेवसिद्धौ तदर्थस्यसगुणनिर्गुणविवेकाखंडसमन्वयादेरनपेक्षणाद्विचारशास्त्रंव्यर्थं । सगुणनिर्गुणविवेकादिर्हिब्रह्मैकमेवसत्यमितिज्ञानाय । तद्यदिविचारात्प्रागेवासिद्धं तदातदर्थकसगुणादिविचारोव्यर्थएवस्यादिति । अस्तुवासफलस्तथाप्यन्योन्याश्रयोदुरुद्धरः । विचारोहि तात्पर्यावधारणाय तच्चज्ञेयनिश्चयाय ज्ञेयंच ब्रह्मैकमेवसत्यमन्यान्मिथ्येति । तच्चप्रागेवज्ञातमितितस्यज्ञानस्यविचारसाध्यत्वेपरस्पराधीनत्वप्राप्तेर्दुरपह्नवत्वात् । नहिश्रुतितात्पर्यधीःस्वरूपेणापेक्षिता किंतुज्ञेयनिश्चायकतया नचोक्तादन्यन्मुमुक्षुज्ञेयमस्तीति । किंच भामतीरीत्यासाधनचतुष्टयेपूर्वपूर्वस्योत्तरोत्तरहेतुत्वेमुमुक्षानंतर्यमेवाथशब्दार्थःस्यान्नचतुष्टयानंतर्यं । अन्यथा विवेकहेत्वानंतर्यमपितदर्थःस्यादि"तिचंद्रिकोक्तदूषणानांतावताप्यपरिहारएव । किंचब्रह्मज्ञानेआपाततोनंतस्थिरफलत्वसंभावनायाविचारहेतुत्वोक्तिरयुक्ता । तस्यब्रह्मज्ञानस्योपायत्वानिश्चयेअन्यस्यकर्मणोनुपायत्वनिश्चयेनततोनिवृत्तिमा

त्रसिद्धावपितदुपेयार्थिनस्तत्रनिःशंकमप्रवृत्तेः । तथाचोक्तसंभावनया ब्रह्मविचारेसशंकप्रवृत्तावपिननिःशंकप्रवृत्तिः । तस्यास्तथाविधफलहेतुत्वनिश्चयसाध्यत्वात् । तस्यचविचारमंतरेणासिद्धेरन्योन्यसंश्रयोदुरुद्धरएव । यच्च नित्यमनित्यंवेतिसंभावनाकारमभिलप्यतत्रनित्यत्वकोटेरुत्कटत्वं संभावनायाःसंशयत्वाक्रांतत्वाभावश्चेतिविकत्थनं । तदत्यंतायुक्तं । तथाहि । संशयोद्विविधः । निर्दिष्टकोटिकोऽनिर्दिष्टकोटिकश्चेति । तत्रनिर्दिष्टकोटिकोपिकोटिद्वयप्रधानोन्यतरकोटिप्रधानश्चेतिद्विविधः । तत्राद्यःस्थाणुर्वापुरुषोवेति । द्वितीयस्तुकिंसज्ञकोयंवृक्षइति । द्वितीयेप्याद्यःस्थाणुर्वापुरुषोवेति । द्वितीयस्तु अन्यतरकोटिप्रापकप्राचुर्यनिमित्तकोऽन्यतरकोटिप्रधानश्च । प्रायेणायंपुरुषइत्यादिरूपः । प्रधान्यंचाभिलापकशब्देअसाधारणरूपेणनिर्देशःअन्यतरकोटेरेवासाधारणरूपेणोल्लेखश्चेतिपरीक्षकैर्निर्णीतत्वेनप्रकृते असाधारणरूपेणकोटिद्वयमुल्लिखतोज्ञानस्यान्यतरकोटिप्रधानकसंभावनारूपत्वोक्तेरनुपपन्नत्वात् । अन्यथा स्थाणुर्वापुरुषोवेत्यादेरपिसंभावनात्मकत्वापत्तेः । उत्कटत्वस्यजातित्वेपिअन्यतरकोटि प्रापकप्राचुर्यनिमित्तकासाधारणरूपोपरक्तोल्लेखस्यतद्व्यंजकत्वेनकोटिद्वयस्यसमप्रधानतयोल्लेखअन्यतरकोटावुत्कटत्वस्यदुर्ज्ञेयत्वादतिप्रसंगाच्च । आपातजसंभावनायांनिश्चयत्वस्यभवतानंगीकृतत्वेनांगीकर्तुमुक्तरीत्याअशक्यत्वाच्च । तत्रसंशयत्वस्यावश्यकत्वात् । अन्यथाज्ञानत्वाभावापातात् । "अयमेवसंशयःकल्पनालाघवसंज्ञकतर्केणोत्कटैककोटिकतामुपनीतःसंभावनानामा ननिर्णय"इतिकल्पतरूक्तेश्च । भवदीयग्रंथेषुतत्रतत्रैवमेवोपपादितत्वाच्चेति । यदपि । ज्ञानकांडइत्यादि· तदप्ययुक्तं । ज्ञानफलेअनित्यत्वप्रतिपादकवाक्याभावमात्रेणतत्रानित्यत्वकोटेरुत्कटत्वे कर्मफलेनित्यत्वप्रतिपादकवाक्यस्यसत्वात्तत्रानित्यत्वकोटेरुत्कटत्वंनस्यात् । भव

दुक्तस्यतद्विरुद्धकोटिग्राहकवाक्याभावरूपप्रयोजकस्याभावात् । किंचज्ञान कांडेकर्मकांडेवाज्ञानफलानित्यत्वप्रतिपादकवाक्यस्याभावेनानित्यत्वकोटिग्राह कस्यैवाभावात्कथमनुत्कटत्वेनाप्यनित्यत्वकोटिभानं । यदिकर्मकांडेकर्मफल नित्यत्वप्रतिपादनात् ज्ञानफलमेवनित्यमित्यवधारणायोगादधीतिकांडद्वयस्यभ वतिसंभावनातादृशीत्युच्यते तर्हिअधीतकांडद्वयस्यवाधीतकर्मकांडमात्रस्यवो भयविधवाक्यदर्शनेनविशेषमपश्यतोभवत्येवतादृशीसंभावनेतिकथमयंविशेषः । ततश्चोक्तसंभावनोत्पत्तौनियामकाभावःसुस्थएव । तस्मात्कक्ष्याक्रमस्यबाल जनव्यामोहकमात्रत्वात्परोक्तमयुक्तमितिसिद्धं ॥ ३६ ॥

यदपि । तितिक्षांसन्यासरूपांवदंतिविवरणाचार्याः । सचसन्यासः उपनीतवदनुपनीतस्यापिसंभवति । "यदहरेवविरजेत्तदहरेवप्रव्रजेदि"ति श्रुत्यावैराग्यमात्रस्यसन्यासंप्रति हेतुत्वावगमेनवैराग्यकालव्यतिरिक्तस्यसर्वस्या पिनिषेधेनोपनयनादेरपिनिषिद्धत्वात् । अनुपनीतस्यारण्यकाध्ययनसंभवात् । विप्रमात्राधिकारित्वान्नशूद्रस्याधिकारइति । तदप्ययुक्तं । "अष्टवर्षंब्राह्मण मुपनयीततमध्यायीतेति" श्रुत्योपनयनस्याध्ययनार्थत्वावगमात् अध्ययनसामा न्यस्याप्युनयनसापेक्षत्वप्राप्त्याआरण्यकस्यानुपनीतेनाप्यध्येतव्यत्वेविशेषप्रमा णाभावेनचाध्ययनहीनस्यातएवानुपनीतस्यप्रणवमंत्रादि मंत्रजपानधिकारात् । देवपूजातपोव्याख्यानाद्यनधिकाराच्च । "यदहरेवेति" श्रुतिस्थैवकारेणविप्रत्वादे रपिनिषेधापत्त्यावैराग्यकालातिरिक्तसर्वनिषेधकत्वोक्तेरयुक्तत्वात् । वैराग्या तिरिक्तस्योचिताभयदान कर्तव्यविशेषप्रतिज्ञा पित्रादिपालकांतरकल्पनातत्रेष्ट साधनतानिश्चयादिरूपवैराग्यातिरिक्तबहुसामग्री सापेक्षत्वेनसन्यासस्यवैराग्येत रनिरपेक्षत्वासंभवात् । विप्रमात्राधिकारित्वस्यैवोपनीतमात्राधिकारि कत्वस्यापिप्रमितत्वाच्चेति । तस्यात्परोक्तमयुक्तमितिसिद्धं ॥ ३७ ॥

यदपि । ब्रह्मणोजिज्ञासेतिशेषेषष्ठीनतुकर्मणीतिप्रथमाकक्ष्या षष्ठी कर्मण्येवोचितेतिद्वितीयाकक्ष्येत्यादि । तदपिनयुक्तं । भवन्मतेब्रह्मणः विचारजन्यशास्त्राधीनापरोक्षवृत्तिविषयत्वेफलव्याप्यत्वापातेनविचारजन्यज्ञाना विषयत्वात् । ततएवविचारकर्मत्वायोगेनकर्मणिषष्ठीपरिग्रहस्यायुक्तत्वा दिति । तस्मात्परोक्तंकक्ष्यादिकमप्ययुक्तमितिसिद्धं ॥ ३८ ॥

यदपि । केनचिदंशेनकेनचिद्धर्मेणवाज्ञातेअंशांतरेणधर्मांतरेण चाज्ञातेखलुजिज्ञासासंभवति । निरंशेनिर्विशेषेचब्रह्मणिकथंजिज्ञासासंभ वेत् । तथाचतस्मिन्जिज्ञासूत्रमसंगतमितिप्रथमाकक्ष्या । यद्विषयकंज्ञा नंसंशयरूपंजायतेतन्निर्णयायतस्मिन्जिज्ञासेत्याभाणकःसंशयत्वंचसंदिहानीत्य नुभवसिद्धविषयिताविशेषः । निर्विकल्पकसविकल्पकसाधारणः । साक्षात्करोमीत्याद्यनुव्यवसायसिद्धविषयिताविशेषरूपप्रत्यक्षत्वादिवत् । नच प्रमात्वादीनामन्यादृशत्वप्रतिपादकविवरणादिविरोधः । तदुक्तेर्मतांत रानुवादत्वात् । ननुसंशत्वस्यविरुद्धानेकप्रकारकैकविशेष्यकज्ञानत्वरूपत्व मेवास्त्वितिचेन्न । मनोरूपेंद्रियायोग्यानंतवस्तुघटितत्वेनेंद्रियजन्यज्ञानत्वा दिरूपप्रत्यक्षत्वादीनांसाक्षात्करोमीत्यादिमानसप्रत्यक्षात्मकसार्वजनिनानुभवारो हासंभवात् । तथाच"केवलोनिर्गुणश्च यस्यामतंतस्यमतं तदेवब्रह्मत्वंवि द्धिनेदंयदिदमुपासते नात्रकाचनभिदास्ति एकधैवानुद्रष्टव्य"मित्यादिभिःसर्वध र्मनिषेधकैरुपनिषद्वाक्यै र्निर्विशेषविषयकंनिर्विकल्पकंसंशयापरनामधेयंआपात ज्ञानंयस्यजायते तस्यतन्निर्णयायतज्जिज्ञासाजायतइतितमुपलभमानोभगवान थातोब्रह्मजिज्ञासेतिसूत्रयामास। उक्तवाक्यजन्यनिर्विकल्पकज्ञानस्यसंशयरूप त्वेतादृशज्ञज्ञानोत्तरंसंदिहानीत्यनुव्यवसायएवप्रमाणं । यस्यतुपुरुषधौरेयस्यो दाहृतोपनिषद्वाक्यैरनापातापरनामधेयंनिश्चयरूपंज्ञानमेवप्रथमंजायते नतस्य

जिज्ञासाशास्त्रेऽधिकारः । निश्चयत्वंच निश्चिनोमीत्यनुव्यवसायसिद्धविषयिताविशेषएव । यद्यप्युक्तवाक्यजन्यंसंशयज्ञानंनिश्चयज्ञानंचनिर्विशेषब्रह्ममात्रविषयकंनिर्विकल्पकमेव । तथापिविषयैक्येपितयोर्ज्ञानयोःब्रह्मनिरूपिताविषयिताविलक्षणैव । संदिहानिनिश्चिनोमीत्यनुव्यवसायात्मकफलवैलक्षण्यात् । अनंताचार्येणस्वावछिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावछेदकत्वस्वसामानाधिकरण्योभयसंबंधेनविषयताविशिष्टविषयतासंशयत्वमित्युक्तं । तन्न । अतींद्रियानेकपदार्थघटितत्वेनसंदेह्मीत्यनुव्यवसायप्रत्यक्षविषयत्वानुपपत्तेरितिद्वितीयाकक्ष्या । भवदभिमतंसंशयज्ञानंशब्दान्नोत्पत्तुमर्हतिसंशयस्यप्रत्यक्षरूपत्वादितितृतीया । शाब्देसंशयत्वामानुभाविकं । ततएव विप्रतिपत्तिवाक्यात्संशयमाहुरितिचतुर्थी । शाब्दबोधेतात्पर्यनिर्णयस्यहेतुत्वात्तात्पर्यनिर्णयजन्यज्ञानस्यकथंसंशयत्वमितिपंचमी । तात्पर्यनिर्णयस्यशाब्दनिश्चयत्वावछिन्नंप्रतिहेतुत्वेपिशाब्दत्वावछिन्नंप्रत्यहेतुत्वाच्छाब्दसंशयोत्पत्तिरितिषष्ठी । निर्विशेषस्यशब्दागोचरत्वाच्छब्दस्यताद्विषयकज्ञानजनकत्वाभावइतिसप्तमी । तस्यशब्दजन्यवृत्तिव्याप्यत्वंसिद्धमितिअष्टमीकक्ष्येति । तदप्यत्यंतायुक्तं । तथाहि । यत्तावदुक्तं । निर्विशेषेनिरंशेचब्रह्मणि संशयसंभवात्तन्निर्णयार्थीजिज्ञासासूत्रमिति । तन्न । ज्ञातंसमान्यतोऽज्ञातंविशेषेणविचार्यते । ज्ञाताज्ञातविभागस्तुनिर्विशेषेनयुज्यते । यद्धिधर्मानकेचन । ब्रह्मणोनैवजिज्ञास्यंजिज्ञासाधर्मनिर्णयः । इदमित्थमितिज्ञानंजिज्ञासायाःप्रयोजनमि त्याद्युक्तरीत्याधर्मिसमसत्ताकज्ञायमानसामान्याकारताद्दशाज्ञायमानविशेषाकारोभयवत्वव्याप्यत्वा ज्जिज्ञास्यत्वस्यव्यापकाभावेच व्याप्याभावावश्यंभावेननिर्विशेषेभवदभिमते पंचमाध्यायासिद्धेब्रह्मणिजिज्ञास्यत्वस्यायोगात् । ननुमाभूद्व्याप्यवत्वज्ञानप्रयुक्तव्यापकवत्वरूपज्ञानरूपाजि

ज्ञासा तथापिधर्मांतरनिवृत्त्याभ्रांतिप्रसक्तधर्मांतरनिवृत्तिज्ञानरूपाजिज्ञासानिर्धर्मकेपिस्यादितिचेन्न । निराधारस्यकस्यचिद्धर्मस्यनिवृत्त्यानिराधारधर्मांतरनिवृत्तिरनुमातुमशक्येतिब्रह्मनिष्ठैयेवब्रह्मनिष्ठासानुमातव्येतिनिर्धर्मकत्वेव्यावृत्तत्वस्यैवायोगात् । किंचधर्मिज्ञानसाध्यसंदेहाधीनविचारजन्यज्ञानस्यसंशयहेतुधर्मिज्ञानागृहीतप्रकारविशेषग्राहिणएवसंशयविरोधित्वेनानिर्विशेषेचानिवर्तनीयतयाविचारांगसंदेहनिवर्तकैकतरकोटयवलंबिसप्रकारकज्ञानजनकतादृशविचारविषयत्वमेवदुर्लभं । वस्तुतस्तु । निर्गुणस्वरूपस्यैवासिद्धत्वान्नतस्यजिज्ञास्यत्वं । तथाहि । केनचिच्छब्देनवाच्यस्यैवशब्दप्रमाणविषयत्वेनसर्वथाअवाच्येनिर्गुणेव्याघातादिनाशब्दप्रमाणेनज्ञेयत्वस्यांगीकर्तुमशक्यत्वादवाच्याज्ञेयनिर्गुणमप्रमाणिकमेव । स्वतःसिद्धेचलक्षणायाःसवितरिदीपस्येवाप्रयोजनत्वात् । विपरीताकारव्यावृत्तेश्चतद्विरोध्याकारांतरासमर्पणेअयोगात् । वैयर्थ्येनवेदांतानांतत्रलक्षणिकत्वासंभवाच्च । किंच निर्विशेषेकिंमानं । नचतत्स्वतःसिद्धं । अज्ञानाविरोधिन्याःस्वतःसिद्धेर्घटादावपिसुवचत्वात् । शास्त्रवैयर्थ्यात् । तत्रविप्रतिपत्त्ययोगाच्च । नचप्रत्यक्षं । अपसिद्धांतात् । "नेंद्रियाणीति" श्रुतेश्च । अतएवनानुमानं । व्याप्त्याव्यापकतावच्छेदकविशिष्टत्वेन पक्षधर्मतयाचपक्षसंसृष्टतयासिद्धेः । नापिपदरूपःशब्दः । गुणक्रियाजातिरूपनिमित्ताभावेनमुख्यवृत्त्ययोगात् । वैदिकशब्दस्यडित्थादिशब्दवत्सांकेतिकत्वायोगात् । आरोपितनिमित्तविशिष्टविषयकप्रतीतेश्चनिर्विशेषेप्रमाण्यायोगाच्च । गौण्याश्चमुख्यार्थगुणयुक्ततयैवस्वार्थोपस्थापकत्वात् । लक्षणायाश्चशक्यार्थसंबंधितावच्छेदकरूपवत्तयैवार्थोपस्थापकत्वात् । पदस्यान्वयितावच्छेदकरूपेणैवस्वार्थोपस्थापकतयानिर्विशेषेवृत्तिमात्रायोगाच्च । अतएवनोपनिषद्रूपःशब्दःतत्रमानं । चिन्मात्रस्यासंसर्गरूपत्वात् । गुण

प्रधानभावेनान्योन्यान्वयस्यैववाक्यार्थत्वात् । धर्मिज्ञानार्थनिविचारजन्यं निर्धारितेकक्कोष्ठवलंविसप्रकारकानिश्चयंप्रत्येवतस्योपनिषद्रूपशब्दस्यहेतुत्वा च निर्गुणविषयकज्ञानस्यनिष्प्राकारकत्वेतेननिर्विशेषत्वासिध्यातत्सिद्ध्यर्थमेवावि शेषविषयकत्वस्यावश्यकत्वाच्चेति । किंचश्रुतिसूत्रयोःसमानविषयत्वात् । श्रुतिसामान्यस्यापिसगुणविषयकत्वात् । सगुणमेवजिज्ञास्यं । "सर्वोत्क र्षेदेवदेवस्यविष्णोर्महातात्पर्यंनैवचान्यत्रसत्यं । अवांतरंतत्परत्वंतदन्यत्सर्वा गमानांपरमार्थ" इत्यादौ "नामानिसर्वाणियमाविशंतितंवैविष्णु"मितिश्रुतौ "वे दैश्चसर्वैरहमेववेद्यः नारायणपरावेदाः विष्णुःसर्वत्रगीयत" इत्यादिस्मृतौचसगु णस्यैवनिखिलशास्त्रवेद्यत्वोक्तेः । "बृहंतोह्यस्मिन्गुणाः परास्यशक्तिर्विविधैवश्रूय ते सत्यकामः यःसर्वज्ञः मप्यनंतगुणेनंते" इत्यादिश्रुतिस्मृतिभिः ब्रह्म स्वज्ञा नाबाध्यप्रकारकप्रमाविशेष्यं संदिग्धत्वात् विचार्यत्वात् स्थाण्वादिवत् ब्रह्म वे दांतगोचरप्रकारवत् वेदांतविचारविषयत्वात् कर्मकांडविचारविषयधर्मवत् । इत्याद्यनुमानैश्चगुणानांप्रमितत्वाच्च । नचसगुणश्रुतिरपरब्रह्मपरा । सगु णातिरिक्तस्यपरस्याद्याप्यसिद्धेः । त्वत्पक्षेपितात्विकगुणवद्व्यक्त्यंतराभा वाच्च । "परःपराणां मत्तःपरतरंनान्य"दित्यादौचसगुणस्यैवपरात्परत्वोक्तेः । अन्यथा"सदेवसोम्येदमग्रआसीत् असदेवेदमग्रआसीदि"तिश्रुतीअपिपरापर ब्रह्मपरेस्यातां । नचेदानींसगुणं दशांतरेतुनिर्गुणमितिवाच्यं । "ज्ञानं नित्यंक्रियानित्या एषनित्योमहिमेत्या"दिश्रुतेः । साचश्रुतिःपूर्वत्र"नावेद विन्मनुत"इतिब्रह्मणःप्रकृतत्वात् उत्तरत्र"नकर्मणावर्धत"इतिब्रह्मलिंगश्रवणाच्च ब्रह्मपरा । नचौपाधिकाधर्माः । श्रुत्यप्रामाण्यापातात् । वक्ष्यमाणसत्य त्वश्रुतिविरोधात्नित्यत्वश्रुतिविरोधात् । अंतःकरणादिरूपोपाधिसृष्टेःप्रागे वेक्षितृत्वादिश्रुतेश्च । नचातात्विकाःगुणाः । नित्यत्वोक्तिसामार्थ्यात्

विषयाबाधलक्षणप्रामाण्यस्यौत्सर्गिकत्वात् "सत्यःसोअस्यमहिमेत्या"दिश्रुते श्च । अन्यथाब्रह्मसत्वादेरप्यतात्विकत्वापातात् । नचनिर्गुणश्रुतिविरो धात्सगुणश्रुतिरतात्विकविषयेतियुक्तं । "कोहिमीमांसकोब्रूतेविरोधेशास्त्रयो र्मिथः । एकंप्रमाणमितरत्वप्रमाणंभवेदि"तितस्यनिषिद्धत्वात् । "विका रशब्दान्नेतिचेन्न उपदेशभेदान्नेतिचेन्न गौण्यसंभवादि"त्यादौशास्त्रयोर्विरोधे तात्विकार्थांतरपरत्वस्योक्तेरारोपितार्थत्वस्यानुक्तेश्च । अन्यथेक्षत्याद्यधिकर णेसिद्धांतसाधकेक्षणादीनांप्रधानादावारोपसंभवेनसिद्धांतानुदयप्रसंगात् । श्रुत्युक्तस्याक्षितत्स्यवाश्रुत्यानिषेधायोगात् । अन्यथाश्रुतेरुन्मत्तवाक्यत्वा पत्तेः । व्यावहारिकगुणपरत्वेचदीर्घभ्रांतिहेतुत्वेनरज्जुसर्पादिज्ञानादप्यधि काप्रामाण्यापाताच्च । किंच "एषसर्वेश्वर"इत्यादिनासगुणस्यधर्मानुक्त्वा तमेतंवेदानुवचनेनविविदिषंतीति"मुमुक्षुज्ञेयत्वोक्तेः । "यःसर्वज्ञ"इत्यादौप रिपश्यंतिधीराइतिअपरोक्षज्ञानविषयत्वोक्तेः । नारायणंमहाज्ञेयमिति"मु मुक्षुज्ञेयत्वोक्तेः । "तमेवंविद्वानमृत"इत्यादौमोक्षजनकज्ञानविषयत्वोक्तेः । "तुरीयंतत्सर्वदृक्सदेति"मोक्षेपिसार्वज्ञश्रवणाच्चनापरब्रह्मपरता । "सत्यः सोअस्यमहिमे"तिमाक्षात्सत्यत्वोक्तेश्च । नचोपासनार्थत्वेनातात्विकविषय तेतियुक्तं । "उपासनायाःकार्यत्वेविष्णोरात्मत्वएवच । उभयत्रापितात्प र्यमात्मोपासादिकेबिधाविति"स्मृतेः । अन्यथोपासनायाअनर्थहेतुत्वात् । "असत्यान्यनुपास्यानीति"संकर्षणसूत्रेनिषिद्धत्वाच्च । ब्रह्मसत्यत्वश्रुतेरपितदा पाताच्च । "मामेवयेप्रपद्यंतेमायामेतांतरंतिते । योमामशेषदोषोज्झंगुणस र्वस्वबृंहितं । जानात्यस्मैप्रसन्नोहंदद्यांमुक्तिंनचान्यथा । तमेवंविदित्वा तिमृत्युमेती"त्यादौसगुणज्ञानादेवमोक्षोक्तेः । नचेयंमुक्तिरवांतरा । "पुण्य पापेविधूयेति"सर्वकर्मनिवृत्युक्तेः । "मायामेतांतरंतिते"इतिमायानिरसनोक्तेः ।

"सर्गेपिनोपजायंतइति नसपुनरावर्तत"इतिनित्यत्वोक्तेश्च । अन्यथा"असन्नेवसभवतीति"श्रुत्युक्ताशून्यतापत्तिरेवपरममुक्तिरितिस्यात् । प्राप्त्यभावे नानुवादकत्ववचनमप्ययुक्तं । किंच"साक्षीचेता"इतिवाक्यात्पूर्वंश्वेताश्वतरोपनिषदि "अनाद्यनंतंसलिलस्यमध्येविश्वस्यस्रष्टारमनेकरूपं । विश्वस्यैकंपरिवेष्टितारंज्ञात्वादेवंमुच्यतेसर्वपाशैरि" त्यादिनावहवोगुणास्तज्ज्ञानान्मुक्तिश्चोक्ता । उत्तरत्रच"एकोवशीनिष्क्रियाणांबहूनामेकंरूपंबहुधायःकरोति । तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषामि"तिवहवो गुणा स्तज्ज्ञानान्मोक्षश्चोक्तः। तस्मात्तन्मध्यपतितंनिर्गुणवाक्यमपिउपांशुयाजन्यायेनतदनुगुणंनेयं । किंचनिर्गुणशब्देननगुणमात्रनिषेधोयुक्तः । निर्गुणत्वरूपविशेषभावाभावाभ्यांमूकोहमितिवत्स्वव्याघातात् । यदिनिर्गुणत्वरूपोविशेषोप्यनेनैवनिषिध्यतेतर्हीयमपिवचनक्रियामूकशब्देनैवनिषिध्यतइतिसमं । तदुक्तं । "निर्विशेषत्वमेतेनमूकोहमितिवद्भवे"दिति । एवंच "उपक्रमादिन्यायेनश्रुतिलिंगनयात्तथा । विशेषसामान्यनयान्न्यायान्निरवकाशतः । बाहुल्यन्यायतश्चोपजीव्यत्वन्यायतस्तथा । पशुच्छागनयाच्चैवसविशेषनयात्तथा । उपांशुयाजन्यायेनयुक्तायुक्तनयात्तथा । आद्दतत्वात्सूत्रकृताप्रबलासगुणश्रुतिः" । ततश्चतदविरोधेनहेयगुणनिषेधपरानिर्गुणश्रुतिरितिसिद्धं । कारिकासंगृहीतन्यायविवरणंतुन्यायामृतेद्रष्टव्यं । किंचधर्मारोपार्थमपिकेचिद्धर्माःधर्मिसमसत्ताकाःस्वीकार्याः । "धर्मारोपोपिसामान्यधर्मादीनांहिदर्शने । सर्वधर्मविहीनस्यधर्मारोपःक्वदृश्यत"इत्युक्तदिशावस्तुतोइदंत्वादिनाज्ञातएवान्यारोपदर्शनादिति । तदुक्तं । "यथात्रिगुणशून्यत्वाद्गुणपूर्णोपिनिर्गुणः । ज्ञानादिगुणशून्यत्वंचेतनस्यनहिक्वचित् । अतोनिर्गुणवाक्यार्थोनसर्वगुणशून्यता । तस्माद्विष्णोर्गुणाःसर्वेनित्याःसत्याश्चसर्वदा ।

अनंतश्रुतिसद्युक्तिसिद्धाश्चेत्यतिमंगलं । सत्यत्वरहितंब्रह्ममिथ्यैवस्याद्धटादिवत् । नचेच्छशविषाणंचसद्रूपंब्रह्मवद्भवेत् । किंचनिर्गुणतावाक्येगुणमात्रनिषेधने । ज्ञानानंदाद्यभिमतगुणानांस्यान्निषेध्यता । यद्यभिन्नंसुखंज्ञानंगुणाःसर्वेप्यभेदिनः । संतुनेहेतिवाक्यस्यभयाद्भंगताहरेः । मानसिद्धानुवादेतुतैनैवस्युर्गुणाहरेः । ननिषेधश्श्रुतेमानामानतादूषणंश्रुणु । निर्गुणत्वेस्थिरेतेनमानानांस्यादमानता । तत्सत्वेचाविरुद्धंतोनिर्गुणत्वंस्थिरंभवेत् । कन्यकानुदरेत्युक्तेकाष्टेसंयोजयंतिकिं । अशोभनगुणानेवनिषेधतिनशोभनान् । अप्रधानंजगदिदंसृष्टौयस्माद्विनिर्गतं । सनिर्गुणोहरिःसर्वस्त्रष्टुत्वाख्यमहागुणः । अपिचैकत्वधर्मस्यसत्वेभावगणोस्तिते । तदभावेगतंशास्त्रमैक्यमेकत्वमेवयत् । सुंदोपसुंदन्यायेननिर्गणैक्यश्रुतीमिथः । विरोधेनहतेकुर्यान्मायामततिलोत्तमा । इत्याद्यालोच्यनैर्गण्यश्रुतिरैक्यश्रुतिंसखीं । आदायभारतीप्राणनाथंशरणमीयुषी । स्वमिथ्यत्वभयाभावात्तदुक्तार्थेप्रवर्तत । किंचसंकोचमार्गेणपलायनपरांश्रुतिं । प्रबलानंतसगुणश्रुतिःकोणेक्वचित्क्षिपेत् । ततोनिर्गुणवाक्यंनस्वोपजीव्यस्यबाधकं । तस्माच्छाब्दत्वबोध्यत्वधर्मित्वादिगुणानुगा । एकत्रछिन्नधारेणकुठारेणापरंवने । तज्जातीयंकथंछिंद्यामंदाशंकितदुर्गुणान् । छिनझिमंदधरापीत्यगान्निर्गुणवाग्बहिः । मृषाचेन्निर्गुणत्वंस्यात्सगुणत्वश्रुतेर्बलात् । सत्यासगुणतातर्हिसिद्धयेदद्वैतवत्तव । कपिंजलाधिकरणन्यायानुसरणादपि । अनंतसुगुणच्छेदात्त्रिगुणछेदनंवरं । किंचनिर्गुणतांस्वार्थंक्षिपंतींसगुणश्रुतिः । अबाध्यस्वार्थवर्गेणकपोलेताडयिष्यति । नैर्गुण्येनैवगुणितानैर्गुण्यंचनचेन्नतौ । सगुणत्वंस्थिरीकृत्यविरुद्धार्थत्वकारकौ । किंचनिर्गुणशब्देनलक्ष्यंचेन्निर्गुणंकथं । वाच्यत्वंनपरोवक्ति । नमृषानिर्गुणत्वंचेन्निर्गुणत्वश्रुतिर्गता । तेनैवसगु

णत्वात्पेर्भावमात्रनिषेधने । अन्योन्याभावभेदस्यपद्दबंधोभविष्यति । वाच्य त्वेनैवगुणितावाच्यत्वेनिर्गुणोक्तितः । लक्ष्यत्वेनैवगुणितालक्ष्यत्वेनिर्गुणोक्तितः । नोभयंचेदशाब्दत्वधर्मेणस्याद्धिधर्मिता । एवंचनिर्गुणंब्रह्मनिर्गुणादिश्रुतेरपि । उक्तरीत्यावहिर्भूतमश्रौतमभवद्धृवं । श्रुतिस्त्रीसंगशून्यंतद्ब्रह्मभिक्षुरभूत्तव । असद्ब्रह्माप्रतिद्वंद्वंसर्वमानमनोरमं । अनंतसुगुणस्तोममुखेनपरितोदिशं । अपारोपनिषन्नारीमुखान्याचुंब्यजृंभते । पूर्वाद्भारतवाक्याच्चपराद्भागवतोदितात् । स्पष्टगीतोक्तितःसर्ववेदार्थोविष्णुरेवहि । वेदमध्यगतानिर्गुणोक्तिरप्याहतंप्रभुं । निर्गुणोनिष्क्रियोनंतोऽभयोऽचिंत्योऽचलोऽच्युतः । इतिविष्णोर्दिव्यनामसहस्रेपठनादपि । श्रुत्याख्याराजकन्यायत्सर्वास्मृतिसखीवशा । अतस्तदुक्तमार्गेणसाव्रजेन्नत्वदुक्तितः । किंचाखंडार्थवादंतेस्वरवाक्यंपदानिच । यत्रस्वार्थविशिष्टार्थपरंनैवहिकिंचन । तस्मादैक्यंनैवसिद्ध्येन्निर्गणत्वादिकंचते । इत्थंब्रह्मनशनेनैवश्रुतीस्त्वंतुजिघांससि । सत्यंकदशनेनापिनित्यासावाग्जिजीविषेत् । समस्तधर्मशून्यंतन्निर्गुणंकुत्रकथ्यते । अतःश्रौतात्मधर्माणांबाधोप्येषनलौकिकः । ब्रह्मायंगुणपूर्णत्वात्परमश्चोत्तमत्वतः । तन्निर्गुणंचपरमंब्रह्मनारायणःसदा । नचतद्गुणामिथ्यात्वान्निर्गणावसरस्तव । नित्यस्यब्रह्मवन्मिथ्यात्वस्यैवानुपपत्तितः । सत्यःसोअस्यमहिमेत्याहतत्सत्यतांचवाक् । अतस्तन्निर्गणोक्तिश्चत्रिगुणानांविमोचिका । नित्यःसत्यश्चमहिमाकथंतद्भासतामियात् । नत्वापरशुनाछिन्नेपदेत्वांनानुयातिसा । गुणसत्यत्वनित्यत्वकारूत्तेजितमूर्तिना । अतःश्रुत्यर्थमीमांसानिपुणानांविवेकिनां । मतेनारायणोदेवःपरंब्रह्मनचापर इति । तस्मात् । "ब्रूतेऽसतोपिमोहादीन्दोषान्विष्णोर्गुणान्सतः । निह्नुतेपरमेतत्वेद्वेषादेवासुरोजनः" । तस्माच्छास्त्रेणजिज्ञास्यमस्मदीयंगुणार्णवं । वासु

देवाख्यामद्वंद्वंपरंब्रह्माखिलोत्तममिति"सिद्धं । यदपि संशयत्वस्यनिर्विकल्प कसाधारणत्वं तत्तुच्छं । अव्यवस्थितकोटिकस्यधर्मिज्ञानविशेषादर्शन कोटि स्मरणसाधारणधर्मदर्शनादिसामग्रीजन्यस्यसंशयस्यनिर्विकल्पकरूपताया स्त्वदन्येनकेनापिविवेकिनातांत्रिकेणानंगीकृत्वेनाप्रामाणिकत्वात् । अन्यथा तस्यकदाप्यनिवृत्त्यापातात् । किंच "ईक्षतिनये तत्रसंदिह्यते तज्जगदुपादानं किंचेतनमुताचेतनमिति । आनंदमयनये । तत्रसंशयःकिमिहानंदमयश ब्देनपरंब्रह्मोच्यते उतार्थांतरमिति । अंतरितिनये । तत्रसंशयःवि द्याकर्मातिशयवशात्प्राप्तातिशयःकश्चित्संसारीसूर्यमंडलेश्रूयते । किंवापरमा त्मेति । आकाशनये तत्रसंशयःआकाशशब्देनकिंपरंब्रह्माभिधीयते उतभूताकाशमिति । ज्योतिर्नये तत्रसंशयःज्योतिःशब्देनकिमादित्यादिज्योति रभिधीयते उतपरमात्मेति । प्राणनये तत्रसंशयः । किमिहप्राणशब्देन वायुमात्रमभिधीयते । उतदेवतात्मा । उतजीवः । अथवापरंब्रह्मेती त्या"दित्वदीयभाष्ये । "अत्रचवादिनांविप्रतिपत्तेःविशेषादर्शनेचसतिसंशय" इत्यादिभामत्यांचसर्वत्रविरुद्धकोटिकधर्मिज्ञानाधीनवादिविवादादिसामग्रीजन्य विशेषादर्शनप्रयोज्यज्ञानस्यैवसंशयत्वोक्तेः । पूर्वोत्तरपक्षयोःसंशयीयकोटि द्वयान्यतरकोट्यवलंबित्वस्यसर्वमीमांसकसंमतत्वात् । संशयस्यविचारसा ध्यनिश्चयव्यावर्तनीयकोट्यनालिंगितत्वेतेननिवृत्त्ययोगाच्च । आपातसिद्धेत्वं पदार्थेतत्पदार्थेचके चिदित्यादिनावादिविप्रतिपत्त्यांसंदेहस्यत्वदीयभाष्येकथना च्चनसंशयस्यनिष्प्रकारकत्वरूपंनिर्विकल्पकत्वंयुक्तं । यच्च केवलइत्यादिवेदां तवाक्यैर्निर्विकल्पकज्ञानोदयइति । तदप्ययुक्तं । पूर्वोत्तरसगुणवाक्या नुरोधेनकेवलपदस्य"सभवान्केवलोहरे"इत्यादिप्रमाणानुसारेणसर्वोत्तमत्वरूपकै वल्यप्रकारकज्ञानजनकत्वात् । निर्गुणशब्दस्यापिनिर्दोषशब्दवत्निर्गुणत्वा

दिधर्मप्रकारकज्ञानजनकतायाःनिर्विशेषशब्देनमूकोहमितिवत्स्वक्रियाविरोधेन विशेषाभावरूपविशेषस्यापिनिषेद्धुमशक्यत्वात्भावाभावाभ्यांव्याघाताच्चेत्युक्त दिशासमर्थितत्वात् । "यस्यामतमित्यस्ययेनसाकल्येनाविचारतंब्रह्मेतिनिश्चि तं तेनैवविचारितं तस्यब्रह्मापरिच्छिन्नत्वज्ञानित्वात् । साकल्येनब्रह्मविचार स्याशक्यत्वेनसाकल्येनमयाविचारितमितियोवेदतेनाविचारितंब्रह्मेत्यर्थकत्वेना परिच्छिन्नत्वादिप्रकारकप्रमातात्पर्यकत्वात् । "तदेवेत्यस्ययदिदंवस्तुउपासते ध्यायंतिनेदंब्रह्म । किंतुपुरुषोयद्वस्तुनमनुतेसाकल्येननजानातियेनवस्तुना मनोज्ञातमाहुःकवयस्तदेवब्रह्मेतिविद्धीत्यर्थः । इत्थंचास्यापिध्यानकालेचि त्तेयत्प्रतीयतेमानसवासनामयंब्रह्मणितद्भिन्नत्वजीवभिन्नत्वादिप्रकारकज्ञानज नकत्वात् । "नात्रेत्यादेर्ब्रह्मणिस्वरूपभेदनिषेधकत्वेनस्वरूपभेदाभावप्रकारक ज्ञानजनकत्वाच्च । नकेनापिवेदांतवाक्येनसर्वधर्मनिषेधोवा निर्विकल्पकज्ञा नोदयोवाभवतीति । किंच वाक्यद्वयविगानेनविप्रतिपत्तिंपश्यतःअप्रामाण्य शंकाकलंकिततत्तद्वाक्यार्थज्ञानजननद्वारासंशयोत्पत्तावपिशब्दात्स्वरसतःसंशय जननस्याप्रमाणिकत्वात् । वेदांतवाक्येनापाततःप्रतीतेब्रह्मणिश्रुतितात्पर्या ज्ञानेनवा वादिविप्रतिपत्यावा युक्त्याभासादिनावा सतिसंदेहेतन्निवर्हणाय विचारप्रवृत्तेस्त्वदीयभाष्यादौव्युत्पादितत्वाच्चनापातप्रतीतेःसंशयत्वं । वेदां तवाक्यैर्निर्विकल्पकसंशयोदयस्य तदुत्तरंसंदिहानीत्याद्यनुव्यवसायस्यचत्वद नुभवमात्रगोचरत्वेनाप्रामाणिकत्वात् । अन्यथाअयंघटएवेत्यादिज्ञानमपिसं शयःतदुत्पत्यनंतरंसंदिहानीतिममानुव्यवसायादितिभवादृशस्यकस्यचिन्मूर्ख स्यप्रलपेनतस्यापिसंशयत्वांगीकारापातात् । यद्यपिशक्तितात्पर्यसंशयादि नाशब्दोपिसंशयमुत्पादयति । तथापि सचसंशयःइदमदोवेत्यादिरूपःनतुप राभिमतनिर्विकल्पकरूपइतिनतेनसंतोष्टव्यंपरेणेति । किंचसाक्षिणःसाक्षा

ज्ज्ञानविषयकत्वात् तत्रचघटमहंजानामि अत्रेदानींघटः सुराभिश्चंदनखंडःसोयंदेवदत्त इत्यादौघटादेरिवसंशयत्वघटकपदार्थेषुसाक्ष्ययोग्यपदार्थांतर्भावितात्पर्येपितत्रतस्यमानांतरोपनीतस्योपनीतमर्यादयाभानसंभवेनसंशयत्वस्यविरुद्धोभयकोटिकज्ञानत्वरूपत्वेपिप्रत्यक्षानुव्यवसायविषयत्वोपपत्यातस्याप्रत्यक्षत्वोपपादनमप्ययुक्तमेव। पुरुषधौरेयस्येत्युक्तिरपि भावंतुबादरायणोस्तिहीतिसूत्रेज्ञानिनामपिदेवानांमध्वादिविद्यास्वधिकारस्योक्तत्वेनभवदभिमतपुरुषधौरेयस्यापिनिश्चयात्मकापातप्रतीतिमतःवेदेषुपरस्परंविरोधप्रतीतेरेकवाक्यत्वसिद्धयेतात्पर्येअवश्यंनिश्चेय्येउपक्रमादिरूपतात्पर्य निर्णायकन्यायानुसंधानरूपविचारस्यावश्यकतयान्यायानुसंधानार्थंतादृशन्यायव्युत्पादकविचारशास्त्राधिकारस्यावर्जनीयत्वात्। मंदाधिकारिकत्वापातेन "एवंविधानिसूत्राणिकृत्वाव्यासोमहायशाः। ब्रह्मरुद्रादिदेवेषुमनुष्यपितृपक्षिषु । ज्ञानंसंस्थाप्यभगवानि"त्यादिप्रमाणविरोधात्। सूत्रकृतैवनिषिद्धत्वाच्चायुक्तेति। किंच धर्मिस्वरूपमात्रविषयकयोर्निर्विकल्पकयोर्द्वयोर्मध्येएकस्यसंशयरूपत्वं अन्यस्यनिश्चयरूपत्वंविरोधिविषयिताविशेषाभावेपिनिवर्त्यनिवर्तकभावःवेदांतान्निर्विकल्पकज्ञानोदयः तदनंतरंसंदेह्मिनिश्चिनोमीत्याद्यनुव्यवसायइत्यादेस्त्वदनुभवादन्येनावेद्यस्योन्मत्तेनापिशंकितुमशक्यत्वादुक्तकुकल्पनाप्ययुक्तैव। धर्मिज्ञानाधीनाव्यवस्थितकोटिकज्ञानस्यैवसंशयत्वात्। विचारजन्याविरोधिविषयितावतःसप्रकारकज्ञानस्यैवसंशयनिवर्तकत्वात्। मानांतरोपनीतस्यापिभानसंभवात्। प्रमाणसामान्यस्यापिसप्रकारकज्ञानजनकतायाव्यवस्थापितत्वात्। अन्यूनानतिरिक्तविषयकयोर्ज्ञानयोरन्यतरस्यसंदेहत्वमन्यतरस्यनिश्चयरूपत्वं निवर्त्यनिवर्तकभावश्चेत्यस्यात्यंतासंभावितत्वात्। इदमित्थमितिसप्रकारकज्ञानस्यैवजिज्ञासाफलत्वात्। विचारशास्त्रस्याज्ञमात्राधिकारिकत्वस्यसूत्रकृतैवनिषिद्धत्वात्। संश

यादेःप्रकारांतरेणलक्षणादिव्युत्पादक विवरणग्रंथादेरन्यथोपपत्तिकल्पनेनियाम काभावात् । त्वदीयभाष्यादिबहुग्रंथविरोधात् । त्वदुदाहृतश्रुत्यादेरर्थांतरपरतयासोपपत्तिकंन्यायामृतादौव्याख्यातत्वाच्चेति । तस्मान्नोक्तकुकल्पनायुक्तेतिसिद्धं । एतेनऐकशास्त्र्यवादइत्यारभ्यस्वरूपप्रकाशस्यावि रोधित्वादित्यंतंनिरस्तं । संदेहविषयकानुव्यवसायेसाक्ष्ययोग्यपदार्थस्याप्युपनीतमर्यादयाभानसंभवात् । निर्विशेषेइदमदोवेतिसंशयस्यइत्थमेवेतिविचारसाध्यनिर्णयस्यचायोगेनानंगीकृतत्वेनच जिज्ञासासूत्रस्यानुपपन्नतायादुर्निवारत्वात् । विप्रतिपत्तिदर्शनेनाप्रामाण्यशंकाकलंकिततत्तद्वाक्यार्थबोधद्वारा संशयजननेपिव्युत्पन्नस्यसाक्षादेवशब्दात्स्वरसरतःसंशस्याजायमानत्वात् । शक्तितात्पर्यसंशयादिनाशब्दात्संशयोत्पत्तावपितस्यसंशयस्येदमदोवेत्यादिरूपत्वेनत्वदभिमतनिर्विकल्पकसंशयोत्पादस्याप्रामाणिकत्वात् । संशयनिश्चय साधारणरूपेणशाब्दज्ञानत्वावच्छिन्नंप्रतितेनरूपेणतात्पर्यज्ञानस्यहेतुतायानिष्प्रत्यूहत्वात् । निर्विशेषस्यशास्त्रजन्यापरोक्षवृत्तिविषयत्वस्यफलव्याप्यत्वापातेनायोगात् । सुखादावज्ञानप्रसंगवारणायस्वरूपप्रकाशस्याज्ञानविरोधित्वस्यसमर्थितत्वेनसंशयादिनिवर्तकत्वप्राप्त्यातदविरोधित्वस्यायुक्तत्वात् । निर्विकल्पकवृत्तेःसंदेहनिवर्तकतायादूषितत्वात् । तत्वतोऽसंदिग्धजीवाभिन्ने ब्रह्मणिकल्पिताताात्त्विकभेदमात्रेणतात्विकाभेदकार्यासंदिग्धत्वस्यातात्विकस्य तात्विककार्याविघातकत्वोक्त्यानिरस्तत्वात् । तत्पदार्थेप्रत्यगर्थभिन्नत्वाभिन्नत्वादिनासंशयस्यभामत्यांप्रदर्शितत्वेननिर्विकल्पकसंदेहस्यापसिद्धांतप्रसंगेनांगीकर्तुमशक्यत्वात् । जीवब्रह्माभेदस्यनिरस्तत्वाच्चेति ॥ ३९ ॥

यदपि । ब्रह्मजिज्ञासा धर्मजिज्ञासानिरूपितैकशास्त्रत्ववती तत्संगतार्थत्वात् । तद्व्याख्येयवेदव्याख्यानत्वात् । तदुद्देश्यफलोद्देश्यकप्रवृ

त्तिविषत्वात् । तदर्थतात्पर्यकतदुक्तंतदुक्तमित्यादिशैलीघटितत्वात् । धर्मजिज्ञासासंगततदध्यायपादादिवदितिकश्चित् । तन्न । आद्यहेतोर्ब्रह्ममीमांसाशास्त्रार्थप्रतिपादकाधुनिकश्लोकेव्यभिचारात् । तदुत्थाप्याकांक्षानिवर्तकत्वतन्निवर्तनीयाकांक्षोत्थापकत्वान्यतरवत्वेसतिएकार्थत्वमेकशास्त्रत्वंइदंचोक्तश्लोकेष्वप्यस्तीतिनव्यभिचारइतिचेत् । एवंविवक्षायाअद्वैतिनामपिसंमतत्वात्सिद्धसाधनं । द्वितीयहेतोरपिभास्करादिव्याख्येयवेदव्याख्यानरूपविद्यारण्यभाष्येव्यभिचारः । नापितृतीयः । सांख्यशास्त्रोद्देश्यमोक्षहेतुज्ञानोद्देश्यकप्रवृत्तिविषयेयोगशास्त्रेव्यभिचारात् । नापिचतुर्थः । भवदुक्तप्रतिज्ञाहेतुसमुदायएवव्यभिचारादिति । तदप्ययुक्तं । तत्संगतार्थकमीमांसाशास्त्रत्वस्यहेतुत्वविवक्षयोक्ताधुनिकश्लोकेव्यभिचारवारणसंभवात् । तदुत्थाप्येत्युक्तान्यतरवत्वेसतिविशिष्टैकार्थप्रतिपत्तितात्पर्यकत्वस्यैकशास्त्रत्वविवक्षयाखंडब्रह्मतात्पर्यकाद्वैतिसिद्धांतेसिद्धसाधनानवकाशात् । तदर्थतात्पर्यकतद्व्याख्येयव्याख्यानत्वस्यद्वितीयहेतुतयाविवक्षायां भास्कराद्यभिप्रेतार्थविरुद्धार्थतात्पर्यकविद्यारण्यभाष्यादौव्यभिचाराप्रसक्तेः । तदुद्देश्यफलाभिन्नफलोद्देश्यकप्रवृत्तिविषयत्वस्यतृतीयहेतुत्वेनविवक्षिततयासांख्यमोक्षविलक्षणमोक्षोद्देश्यकप्रवृत्तिविषयेयोगशास्त्रेव्यभिचारचोदनायानिवारणसंभवात् । उक्तशैलीघटितमीमांसाशास्त्रत्वस्यचतुर्थहेतुत्वेनाभिप्रेततयोक्तप्रतिज्ञाहेतुसमुदायेव्यभिचारशंकानवकाशाच्चेति । यद्यपीदंमतांतरसंबंधित्वादस्मत्सिद्धांतविरुद्धत्वाच्चोपेक्षणीयं तथापिपरस्यनिरवकाशदुषणाभिधानाप्रवुद्धत्वप्रकटनार्थमेवायमारंभइत्यदोषः ॥ ४० ॥

यदपि । वस्तुतस्त्वित्यारभ्यएकग्रंथत्वानापत्तेरित्यंतं । प्रकृतेतदत्यंतानुपयुक्तमित्युपेक्षितं । तस्मात्तात्पर्यचंद्रिकातत्प्रकाशयोरेवार्वाचीनो

द्गीर्णदूषणाभासानांसम्यङ्गिनरस्तत्वात्केषांचिन्निर्दलत्वेनानायासेन खंड नीयत्वा च्चचंद्रिकोक्तानिस्वार्थसाधनान्यन्यार्थदूषणानिचानवद्यानिसुस्थानीतिसाधूक्तंप्र तिसूत्रंप्रकाश्येतेघटनाऽघटनेमया । स्वीयान्यपक्षयोःसम्याग्विदांकुर्वंतुसूरय इत्युक्तमितिसिद्धमित्यशेषमतिमंगलं ॥

इतिश्रीमत्तात्पर्यचंद्रिकाखंडनाभासस्यखंडनरूपेचंद्रिकाप्रकाशप्रसराभिधे गौडगेरीवेंकटरमणाचार्येण विरचिते निबंधेऽस्मिन्

॥ जिज्ञासाधिकरणं संपूर्णं ॥

पदवाक्यप्रमाणज्ञैःसर्वतंत्रस्वतंत्रकैः । चंद्रिकाचार्यवर्याधिरूढंविद्याभिधादिमं ।
हर्यक्षासनमारूढैःसत्सिद्धांतप्रवर्तकैः । नीलाच्र्यमूलगोपालकृष्णपूजा
धुरंधरैः । श्रीमध्वार्चितपट्टाभिरामार्चनपरायणैः । विद्यावारिधितीर्था
ख्यहंसराजैःकृपालुभिः । आज्ञप्तेनाल्पबोधेनह्याकरोक्तसुवर्त्मना ।
महीधरकुलोद्भूतवासुदेवार्यसूनुना । रमणाख्यांवेंकटाद्यांदधा
नेनयथामति । निर्मितेऽस्मिन्निबंधेऽद्यसंपूर्णोह्यादिमोनयः ।
रौद्रिसंवत्सरेमासिह्याषाढेऽसितपक्षके ।
आद्याधिकरणंपूर्णंद्वितीयामंदवासरे ।